(८२७)

अग्रे बृहन्न् उषसाम् ऊर्ध्वो अस्थान् निर्जगन्वान् तमसो ज्योतिषागात् ।
अग्निर् भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्य् अप्राः ॥ १० ००१ ०१
स जातो गर्भो असि रोदस्योर् अग्ने चारुर् विभृत ओषधीषु ।
चित्रः शिशुः परि तमांस्य् अक्तून् प्र मातृभ्यो अधि कनिक्रदत् गाः ॥ १० ००१ ०२
विष्णुर् इत्था परमम् अस्य विद्वाञ् जातो बृहन्न् अभि पाति तृतीयम् ।
आसा यद् अस्य पयो अक्रत स्वं सचेतसो अभ्य् अर्चन्त्य् अत्र ॥ १० ००१ ०३
अत उ त्वा पितुभृतो जनित्रीर् अन्नावृधम् प्रति चरन्त्य् अन्नैः ।
ता ईम् प्रत्य् एषि पुनर् अन्यरूपा असि त्वं विक्षु मानुषीषु होता ॥ १० ००१ ०४
होतारं चित्ररथम् अध्वरस्य यज्ञस्य-यज्ञस्य केतुं रुशन्तम् ।
प्रत्यर्धिं देवस्य-देवस्य मह्ना श्रिया त्व् अ १ ग्निम् अतिथिं जनानाम् ॥ १० ००१ ०५
स तु वस्त्राण्य् अध पेशनानि वसानो अग्निर् नाभा पृथिव्याः ।
अरुषो जातः पद इळायाः पुरोहितो राजन् यक्षीह देवान् ॥ १० ००१ ०६
आ हि द्यावापृथिवी अग्न उभे सदा पुत्रो न मातरा ततन्थ ।
प्र याह्य् अच्छोशतो यविष्ठाथा वह सहस्येह देवान् ॥ १० ००१ ०७

(८२८)

पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँर् ऋतुपते यजेह ।
ये दैव्या ऋत्विजस् तेभिर् अग्ने त्वं होतॄणाम् अस्य् आयजिष्ठः ॥ १० ००२ ०१
वेषि होत्रम् उत पोत्रं जनानाम् मन्धातासि द्रविणोदा ऋतावा ।
स्वाहा वयं कृणवामा हवींषि देवो देवान् यजत्व् अग्निर् अर्हन् ॥ १० ००२ ०२
आ देवानाम् अपि पन्थाम् अगन्म यच् छक्नवाम तद् अनु प्रवोळ्हुम् ।
अग्निर् विद्वान् स यजात् सेद् उ होता सो अध्वरान् स ऋतून् कल्पयाति ॥ १० ००२ ०३
यद् वो वयम् प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः ।
अग्निष् टद् विश्वम् आ पृणाति विद्वान् येभिर् देवाँ ऋतुभिः कल्पयाति ॥ १० ००२ ०४

यत् पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्त्यासः ।
अग्निष् टद् धोता क्रतुविद् विजानन् यजिष्ठो देवाँ ऋतुशो यजाति ॥ १० ००२ ०५
विश्वेषां ह्य् अध्वराणाम् अनीकं चित्रं केतुं जनिता त्वा जजान ।
स आ यजस्व नृवतीर् अनु क्षा स्पार्हा इषः क्षुमतीर् विश्वजन्याः ॥ १० ००२ ०६
यं त्वा द्यावापृथिवी यं त्वापस् त्वष्टा यं त्वा सुजनिमा जजान ।
पन्थाम् अनु प्रविद्वान् पितृयाणं द्युमद् अग्ने समिधानो वि भाहि ॥ १० ००२ ०७

(८२९)
इनो राजन्न् अरतिः समिद्धो रौद्रो दक्षाय सुषुमाँ अदर्शि ।
चिकिद् वि भाति भासा बृहतासिक्नीम् एति रुशतीम् अपाजन् ॥ १० ००३ ०१
कृष्णां यद् एनीम् अभि वर्पसा भूज् जनयन् योषाम् बृहतः पितुर् जाम् ।
ऊर्ध्वम् भानुं सूर्यस्य स्तभायन् दिवो वसुभिर् अरतिर् वि भाति ॥ १० ००३ ०२
भद्रो भद्रया सचमान आगात् स्वसारं जारो अभ्य् एति पश्चात् ।
सुप्रकेतैर् द्युभिर् अग्निर् वितिष्ठन् रुशद्भिर् वर्णैर् अभि रामम् अस्थात् ॥ १० ००३ ०३
अस्य यामासो बृहतो न वग्नून् इन्धाना अग्नेः सख्युः शिवस्य ।
ईड्यस्य वृष्णो बृहतः स्वासो भामासो यामन्न् अक्तवश् चिकित्रे ॥ १० ००३ ०४
स्वना न यस्य भामासः पवन्ते रोचमानस्य बृहतः सुदिवः ।
ज्येष्ठेभिर् यस् तेजिष्ठैः क्रीळुमद्भिर् वर्षिष्ठेभिर् भानुभिर् नक्षति द्याम् ॥ १० ००३ ०५
अस्य शुष्मासो ददृशानपवेर् जेहमानस्य स्वनयन् नियुद्भिः ।
प्रत्नेभिर् यो रुशद्भिर् देवतमो वि रेभद्भिर् अरतिर् भाति विभ्वा ॥ १० ००३ ०६
स आ वक्षि महि न आ च सत्सि दिवस्पृथिव्योर् अरतिर् युवत्योः ।
अग्निः सुतुकः सुतुकेभिर् अश्वै रभस्वद्भी रभस्वाँ एह गम्याः ॥ १० ००३ ०७

(८३०)
प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु ।
धन्वन्न् इव प्रपा असि त्वम् अग्न इयक्षवे पूरवे प्रत्न राजन् ॥ १० ००४ ०१

यं त्वा जनासो अभि संचरन्ति गाव उष्णम् इव व्रजं यविष्ठ ।
दूतो देवानाम् असि मर्त्यानाम् अन्तर् महांश् चरसि रोचनेन ॥ १० ००४ ०२
शिशुं न त्वा जेन्यं वर्धयन्ती माता बिभर्ति सचनस्यमाना ।
धनोर् अधि प्रवता यासि हर्यञ् जिगीषसे पशुर् इवावसृष्टः ॥ १० ००४ ०३
मूरा अमूर न वयं चिकित्वो महित्वम् अग्ने त्वम् अङ्ग वित्से ।
शये वव्रिश् चरति जिह्वयादन् रेरिह्यते युवतिं विश्पतिः सन् ॥ १० ००४ ०४
कूचिज् जायते सनयासु नव्यो वने तस्थौ पलितो धूमकेतुः ।
अस्नातापो वृषभो न प्र वेति सचेतसो यम् प्रणयन्त मर्ताः ॥ १० ००४ ०५
तनूत्यजेव तस्करा वनर्गू रशनाभिर् दशभिर् अभ्य् अधीताम् ।
इयं ते अग्ने नव्यसी मनीषा युक्ष्वा रथं न शुचयद्भिर् अङ्गैः ॥ १० ००४ ०६
ब्रह्म च ते जातवेदो नमश् चेयं च गीः सदम् इद् वर्धनी भूत् ।
रक्षा णो अग्ने तनयानि तोका रक्षोत नस् तन्वो ३ अप्रयुच्छन् ॥ १० ००४ ०७

(८३१)
एकः समुद्रो धरुणो रयीणाम् अस्मद् धृदो भूरिजन्मा वि चष्टे ।
सिषक्त्य् ऊधर् निण्योर् उपस्थ उत्सस्य मध्ये निहितम् पदं वेः ॥ १० ००५ ०१
समानं नीळं वृषणो वसानाः सं जग्मिरे महिषा अर्वतीभिः ।
ऋतस्य पदं कवयो नि पान्ति गुहा नामानि दधिरे पराणि ॥ १० ००५ ०२
ऋतायिनी मायिनी सं दधाते मित्वा शिशुं जज्ञतुर् वर्धयन्ती ।
विश्वस्य नाभिं चरतो ध्रुवस्य कवेश् चित् तन्तुम् मनसा वियन्तः ॥ १० ००५ ०३
ऋतस्य हि वर्तनयः सुजातम् इषो वाजाय प्रदिवः सचन्ते ।
अधीवासं रोदसी वावसाने घृतैर् अन्नैर् वावृधाते मधूनाम् ॥ १० ००५ ०४
सप्त स्वसॄर् अरुषीर् वावशानो विद्वान् मध्व उज् जभारा दृशे कम् ।
अन्तर् येमे अन्तरिक्षे पुराजा इच्छन् वव्रिम् अविदत् पूषणस्य ॥ १० ००५ ०५
सप्त मर्यादाः कवयस् ततक्षुस् तासाम् एकाम् इद् अभ्य् अंहुरो गात् ।
आयोर् ह स्कम्भ उपमस्य नीळे पथां विसर्गे धरुणेषु तस्थौ ॥ १० ००५ ०६
असच् च सच् च परमे व्योमन् दक्षस्य जन्मन्न् अदितेर् उपस्थे ।

अग्निर् ह नः प्रथमजा ऋतस्य पूर्व आयुनि वृषभश् च धेनुः ॥ १० ००५ ०७

(८३२)
अयं स यस्य शर्मन्न् अवोभिर् अग्नेर् एधते जरिताभिष्टौ ।
ज्येष्ठेभिर् यो भानुभिर् ऋषूणाम् पर्येति परिवीतो विभावा ॥ १० ००६ ०१
यो भानुभिर् विभावा विभात्य् अग्निर् देवेभिर् ऋतावाजस्रः ।
आ यो विवाय सख्या सखिभ्यो ऽपरिह्वृतो अत्यो न सप्तिः ॥ १० ००६ ०२
ईशे यो विश्वस्या देववीतेर् ईशे विश्वायुर् उषसो व्युष्टौ ।
आ यस्मिन् मना हवींष्य् अग्नाव् अरिष्टरथ स्कभ्नाति शूषैः ॥ १० ००६ ०३
शूषेभिर् वृधो जुषाणो अर्कैर् देवाँ अच्छा रघुपत्वा जिगाति ।
मन्द्रो होता स जुह्वा ३ यजिष्ठः सम्मिश्लो अग्निर् आ जिघर्ति देवान् ॥ १० ००६ ०४
तम् उस्राम् इन्द्रं न रेजमानम् अग्निं गीर्भिर् नमोभिर् आ कृणुध्वम् ।
आ यं विप्रासो मतिभिर् गृणन्ति जातवेदसं जुह्वं सहानाम् ॥ १० ००६ ०५
सं यस्मिन् विश्वा वसूनि जग्मुर् वाजे नाश्वाः सप्तीवन्त एवैः ।
अस्मे ऊतीर् इन्द्रवाततमा अर्वाचीना अग्न आ कृणुष्व ॥ १० ००६ ०६
अधा ह्य् अग्ने मह्ना निषद्या सद्यो जज्ञानो हव्यो बभूथ ।
तं ते देवासो अनु केतम् आयन्न् अधावर्धन्त प्रथमास ऊमाः ॥ १० ००६ ०७

(८३३)
स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर् धेहि यजथाय देव ।
सचेमहि तव दस्म प्रकेतैर् उरुष्या ण उरुभिर् देव शंसैः ॥ १० ००७ ०१
इमा अग्ने मतयस् तुभ्यं जाता गोभिर् अश्वैर् अभि गृणन्ति राधः ।
यदा ते मर्तो अनु भोगम् आनड् वसो दधानो मतिभिः सुजात ॥ १० ००७ ०२
अग्निम् मन्ये पितरम् अग्निम् आपिम् अग्निम् भ्रातरं सदम् इत् सखायम् ।
अग्नेर् अनीकम् बृहतः सपर्यं दिवि शुक्रं यजतं सूर्यस्य ॥ १० ००७ ०३
सिध्रा अग्ने धियो अस्मे सनुत्रीर् यं त्रायसे दम आ नित्यहोता ।

ऋतावा स रोहिदश्वः पुरुक्षुर् द्युभिर् अस्मा अहभिर् वामम् अस्तु ॥ १० ००७ ०४
द्युभिर् हितम् मित्रम् इव प्रयोगम् प्रत्नम् ऋत्विजम् अध्वरस्य जारम् ।
बाहुभ्याम् अग्निम् आयवो ऽजनन्त विक्षु होतारं न्य् असादयन्त ॥ १० ००७ ०५
स्वयं यजस्व दिवि देव देवान् किं ते पाकः कृणवद् अप्रचेताः ।
यथायज ऋतुभिर् देव देवान् एवा यजस्व तन्वं सुजात ॥ १० ००७ ०६
भवा नो अग्ने ऽवितोत गोपा भवा वयस्कृद् उत नो वयोधाः ।
रास्वा च नः सुमहो हव्यदातिं त्रास्वोत नस् तन्वो ३ अप्रयुच्छन् ॥ १० ००७ ०७

(८३४)
प्र केतुना बृहता यात्य् अग्निर् आ रोदसी वृषभो रोरवीति ।
दिवश् चिद् अन्ताँ उपमाँ उद् आनळ् अपाम् उपस्थे महिषो ववर्ध ॥ १० ००८ ०१
मुमोद गर्भो वृषभः ककुद्मान् अस्रेमा वत्सः शिमीवाँ अरावीत् ।
स देवतात्य् उद्यतानि कृण्वन् स्वेषु क्षयेषु प्रथमो जिगाति ॥ १० ००८ ०२
आ यो मूर्धानम् पित्रोर् अरब्ध न्य् अध्वरे दधिरे सूरो अर्णः ।
अस्य पत्मन्न् अरुषीर् अश्वबुध्ना ऋतस्य योनौ तन्वो जुषन्त ॥ १० ००८ ०३
उष-उषो हि वसो अग्रम् एषि त्वं यमयोर् अभवो विभावा ।
ऋताय सप्त दधिषे पदानि जनयन् मित्रं तन्वे ३ स्वायै ॥ १० ००८ ०४
भुवश् चक्षुर् मह ऋतस्य गोपा भुवो वरुणो यद् ऋताय वेषि ।
भुवो अपां नपाज् जातवेदो भुवो दूतो यस्य हव्यं जुजोषः ॥ १० ००८ ०५
भुवो यज्ञस्य रजसश् च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वाम् अग्ने चकृषे हव्यवाहम् ॥ १० ००८ ०६
अस्य त्रितः क्रतुना वव्रे अन्तर् इच्छन् धीतिम् पितुर् एवैः परस्य ।
सचस्यमानः पित्रोर् उपस्थे जामि ब्रुवाण आयुधानि वेति ॥ १० ००८ ०७
स पित्र्याण्य् आयुधानि विद्वान् इन्द्रेषित आप्त्यो अभ्य् अयुध्यत् ।
त्रिशीर्षाणं सप्तरश्मिं जघन्वान् त्वाष्ट्रस्य चिन् निः ससृजे त्रितो गाः ॥ १० ००८ ०८
भूरीद् इन्द्र उदिनक्षन्तम् ओजो ऽवाभिनत् सत्पतिर् मन्यमानम् ।
त्वाष्ट्रस्य चिद् विश्वरूपस्य गोनाम् आचक्राणस् त्रीणि शीर्षा परा वर्क् ॥ १० ००८ ०९

(८३५)

आपो॒ हि ष्ठा म॑यो॒भुव॒स् ता न॑ ऊ॒र्जे द॑धातन ।
म॒हे रणा॑य॒ चक्ष॑से ॥ १० ००९ ०१
यो वः॑ शि॒वत॑मो॒ रस॒स् तस्य॑ भाजयते॒ह नः॑ ।
उ॒श॒तीर् इ॑व मा॒तरः॑ ॥ १० ००९ ०२
तस्मा॒ अरं॑ गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ ।
आपो॑ ज॒नय॑था च नः ॥ १० ००९ ०३
शं नो॑ दे॒वीर् अ॒भिष्ट॑य॒ आपो॑ भवन्तु पी॒तये॑ ।
शं योर् अ॒भि स्र॑वन्तु नः ॥ १० ००९ ०४
ईशा॑ना॒ वार्या॑णां॒ क्षय॑न्तीश् चर्षणी॒नाम् ।
अ॒पो या॑चामि भेष॒जम् ॥ १० ००९ ०५
अ॒प्सु मे॒ सोमो॑ अब्रवीद् अ॒न्तर् विश्वा॑नि भेष॒जा ।
अ॒ग्निं च॑ वि॒श्वश॑म्भुवम् ॥ १० ००९ ०६
आपः॑ पृणी॒त भे॑ष॒जं वरू॑थं त॒न्वे॒३॑ मम॑ ।
ज्योक् च॒ सूर्यं॑ दृ॒शे ॥ १० ००९ ०७
इ॒दम् आ॑पः॒ प्र व॑हत॒ यत् किं च॑ दुरि॒तम् मयि॑ ।
यद् वा॒हम् अ॑भिदु॒द्रोह॒ यद् वा॑ शे॒प उ॒तानृ॑तम् ॥ १० ००९ ०८
आपो॑ अ॒द्यान्व् अ॑चारिषं॒ रसे॑न॒ सम् अ॑गस्महि ।
पय॑स्वान् अग्न॒ आ ग॑हि॒ तम् मा॒ सं सृ॑ज॒ वर्च॑सा ॥ १० ००९ ०९

(८३६)

ओ चि॒त् सखा॑यं स॒ख्या व॑वृत्यां ति॒रः पु॒रू चि॑द् अर्ण॒वं ज॑ग॒न्वान् ।
पि॒तुर् नपा॑त॒म् आ द॑धीत वे॒धा अधि॒ क्षमि॑ प्रत॒रं दीध्या॑नः ॥ १० ०१० ०१
न ते॒ सखा॑ स॒ख्यं व॑ष्ट्य् ए॒तत् सल॑क्ष्मा॒ यद् विषु॑रूपा॒ भवा॑ति ।
म॒हस् पु॒त्रासो॒ असु॑रस्य वी॒रा दि॒वो ध॒र्तार॑ उर्वि॒या परि॑ ख्यन् ॥ १० ०१० ०२

उ॒शन्ति॑ घा॒ ते अ॒मृता॑स ए॒तद् एक॑स्य चित् त्य॒जस॒म् मर्त्य॑स्य ।
नि ते॒ मनो॒ मन॑सि धाय्य् अ॒स्मे जन्यु॒ः पति॑स् त॒न्व१॒॑म् आ वि॑विश्याः ॥ १० ०१० ०३
न यत् पु॒रा च॑कृ॒मा कद् ध॑ नू॒नम् ऋ॒ता वद॑न्तो॒ अनृ॑तं रपेम ।
ग॒न्ध॒र्वो अ॒प्स्व् अप्या॑ च॒ योषा॒ सा नो॒ नाभि॑ः पर॒मं जा॒मि तन् नौ॑ ॥ १० ०१० ०४
गर्भे॒ नु नौ॑ जनि॒ता दम्प॑ती कर् दे॒वस् त्वष्टा॑ सवि॒ता वि॒श्वरू॑पः ।
नकि॑र् अस्य॒ प्र मि॑नन्ति व्र॒तानि॒ वेद॑ नाव् अ॒स्य पृ॑थि॒वी उ॒त द्यौः ॥ १० ०१० ०५
को अ॒स्य वे॑द प्रथ॒मस्याह्न॒ः क ईं॑ ददर्श॒ क इ॒ह प्र वो॑चत् ।
बृ॒हन् मि॒त्रस्य॒ वरु॑णस्य॒ धाम॒ कद् उ॑ ब्रव आहनो॒ वीच्या॒ नॄन् ॥ १० ०१० ०६
य॒मस्य॑ मा य॒म्य१ं॑ काम॒ आग॑न् स॒मा॒ने योनौ॑ सह॒शेय्या॑य ।
जा॒येव॒ पत्ये॑ त॒न्वं॑ रिरिच्यां॒ वि चि॑द् वृहेव॒ रथ्ये॑व च॒क्रा ॥ १० ०१० ०७
न ति॑ष्ठन्ति॒ न नि मि॑षन्त्य् ए॒ते दे॒वानां॒ स्पश॑ इ॒ह ये चर॑न्ति ।
अ॒न्येन॒ मद् आ॑हनो याहि॒ तूयं॒ तेन॒ वि वृ॑ह॒ रथ्ये॑व च॒क्रा ॥ १० ०१० ०८
रात्री॑भिर् अस्मा॒ अह॑भिर् दशस्येत् सूर्य॑स्य॒ चक्षु॒र् मुहु॒र् उन् मि॑मीयात् ।
दि॒वा पृ॑थि॒व्या मि॑थु॒ना सब॑न्धू य॒मीर् य॒मस्य॑ बिभृया॒द् अजा॑मि ॥ १० ०१० ०९
आ घा॒ ता ग॑च्छा॒न् उत्त॑रा यु॒गानि॒ यत्र॑ जा॒मय॑ः कृ॒णव॒न्न् अजा॑मि ।
उप॑ बर्बृहि वृष॒भाय॑ बा॒हुम् अ॒न्यम् इ॒च्छस्व सुभगे॒ पति॒म् मत् ॥ १० ०१० १०
किम् भ्राता॑सद् यद् अ॑ना॒थम् भवा॑ति॒ किम् उ॒ स्वसा॒ यन् निर्ऋ॑ति॒र् नि॒गच्छा॑त् ।
काम॑मूता ब॒ह्व ए ३॒ तद् र॑पामि त॒न्वा मे त॒न्व १॒॑ सम् पि॑पृग्धि ॥ १० ०१० ११
न वा उ॑ ते त॒न्वा त॒न्व १॒॑ सम् प॑पृच्याम् पा॒पम् आ॑हु॒र् यः स्वसा॑रं नि॒गच्छा॑त् ।
अ॒न्येन॒ मत् प्र॒मुद॑ः कल्पयस्व॒ न ते॒ भ्राता॑ सुभगे वष्ट्य् ए॒तत् ॥ १० ०१० १२
ब॒तो ब॑तासि यम॒ नैव ते॒ मनो॒ हृद॑यं चाविदाम ।
अ॒न्या किल॒ त्वां क॒क्ष्येव यु॒क्तम् परि॑ ष्वजाते॒ लिबु॑जेव वृ॒क्षम् ॥ १० ०१० १३
अ॒न्यम् ऊ॒ षु त्वं य॑म्य् अ॒न्य उ॒ त्वाम् परि॑ ष्वजाते॒ लिबु॑जेव वृ॒क्षम् ।
तस्य॑ वा॒ त्वम् मन॑ इ॒च्छा स वा॒ तवाधा॑ कृणुष्व सं॒विदं॒ सुभ॑द्राम् ॥ १० ०१० १४

(८३७)
वृ॒षा वृष्णे॑ दुदुहे॒ दोह॑सा दि॒वः पयां॑सि य॒ह्वो अदि॑ति॒र् अदा॑भ्यः ।

विश्वं स वेद वरुणो यथा धिया स यज्ञियो यजतु यज्ञियाँ ऋतून् ॥ १० ०११ ०१
रपद् गन्धर्वीर् अप्या च योषणा नदस्य नादे परि पातु मे मनः ।
इष्टस्य मध्ये अदितिर् नि धातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति ॥ १० ०११ ०२
सो चिन् नु भद्रा क्षुमती यशस्वत्य् उषा उवास मनवे स्वर्वती ।
यद् ईम् उशन्तम् उशताम् अनु क्रतुम् अग्निं होतारं विदथाय जीजनन् ॥ १० ०११ ०३
अध त्यं द्रप्सं विभ्वं विचक्षणं विर् आभरद् इषितः श्येनो अध्वरे ।
यदी विशो वृणते दस्मम् आर्या अग्निं होतारम् अध धीर् अजायत ॥ १० ०११ ०४
सदासि रण्वो यवसेव पुष्यते होत्राभिर् अग्ने मनुषः स्वध्वरः ।
विप्रस्य वा यच् छशमान उक्थ्य१ं वाजं ससवाँ उपयासि भूरिभिः ॥ १० ०११ ०५
उद् ईरय पितरा जार आ भगम् इयक्षति हर्यतो हृत्त इष्यति ।
विवक्ति वह्निः स्वपस्यते मखस् तविष्यते असुरो वेपते मती ॥ १० ०११ ०६
यस् ते अग्ने सुमतिम् मर्तो अक्षत् सहसः सूनो अति स प्र शृण्वे ।
इषं दधानो वहमानो अश्वैर् आ स द्युमाँ अमवान् भूषति द्यून् ॥ १० ०११ ०७
यद् अग्न एषा समितिर् भवाति देवी देवेषु यजता यजत्र ।
रत्ना च यद् विभजासि स्वधावो भागं नो अत्र वसुमन्तं वीतात् ॥ १० ०११ ०८
श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथम् अमृतस्य द्रवित्नुम् ।
आ नो वह रोदसी देवपुत्रे माकिर् देवानाम् अप भूर् इह स्याः ॥ १० ०११ ०९

(८३८)

द्यावा ह क्षामा प्रथमे ऋतेनाभिश्रावे भवतः सत्यवाचा ।
देवो यन् मर्तान् यजथाय कृण्वन् सीदद् धोता प्रत्यङ् स्वम् असुं यन् ॥ १० ०१२ ०१
देवो देवान् परिभूर् ऋतेन वहा नो हव्यम् प्रथमश् चिकित्वान् ।
धूमकेतुः समिधा भाऋजीको मन्द्रो होता नित्यो वाचा यजीयान् ॥ १० ०१२ ०२
स्वावृग् देवस्यामृतं यदी गोर् अतो जातासो धारयन्त उर्वी ।
विश्वे देवा अनु तत् ते यजुर् गुर् दुहे यद् एनी दिव्यं घृतं वाः ॥ १० ०१२ ०३
अर्चामि वां वर्धायापो घृतस्नू द्यावाभूमी शृणुतं रोदसी मे ।
अहा यद् द्यावो ऽसुनीतिम् अयन् मध्वा नो अत्र पितरा शिशीताम् ॥ १० ०१२ ०४

किं स्विन् नो राजा जगृहे कद् अस्याति व्रतं चकृमा को वि वेद ।
मित्रश् चिद् धि ष्मा जुहुराणो देवाञ् छ्लोको न याताम् अपि वाजो अस्ति ॥ १० ०१२ ०५
दुर्मन्त्व् अत्रामृतस्य नाम सलक्ष्मा यद् विषुरूपा भवाति ।
यमस्य यो मनवते सुमन्त्व् अग्ने तम् ऋष्व पाह्य् अप्रयुच्छन् ॥ १० ०१२ ०६
यस्मिन् देवा विदथे मादयन्ते विवस्वतः सदने धारयन्ते ।
सूर्ये ज्योतिर् अदधुर् मास्य् अ१क्तून् परि द्योतनिं चरतो अजस्रा ॥ १० ०१२ ०७
यस्मिन् देवा मन्मनि संचरन्त्य् अपीच्ये३ न वयम् अस्य विद्म ।
मित्रो नो अत्रादितिर् अनागान् सविता देवो वरुणाय वोचत् ॥ १० ०१२ ०८
श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथम् अमृतस्य द्रवित्नुम् ।
आ नो वह रोदसी देवपुत्रे माकिर् देवानाम् अप भूर् इह स्याः ॥ १० ०१२ ०९

(८३९)
युजे वाम् ब्रह्म पूर्व्यं नमोभिर् वि श्लोक एतु पथ्येव सूरेः ।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥ १० ०१३ ०१
यमे इव यतमाने यद् ऐतम् प्र वाम् भरन् मानुषा देवयन्तः ।
आ सीदतं स्वम् उ लोकं विदाने स्वासस्थे भवतम् इन्दवे नः ॥ १० ०१३ ०२
पञ्च पदानि रुपो अन्व् अरोहं चतुष्पदीम् अन्व् एमि व्रतेन ।
अक्षरेण प्रति मिम एताम् ऋतस्य नाभाव् अधि सम् पुनामि ॥ १० ०१३ ०३
देवेभ्यः कम् अवृणीत मृत्युम् प्रजायै कम् अमृतं नावृणीत ।
बृहस्पतिं यज्ञम् अकृण्वत ऋषिम् प्रियां यमस् तन्व१म् प्रारिरेचीत् ॥ १० ०१३ ०४
सप्त क्षरन्ति शिशवे मरुत्वते पित्रे पुत्रासो अप्य् अवीवतन्न् ऋतम् ।
उभे इद् अस्योभयस्य राजत उभे यतेते उभयस्य पुष्यतः ॥ १० ०१३ ०५

(८४०)
परेयिवांसम् प्रवतो महीर् अनु बहुभ्यः पन्थाम् अनुपस्पशानम् ।

वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य ॥ १० ०१४ ०१
यमो नो गातुम् प्रथमो विवेद नैषा गव्यूतिर् अपभर्तवा उ ।
यत्रा नः पूर्वे पितरः परेयुर् एना जज्ञानाः पथ्या ३ अनु स्वाः ॥ १० ०१४ ०२
मातली कव्यैर् यमो अङ्गिरोभिर् बृहस्पतिर् ऋक्वभिर् वावृधानः ।
यांश् च देवा वावृधुर् ये च देवान् स्वाहान्ये स्वधयान्ये मदन्ति ॥ १० ०१४ ०३
इमं यम प्रस्तरम् आ हि सीदाङ्गिरोभिः पितृभिः संविदानः ।
आ त्वा मन्त्राः कविशस्ता वहन्त्व् एना राजन् हविषा मादयस्व ॥ १० ०१४ ०४
अङ्गिरोभिर् आ गहि यज्ञियेभिर् यम वैरूपैर् इह मादयस्व ।
विवस्वन्तं हुवे यः पिता ते ऽस्मिन् यज्ञे बर्हिष्य् आ निषद्य ॥ १० ०१४ ०५
अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानाम् अपि भद्रे सौमनसे स्याम ॥ १० ०१४ ०६
प्रेहि प्रेहि पथिभिः पूर्व्येभिर् यत्रा नः पूर्वे पितरः परेयुः ।
उभा राजाना स्वधया मदन्ता यमम् पश्यासि वरुणं च देवम् ॥ १० ०१४ ०७
सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन् ।
हित्वायावद्यम् पुनर् अस्तम् एहि सं गच्छस्व तन्वा सुवर्चाः ॥ १० ०१४ ०८
अपेत वीत वि च सर्पतातो ऽस्मा एतम् पितरो लोकम् अक्रन् ।
अहोभिर् अद्भिर् अक्तुभिर् व्यक्तं यमो ददात्य् अवसानम् अस्मै ॥ १० ०१४ ०९
अति द्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा ।
अथा पितॄन् सुविदत्राँ उपेहि यमेन ये सधमादम् मदन्ति ॥ १० ०१४ १०
यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ ।
ताभ्याम् एनम् परि देहि राजन् स्वस्ति चास्मा अनमीवं च धेहि ॥ १० ०१४ ११
उरूणसाव् असुतृपा उदुम्बलौ यमस्य दूतौ चरतो जनाँ अनु ।
ताव् अस्मभ्यं दृशये सूर्याय पुनर् दाताम् असुम् अद्येह भद्रम् ॥ १० ०१४ १२
यमाय सोमं सुनुत यमाय जुहुता हविः ।
यमं ह यज्ञो गच्छत्य् अग्निदूतो अरंकृतः ॥ १० ०१४ १३
यमाय घृतवद् धविर् जुहोत प्र च तिष्ठत ।
स नो देवेष्व् आ यमद् दीर्घम् आयुः प्र जीवसे ॥ १० ०१४ १४
यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन ।

इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥ १० ०१४ १५
त्रिकद्रुकेभिः पतति षळ् उर्वीर् एकम् इद् बृहत् ।
त्रिष्टुब् गायत्री छन्दांसि सर्वा ता यम आहिता ॥ १० ०१४ १६

(८४१)

उद् ईरताम् अवर उत् परास उन् मध्यमाः पितरः सोम्यासः ।
असुं य ईयुर् अवृका ऋतज्ञास् ते नो ऽवन्तु पितरो हवेषु ॥ १० ०१५ ०१
इदम् पितृभ्यो नमो अस्त्व् अद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्य् आ निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥ १० ०१५ ०२
आहम् पितॄन् सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस् त इहागमिष्ठाः ॥ १० ०१५ ०३
बर्हिषदः पितर ऊत्य् अ१र्वाग् इमा वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शंतमेनाथा नः शं योर् अरपो दधात ॥ १० ०१५ ०४
उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्व् अधि ब्रुवन्तु ते ऽवन्त्व् अस्मान् ॥ १० ०१५ ०५
आच्या जानु दक्षिणतो निषद्येमं यज्ञम् अभि गृणीत विश्वे ।
मा हिंसिष्ट पितरः केन चिन् नो यद् व आगः पुरुषता कराम ॥ १० ०१५ ०६
आसीनासो अरुणीनाम् उपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस् तस्य वस्वः प्र यच्छत त इहोर्जं दधात ॥ १० ०१५ ०७
ये नः पूर्वे पितरः सोम्यासो ऽनूहिरे सोमपीथं वसिष्ठाः ।
तेभिर् यमः संरराणो हवींष्य् उशन्न् उशद्भिः प्रतिकामम् अत्तु ॥ १० ०१५ ०८
ये तातृषुर् देवत्रा जेहमाना होत्राविद स्तोमतष्टासो अर्कैः ।
आग्ने याहि सुविदत्रेभिर् अर्वाङ् सत्यैः कव्यैः पितृभिर् घर्मसद्भिः ॥ १० ०१५ ०९
ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं दधानाः ।
आग्ने याहि सहस्रं देववन्दैः परैः पूर्वैः पितृभिर् घर्मसद्भिः ॥ १० ०१५ १०
अग्निष्वात्ताः पितर एह गच्छत सदः-सदः सदत सुप्रणीतयः ।
अत्ता हवींषि प्रयतानि बर्हिष्य् अथा रयिं सर्ववीरं दधातन ॥ १० ०१५ ११

त्वम् अग्न ईळितो जातवेदो ऽवाड् ढव्यानि सुरभीणि कृत्वी ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्न् अद्धि त्वं देव प्रयता हवींषि ॥ १० ०१५ १२
ये चेह पितरो ये च नेह यांश् च विद्म याँ उ च न प्रविद्म ।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर् यज्ञं सुकृतं जुषस्व ॥ १० ०१५ १३
ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते ।
तेभिः स्वराळ् असुनीतिम् एतां यथावशं तन्वं कल्पयस्व ॥ १० ०१५ १४

(८४२)
मैनम् अग्ने वि दहो माभि शोचो मास्य त्वचं चिक्षिपो मा शरीरम् ।
यदा शृतं कृणवो जातवेदो ऽथेम् एनम् प्र हिणुतात् पितृभ्यः ॥ १० ०१६ ०१
शृतं यदा करसि जातवेदो ऽथेम् एनम् परि दत्तात् पितृभ्यः ।
यदा गच्छात्य् असुनीतिम् एताम् अथा देवानां वशनीर् भवाति ॥ १० ०१६ ०२
सूर्यं चक्षुर् गच्छतु वातम् आत्मा द्यां च गच्छ पृथिवीं च धर्मणा ।
अपो वा गच्छ यदि तत्र ते हितम् ओषधीषु प्रति तिष्ठा शरीरैः ॥ १० ०१६ ०३
अजो भागस् तपसा तं तपस्व तं ते शोचिस् तपतु तं ते अर्चिः ।
यास् ते शिवास् तन्वो जातवेदस् ताभिर् वहैनं सुकृताम् उलोकम् ॥ १० ०१६ ०४
अव सृज पुनर् अग्ने पितृभ्यो यस् त आहुतश् चरति स्वधाभिः ।
आयुर् वसान उप वेतु शेषः सं गच्छतां तन्वा जातवेदः ॥ १० ०१६ ०५
यत् ते कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः ।
अग्निष् टद् विश्वाद् अगदं कृणोतु सोमश् च यो ब्राह्मणाँ आविवेश ॥ १० ०१६ ०६
अग्नेर् वर्म परि गोभिर् व्ययस्व सम् प्रोर्णुष्व पीवसा मेदसा च ।
नेत् त्वा धृष्णुर् हरसा जर्हृषाणो दधृग् विधक्ष्यन् पर्यङ्खयाति ॥ १० ०१६ ०७
इमम् अग्ने चमसम् मा वि जिह्वरः प्रियो देवानाम् उत सोम्यानाम् ।
एष यश् चमसो देवपानस् तस्मिन् देवा अमृता मादयन्ते ॥ १० ०१६ ०८
क्रव्यादम् अग्निम् प्र हिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः ।
इहैवायम् इतरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ १० ०१६ ०९
यो अग्निः क्रव्यात् प्रविवेश वो गृहम् इमम् पश्यन्न् इतरं जातवेदसम् ।

तं हरामि पितृयज्ञाय देवं स घर्मम् इन्वात् परमे सधस्थे ॥ १० ०१६ १०
यो अग्निः क्रव्यवाहनः पितॄन् यक्षद् ऋतावृधः ।
प्रेद् उ हव्यानि वोचति देवेभ्यश् च पितृभ्य आ ॥ १० ०१६ ११
उशन्तस् त्वा नि धीमह्य् उशन्तः सम् इधीमहि ।
उशन्न् उशत आ वह पितॄन् हविषे अत्तवे ॥ १० ०१६ १२
यं त्वम् अग्ने समदहस् तम् उ निर् वापया पुनः ।
कियाम्ब्व् अत्र रोहतु पाकदूर्वा व्यल्कशा ॥ १० ०१६ १३
शीतिके शीतिकावति ह्लादिके ह्लादिकावति ।
मण्डूक्या ३ सु सं गम इमं स्व् अ १ ग्निं हर्षय ॥ १० ०१६ १४

(८४३)
त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वम् भुवनं सम् एति ।
यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ॥ १० ०१७ ०१
अपागूहन्न् अमृताम् मर्त्येभ्यः कृत्वी सवर्णाम् अददुर् विवस्वते ।
उताश्विनाव् अभरद् यत् तद् आसीद् अजहाद् उ द्वा मिथुना सरण्यूः ॥ १० ०१७ ०२
पूषा त्वेतश् च्यावयतु प्र विद्वान् अनष्टपशुर् भुवनस्य गोपाः ।
स त्वैतेभ्यः परि ददत् पितृभ्यो ऽग्निर् देवेभ्यः सुविदत्रियेभ्यः ॥ १० ०१७ ०३
आयुर् विश्वायुः परि पासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात् ।
यत्रासते सुकृतो यत्र ते ययुस् तत्र त्वा देवः सविता दधातु ॥ १० ०१७ ०४
पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत् ।
स्वस्तिदा आघृणिः सर्ववीरो ऽप्रयुच्छन् पुर एतु प्रजानन् ॥ १० ०१७ ०५
प्रपथे पथाम् अजनिष्ट पूषा प्रपथे दिवः प्रपथे पृथिव्याः ।
उभे अभि प्रियतमे सधस्थे आ च परा च चरति प्रजानन् ॥ १० ०१७ ०६
सरस्वतीं देवयन्तो हवन्ते सरस्वतीम् अध्वरे तायमाने ।
सरस्वतीं सुकृतो अह्वयन्त सरस्वती दाशुषे वार्यं दात् ॥ १० ०१७ ०७
सरस्वति या सरथं ययाथ स्वधाभिर् देवि पितृभिर् मदन्ती ।
आसद्यास्मिन् बर्हिषि मादयस्वानमीवा इष आ धेह्य् अस्मे ॥ १० ०१७ ०८

सरस्वतीं याम् पितरो हवन्ते दक्षिणा यज्ञम् अभिनक्षमाणाः ।
सहस्रार्घम् इळो अत्र भागं रायस् पोषं यजमानेषु धेहि ॥ १० ०१७ ०९
आपो अस्मान् मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ।
विश्वं हि रिप्रम् प्रवहन्ति देवीर् उद् इद् आभ्यः शुचिर् आ पूत एमि ॥ १० ०१७ १०
द्रप्सश् चस्कन्द प्रथमाँ अनु द्यून् इमं च योनिम् अनु यश् च पूर्वः ।
समानं योनिम् अनु संचरन्तं द्रप्सं जुहोम्य् अनु सप्त होत्राः ॥ १० ०१७ ११
यस् ते द्रप्स स्कन्दति यस् ते अंशुर् बाहुच्युतो धिषणाया उपस्थात् ।
अध्वर्योर् वा परि वा यः पवित्रात् तं ते जुहोमि मनसा वषट्कृतम् ॥ १० ०१७ १२
यस् ते द्रप्स स्कन्नो यस् ते अंशुर् अवश् च यः परः स्रुचा ।
अयं देवो बृहस्पतिः सं तं सिञ्चतु राधसे ॥ १० ०१७ १३
पयस्वतीर् ओषधयः पयस्वन् मामकं वचः ।
अपाम् पयस्वद् इत् पयस् तेन मा सह शुन्धत ॥ १० ०१७ १४

(८४४)
परम् मृत्यो अनु परेहि पन्थां यस् ते स्व इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥ १० ०१८ ०१
मृत्योः पदं योपयन्तो यद् ऐत द्राघीय आयुः प्रतरं दधानाः ।
आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवत यज्ञियासः ॥ १० ०१८ ०२
इमे जीवा वि मृतैर् आववृत्रन्न् अभूद् भद्रा देवहूतिर् नो अद्य ।
प्राञ्चो अगाम नृतये हसाय द्राघीय आयुः प्रतरं दधानाः ॥ १० ०१८ ०३
इमं जीवेभ्यः परिधिं दधामि मैषां नु गाद् अपरो अर्थम् एतम् ।
शतं जीवन्तु शरदः पुरूचीर् अन्तर् मृत्युं दधताम् पर्वतेन ॥ १० ०१८ ०४
यथाहान्य् अनुपूर्वम् भवन्ति यथ ऋतव ऋतुभिर् यन्ति साधु ।
यथा न पूर्वम् अपरो जहात्य् एवा धातर् आयूंषि कल्पयैषाम् ॥ १० ०१८ ०५
आ रोहतायुर् जरसं वृणाना अनुपूर्वं यतमाना यति ष्ठ ।
इह त्वष्टा सुजनिमा सजोषा दीर्घम् आयुः करति जीवसे वः ॥ १० ०१८ ०६
इमा नारीर् अविधवाः सुपत्नीर् आञ्जनेन सर्पिषा सं विशन्तु ।

अनश्रवो ऽनमीवाः सुरत्ना आ रोहन्तु जनयो योनिम् अग्रे ॥ १० ०१८ ०७
उद् ईर्ष्व नार्य् अभि जीवलोकं गतासुम् एतम् उप शेष एहि ।
हस्तग्राभस्य दिधिषोस् तवेदम् पत्युर् जनित्वम् अभि सम् बभूथ ॥ १० ०१८ ०८
धनुर् हस्ताद् आददानो मृतस्यास्मे क्षत्राय वर्चसे बलाय ।
अत्रैव त्वम् इह वयं सुवीरा विश्वा स्पृधो अभिमातीर् जयेम ॥ १० ०१८ ०९
उप सर्प मातरम् भूमिम् एताम् उरुव्यचसम् पृथिवीं सुशेवाम् ।
ऊर्णम्रदा युवतिर् दक्षिणावत एषा त्वा पातु निरृतेर् उपस्थात् ॥ १० ०१८ १०
उच् छ्वञ्चस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपवञ्चना ।
माता पुत्रं यथा सिचाभ्य् एनम् भूम ऊर्णुहि ॥ १० ०१८ ११
उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु सहस्रम् मित उप हि श्रयन्ताम् ।
ते गृहासो घृतश्चुतो भवन्तु विश्वाहास्मै शरणाः सन्त्व् अत्र ॥ १० ०१८ १२
उत् ते स्तभ्नामि पृथिवीं त्वत् परीमं लोगं निदधन् मो अहं रिषम् ।
एतां स्थूणाम् पितरो धारयन्तु ते ऽत्रा यमः सादना ते मिनोतु ॥ १० ०१८ १३
प्रतीचीने माम् अहनीष्वाः पर्णम् इवा दधुः ।
प्रतीचीं जग्रभा वाचम् अश्वं रशनया यथा ॥ १० ०१८ १४

(८४५)
नि वर्तध्वम् मानु गातास्मान् सिषक्त रेवतीः ।
अग्नीषोमा पुनर्वसू अस्मे धारयतं रयिम् ॥ १० ०१९ ०१
पुनर् एना नि वर्तय पुनर् एना न्य् आ कुरु ।
इन्द्र एणा नि यच्छत्व् अग्निर् एना उपाजतु ॥ १० ०१९ ०२
पुनर् एता नि वर्तन्ताम् अस्मिन् पुष्यन्तु गोपतौ ।
इहैवाग्ने नि धारयेह तिष्ठतु या रयिः ॥ १० ०१९ ०३
यन् नियानं न्ययनं संज्ञानं यत् परायणम् ।
आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ॥ १० ०१९ ०४
य उदानड् व्ययनं य उदानट् परायणम् ।
आवर्तनं निवर्तनम् अपि गोपा नि वर्तताम् ॥ १० ०१९ ०५

आ निवर्त नि वर्तय पुनर् न इन्द्र गा देहि ।
जीवाभिर् भुनजामहै ॥ १० ०१९ ०६
परि वो विश्वतो दध ऊर्जा घृतेन पयसा ।
ये देवाः के च यज्ञियास् ते रय्या सं सृजन्तु नः ॥ १० ०१९ ०७
आ निवर्तन वर्तय नि निवर्तन वर्तय ।
भूम्याश् चतस्रः प्रदिशस् ताभ्य एना नि वर्तय ॥ १० ०१९ ०८

(८४६)
भद्रं नो अपि वातय मनः ॥ १० ०२० ०१
अग्निम् ईळे भुजां यविष्ठं शासा मित्रं दुर्धरीतुम् ।
यस्य धर्मन् स्व १ र् एनीः सपर्यन्ति मातुर् ऊधः ॥ १० ०२० ०२
यम् आसा कृपनीळम् भासाकेतुं वर्धयन्ति ।
भ्राजते श्रेणिदन् ॥ १० ०२० ०३
अर्यो विशां गातुर् एति प्र यद् आनड् दिवो अन्तान् ।
कविर् अभ्रं दीद्यानः ॥ १० ०२० ०४
जुषद् धव्या मानुषस्योर्ध्वस् तस्थाव् ऋभ्वा यज्ञे ।
मिन्वन् सद्म पुर एति ॥ १० ०२० ०५
स हि क्षेमो हविर् यज्ञः श्रुष्टीद् अस्य गातुर् एति ।
अग्निं देवा वाशीमन्तम् ॥ १० ०२० ०६
यज्ञासाहं दुव इषे ऽग्निम् पूर्वस्य शेवस्य ।
अद्रेः सूनुम् आयुम् आहुः ॥ १० ०२० ०७
नरो ये के चास्मद् आ विश्वेत् ते वाम आ स्युः ।
अग्निं हविषा वर्धन्तः ॥ १० ०२० ०८
कृष्णः श्वेतो ऽरुषो यामो अस्य ब्रध्न ऋज्र उत शोणो यशस्वान् ।
हिरण्यरूपं जनिता जजान ॥ १० ०२० ०९
एवा ते अग्ने विमदो मनीषाम् ऊर्जो नपाद् अमृतेभिः सजोषाः ।
गिर आ वक्षत् सुमतीर् इयान इषम् ऊर्जं सुक्षितिं विश्वम् आभाः ॥ १० ०२० १०

(८४७)
आग्निं न स्ववृक्तिभिर् होतारं त्वा वृणीमहे ।
यज्ञाय स्तीर्णबर्हिषे वि वो मदे शीरम् पावकशोचिषं विवक्षसे ॥ १० ०२१ ०१
त्वाम् उ ते स्वाभुवः शुम्भन्त्य् अश्वराधसः ।
वेति त्वाम् उपसेचनी वि वो मद ऋजीतिर् अग्न आहुतिर् विवक्षसे ॥ १० ०२१ ०२
त्वे धर्माण आसते जुहूभिः सिञ्चतीर् इव ।
कृष्णा रूपाण्य् अर्जुना वि वो मदे विश्वा अधि श्रियो धिषे विवक्षसे ॥ १० ०२१ ०३
यम् अग्ने मन्यसे रयिं सहसावन्न् अमर्त्य ।
तम् आ नो वाजसातये वि वो मदे यज्ञेषु चित्रम् आ भरा विवक्षसे ॥ १० ०२१ ०४
अग्निर् जातो अथर्वणा विदद् विश्वानि काव्या ।
भुवद् दूतो विवस्वतो वि वो मदे प्रियो यमस्य काम्यो विवक्षसे ॥ १० ०२१ ०५
त्वां यज्ञेष्व् ईळते ऽग्ने प्रयत्य् अध्वरे ।
त्वं वसूनि काम्या वि वो मदे विश्वा दधासि दाशुषे विवक्षसे ॥ १० ०२१ ०६
त्वां यज्ञेष्व् ऋत्विजं चारुम् अग्ने नि षेदिरे ।
घृतप्रतीकम् मनुषो वि वो मदे शुक्रं चेतिष्ठम् अक्षभिर् विवक्षसे ॥ १० ०२१ ०७
अग्ने शुक्रेण शोचिषोरु प्रथयसे बृहत् ।
अभिक्रन्दन् वृषायसे वि वो मदे गर्भं दधासि जामिषु विवक्षसे ॥ १० ०२१ ०८

(८४८)
कुह श्रुत इन्द्रः कस्मिन्न् अद्य जने मित्रो न श्रूयते ।
ऋषीणां वा यः क्षये गुहा वा चर्कृषे गिरा ॥ १० ०२२ ०१
इह श्रुत इन्द्रो अस्मे अद्य स्तवे वज्र्य् ऋचीषमः ।
मित्रो न यो जनेष्व् आ यशश् चक्रे असाम्य् आ ॥ १० ०२२ ०२
महो यस् पतिः शवसो असाम्य् आ महो नृम्णस्य तूतुजिः ।
भर्ता वज्रस्य धृष्णोः पिता पुत्रम् इव प्रियम् ॥ १० ०२२ ०३

यु॒जा॒नो अश्वा॒ वात॑स्य॒ धुनी॑ दे॒वो दे॒वस्य॑ वज्रिवः ।
स्यन्ता॑ प॒था वि॒रुक्म॑ता सृजा॒न स्तो॒ष्य् अध्व॑नः ॥ १० ०२२ ०४
त्वं त्या चि॒द् वात॒स्याश्वागा॑ ऋ॒ज्रा त्मना॒ वह॑ध्यै ।
ययो॑र् दे॒वो न मर्त्यो॑ य॒न्ता नकि॑र् वि॒दाय्यः॑ ॥ १० ०२२ ०५
अध॒ ग्मन्तो॒शना॑ पृच्छते वां॒ कद॑र्था न॒ आ गृ॒हम् ।
आ ज॑ग्मथुः परा॒काद् दि॒वश् च॒ ग्मश् च॒ मर्त्य॑म् ॥ १० ०२२ ०६
आ न॑ इन्द्र पृक्षसे ऽ॒स्माक॒म् ब्रह्मोद्य॑तम् ।
तत् त्वा॑ याचाम॒हे ऽवः॑ शुष्णं॒ यद् धन्न् अमा॑नुषम् ॥ १० ०२२ ०७
अ॒क॒र्मा दस्यु॑र् अ॒भि नो॑ अम॒न्तुर् अ॒न्यव्र॑तो॒ अमा॑नुषः ।
त्वं तस्या॑मित्रह॒न् वध॑र् दा॒सस्य॑ दम्भय ॥ १० ०२२ ०८
त्वं न॑ इन्द्र शूर॒ शूरै॑र् उ॒त त्वोता॑सो ब॒र्हणा॑ ।
पु॒रु॒त्रा ते॒ वि पू॒र्तयो॒ नव॑न्त क्षो॒णयो॑ यथा ॥ १० ०२२ ०९
त्वं तान् वृ॑त्र॒हत्ये॑ चोदयो॒ नॄन् का॑र्पा॒णे शू॑र वज्रिवः ।
गु॒हा यदी॑ कवी॒नां वि॒शां नक्ष॑त्रशवसाम् ॥ १० ०२२ १०
म॒क्षू ता त॑ इन्द्र दा॒नाप्न॑स आक्षा॒णे शू॑र वज्रिवः ।
यद् ध॒ शुष्ण॑स्य द॒म्भयो॑ जा॒तं विश्वं॑ स॒याव॑भिः ॥ १० ०२२ ११
माकु॒ध्र्यग् इन्द्र शूर॒ वस्वी॑र् अ॒स्मे भू॑वन्न् अ॒भिष्ट॑यः ।
व॒यं-व॑यं त आसां सु॒म्ने स्या॑म वज्रिवः ॥ १० ०२२ १२
अ॒स्मे ता त॑ इन्द्र सन्तु स॒त्याहिं॑सन्तीर् उप॒स्पृशः॑ ।
वि॒द्याम॒ यासा॒म् भुजो॑ धेनू॒नां न व॑ज्रिवः ॥ १० ०२२ १३
अ॒ह॒स्ता यद् अ॒पदी॒ वर्ध॑त॒ क्षाः शची॑भिर् वे॒द्याना॑म् ।
शुष्ण॒म् परि॑ प्रदक्षि॒णिद् वि॒श्वाय॑वे॒ नि शि॑श्नथः ॥ १० ०२२ १४
पिबा॑-पि॒बेद् इ॑न्द्र शूर॒ सोम॒म् मा रि॑षण्यो वसवान॒ वसुः॒ सन् ।
उ॒त त्राय॑स्व गृण॒तो म॒घोनो॑ म॒हश् च॑ रा॒यो रे॒वत॑स् कृधी नः ॥ १० ०२२ १५

(८४९)
यजा॑मह॒ इन्द्रं॒ वज्र॑दक्षिणं॒ हरी॑णां र॒थ्य१॒ं॑ विव्र॑तानाम् ।

प्र श्मश्रु दोधुवद् ऊर्ध्वथा भूद् वि सेनाभिर् दयमानो वि राधसा ॥ १० ०२३ ०१
हरी न्व् अस्य या वने विदे वस्व् इन्द्रो मघैर् मघवा वृत्रहा भुवत् ।
ऋभुर् वाज ऋभुक्षाः पत्यते शवो ऽव क्ष्णौमि दासस्य नाम चित् ॥ १० ०२३ ०२
यदा वज्रं हिरण्यम् इद् अथा रथं हरी यम् अस्य वहतो वि सूरिभिः ।
आ तिष्ठति मघवा सनश्रुत इन्द्रो वाजस्य दीर्घश्रवसस् पतिः ॥ १० ०२३ ०३
सो चिन् नु वृष्टिर् यूथ्या३ स्वा सचाँ इन्द्रः श्मश्रूणि हरिताभि प्रुष्णुते ।
अव वेति सुक्षयं सुते मधूद् इद् धूनोति वातो यथा वनम् ॥ १० ०२३ ०४
यो वाचा विवाचो मृध्रवाचः पुरू सहस्राशिवा जघान ।
तत्-तद् इद् अस्य पौंस्यं गृणीमसि पितेव यस् तविषीं वावृधे शवः ॥ १० ०२३ ०५
स्तोमं त इन्द्र विमदा अजीजनन्न् अपूर्व्यम् पुरुतमं सुदानवे ।
विद्मा ह्य् अस्य भोजनम् इनस्य यद् आ पशुं न गोपाः करामहे ॥ १० ०२३ ०६
माकिर् न एना सख्या वि यौषुस् तव चेन्द्र विमदस्य च ऋषेः ।
विद्मा हि ते प्रमतिं देव जामिवद् अस्मे ते सन्तु सख्या शिवानि ॥ १० ०२३ ०७

(८५०)
इन्द्र सोमम् इमम् पिब मधुमन्तं चमू सुतम् ।
अस्मे रयिं नि धारय वि वो मदे सहस्रिणम् पुरूवसो विवक्षसे ॥ १० ०२४ ०१
त्वां यज्ञेभिर् उक्थैर् उप हव्येभिर् ईमहे ।
शचीपते शचीनां वि वो मदे श्रेष्ठं नो धेहि वार्यं विवक्षसे ॥ १० ०२४ ०२
यस् पतिर् वार्याणाम् असि रध्रस्य चोदिता ।
इन्द्र स्तोतॄणाम् अविता वि वो मदे द्विषो नः पाह्य् अंहसो विवक्षसे ॥ १० ०२४ ०३
युवं शक्रा मायाविना समीची निर् अमन्थतम् ।
विमदेन यद् ईळिता नासत्या निरमन्थतम् ॥ १० ०२४ ०४
विश्वे देवा अकृपन्त समीच्योर् निष्पतन्त्योः ।
नासत्याव् अब्रुवन् देवाः पुनर् आ वहताद् इति ॥ १० ०२४ ०५
मधुमन् मे परायणम् मधुमत् पुनर् आयनम् ।
ता नो देवा देवतया युवम् मधुमतस् कृतम् ॥ १० ०२४ ०६

(८५१)

भद्रं नो अपि वातय मनो दक्षम् उत क्रतुम् ।

अधा ते सख्ये अन्धसो वि वो मदे रणन् गावो न यवसे विवक्षसे ॥ १० ०२५ ०१

हृदिस्पृशस् त आसते विश्वेषु सोम धामसु ।

अधा कामा इमे मम वि वो मदे वि तिष्ठन्ते वसूयवो विवक्षसे ॥ १० ०२५ ०२

उत व्रतानि सोम ते प्राहम् मिनामि पाक्या ।

अधा पितेव सूनवे वि वो मदे मृळा नो अभि चिद् वधाद् विवक्षसे ॥ १० ०२५ ०३

सम् उ प्र यन्ति धीतयः सर्गासो ऽवताँ इव ।

क्रतुं नः सोम जीवसे वि वो मदे धारया चमसाँ इव विवक्षसे ॥ १० ०२५ ०४

तव त्ये सोम शक्तिभिर् निकामासो व्य् ऋण्विरे ।

गृत्सस्य धीरास् तवसो वि वो मदे व्रजं गोमन्तम् अश्विनं विवक्षसे ॥ १० ०२५ ०५

पशुं नः सोम रक्षसि पुरुत्रा विष्ठितं जगत् ।

समाकृणोषि जीवसे वि वो मदे विश्वा सम्पश्यन् भुवना विवक्षसे ॥ १० ०२५ ०६

त्वं नः सोम विश्वतो गोपा अदाभ्यो भव ।

सेध राजन्न् अप स्रिधो वि वो मदे मा नो दुःशंस ईशता विवक्षसे ॥ १० ०२५ ०७

त्वं नः सोम सुक्रतुर् वयोधेयाय जागृहि ।

क्षेत्रवित्तरो मनुषो वि वो मदे द्रुहो नः पाह्य् अंहसो विवक्षसे ॥ १० ०२५ ०८

त्वं नो वृत्रहन्तमेन्द्रस्येन्दो शिवः सखा ।

यत् सीं हवन्ते समिथे वि वो मदे युध्यमानास् तोकसातौ विवक्षसे ॥ १० ०२५ ०९

अयं घ स तुरो मद इन्द्रस्य वर्धत प्रियः ।

अयं कक्षीवतो महो वि वो मदे मतिं विप्रस्य वर्धयद् विवक्षसे ॥ १० ०२५ १०

अयं विप्राय दाशुषे वाजाँ इयर्ति गोमतः ।

अयं सप्तभ्य आ वरं वि वो मदे प्रान्धं श्रोणं च तारिषद् विवक्षसे ॥ १० ०२५ ११

(८५२)

प्र ह्य् अच्छा मनीषा स्पार्हा यन्ति नियुतः ।
प्र दस्रा नियुद्रथः पूषा अविष्टु माहिनः ॥ १० ०२६ ०१
यस्य त्यन् महित्वं वाताप्यम् अयं जनः ।
विप्र आ वंसद् धीतिभिश् चिकेत सुष्टुतीनाम् ॥ १० ०२६ ०२
स वेद सुष्टुतीनाम् इन्दुर् न पूषा वृषा ।
अभि प्सुरः प्रुषायति व्रजं न आ प्रुषायति ॥ १० ०२६ ०३
मंसीमहि त्वा वयम् अस्माकं देव पूषन् ।
मतीनां च साधनं विप्राणां चाधवम् ॥ १० ०२६ ०४
प्रत्यर्धिर् यज्ञानाम् अश्वहयो रथानाम् ।
ऋषिः स यो मनुर्हितो विप्रस्य यावयत्सखः ॥ १० ०२६ ०५
आधीषमाणायाः पतिः शुचायाश् च शुचस्य च ।
वासोवायो ऽवीनाम् आ वासांसि मर्मृजत् ॥ १० ०२६ ०६
इनो वाजानाम् पतिर् इनः पुष्टीनां सखा ।
प्र श्मश्रु हर्यतो दूधोद् वि वृथा यो अदाभ्यः ॥ १० ०२६ ०७
आ ते रथस्य पूषन्न् अजा धुरं ववृत्युः ।
विश्वस्यार्थिनः सखा सनोजा अनपच्युतः ॥ १० ०२६ ०८
अस्माकम् ऊर्जा रथम् पूषा अविष्टु माहिनः ।
भुवद् वाजानां वृध इमं नः शृणवद् धवम् ॥ १० ०२६ ०९

(८५३)
असत् सु मे जरितः साभिवेगो यत् सुन्वते यजमानाय शिक्षम् ।
अनाशीर्दाम् अहम् अस्मि प्रहन्ता सत्यध्वृतं वृजिनायन्तम् आभुम् ॥ १० ०२७ ०१
यदीद् अहं युधये संनयान्य् अदेवयून् तन्वा ३ शूशुजानान् ।
अमा ते तुम्रं वृषभम् पचानि तीव्रं सुतम् पञ्चदशं नि षिञ्चम् ॥ १० ०२७ ०२
नाहं तं वेद य इति ब्रवीत्य् अदेवयून् समरणे जघन्वान् ।
यदावाख्यत् समरणम् ऋघावद् आद् इद् ध मे वृषभा प्र ब्रुवन्ति ॥ १० ०२७ ०३
यद् अज्ञातेषु वृजनेष्व् आसं विश्वे सतो मघवानो म आसन् ।

जिनामि वेत् क्षेम आ सन्तम् आभुम् प्र तं क्षिणाम् पर्वते पादगृह्य ॥ १० ०२७ ०४
न वा उ मां वृजने वारयन्ते न पर्वतासो यद् अहम् मनस्ये ।
मम स्वनात् कृधुकर्णो भयात एवेद् अनु द्यून् किरणः सम् एजात् ॥ १० ०२७ ०५
दर्शन् न्व् अत्र शृतपाँ अनिन्द्रान् बाहुक्षदः शरवे पत्यमानान् ।
घृषुं वा ये निनिदुः सखायम् अध्य् ऊ न्व् एषु पवयो ववृत्युः ॥ १० ०२७ ०६
अभूर् व् औक्षीर् व्य् उ १ आयुर् आनड् दर्षन् नु पूर्वो अपरो नु दर्षत् ।
द्वे पवस्ते परि तं न भूतो यो अस्य पारे रजसो विवेष ॥ १० ०२७ ०७
गावो यवम् प्रयुता अर्यो अक्षन् ता अपश्यं सहगोपाश् चरन्तीः ।
हवा इद् अर्यो अभितः सम् आयन् कियद् आसु स्वपतिश् छन्दयाते ॥ १० ०२७ ०८
सं यद् वयं यवसादो जनानाम् अहं यवाद उर्वज्रे अन्तः ।
अत्रा युक्तो ऽवसातारम् इच्छाद् अथो अयुक्तं युनजद् ववन्वान् ॥ १० ०२७ ०९
अत्रेद् उ मे मंससे सत्यम् उक्तं द्विपाच् च यच् चतुष्पात् संसृजानि ।
स्त्रीभिर् यो अत्र वृषणम् पृतन्याद् अयुद्धो अस्य वि भजानि वेदः ॥ १० ०२७ १०
यस्यानक्षा दुहिता जात्व् आस कस् तां विद्वाँ अभि मन्याते अन्धाम् ।
कतरो मेनिम् प्रति तम् मुचाते य ईं वहाते य ईं वा वरेयात् ॥ १० ०२७ ११
कियती योषा मर्यतो वधूयोः परिप्रीता पन्यसा वार्येण ।
भद्रा वधूर् भवति यत् सुपेशाः स्वयं सा मित्रं वनुते जने चित् ॥ १० ०२७ १२
पत्तो जगार प्रत्यञ्चम् अत्ति शीर्ष्णा शिरः प्रति दधौ वरूथम् ।
आसीन ऊर्ध्वाम् उपसि क्षिणाति न्यङ्ङ् उत्तानाम् अन्व् एति भूमिम् ॥ १० ०२७ १३
बृहन्न् अच्छायो अपलाशो अर्वा तस्थौ माता विषितो अत्ति गर्भः ।
अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुर् ऊधः ॥ १० ०२७ १४
सप्त वीरासो अधराद् उद् आयन्न् अष्टोत्तरात्तात् सम् अजग्मिरन् ते ।
नव पश्चातात् स्थिविमन्त आयन् दश प्राक् सानु वि तिरन्त्य् अश्नः ॥ १० ०२७ १५
दशानाम् एकं कपिलं समानं तं हिन्वन्ति क्रतवे पार्याय ।
गर्भम् माता सुधितं वक्षणास्व् अवेनन्तं तुषयन्ती बिभर्ति ॥ १० ०२७ १६
पीवानम् मेषम् अपचन्त वीरा न्युप्ता अक्षा अनु दीव आसन् ।
द्वा धनुम् बृहतीम् अप्स्व् अ १ न्तः पवित्रवन्ता चरतः पुनन्ता ॥ १० ०२७ १७
वि क्रोशनासो विष्वञ्च आयन् पचाति नेमो नहि पक्षद् अर्धः ।

अयम् मे देवः सविता तद् आह द्रवन्न इद् वनवत् सर्पिरन्नः ॥ १० ०२७ १८
अपश्यं ग्रामं वहमानम् आराद् अचक्रया स्वधया वर्तमानम् ।
सिषक्त्य् अर्यः प्र युगा जनानां सद्यः शिश्ना प्रमिनानो नवीयान् ॥ १० ०२७ १९
एतौ मे गावौ प्रमरस्य युक्तौ मो षु प्र सेधीर् मुहुर् इन् ममन्धि ।
आपश् चिद् अस्य वि नशन्त्य् अर्थं सूरश् च मर्क उपरो बभूवान् ॥ १० ०२७ २०
अयं यो वज्रः पुरुधा विवृत्तो ऽवः सूर्यस्य बृहतः पुरीषात् ।
श्रव इद् एना परो अन्यद् अस्ति तद् अव्यथी जरिमाणस् तरन्ति ॥ १० ०२७ २१
वृक्षे-वृक्षे नियता मीमयद् गौस् ततो वयः प्र पतान् पूरुषादः ।
अथेदं विश्वम् भुवनम् भयात इन्द्राय सुन्वद् ऋषये च शिक्षत् ॥ १० ०२७ २२
देवानाम् माने प्रथमा अतिष्ठन् कृन्तत्राद् एषाम् उपरा उद् आयन् ।
त्रयस् तपन्ति पृथिवीम् अनूपा द्वा बृबूकं वहतः पुरीषम् ॥ १० ०२७ २३
सा ते जीवातुर् उत तस्य विद्धि मा स्मैतादृग् अप गूहः समर्ये ।
आविः स्वः कृणुते गूहते बुसं स पादुर् अस्य निर्णिजो न मुच्यते ॥ १० ०२७ २४

(८५४)

विश्वो ह्य अ१न्यो अरिर् आजगाम ममेद् अह श्वशुरो ना जगाम ।
जक्षीयाद् धाना उत सोमम् पपीयात् स्वाशितः पुनर् अस्तं जगायात् ॥ १० ०२८ ०१
स रोरुवद् वृषभस् तिग्मशृङ्गो वर्ष्मन् तस्थौ वरिमन्न् आ पृथिव्याः ।
विश्वेष्व् एनं वृजनेषु पामि यो मे कुक्षी सुतसोमः पृणाति ॥ १० ०२८ ०२
अद्रिणा ते मन्दिन इन्द्र तूयान् सुन्वन्ति सोमान् पिबसि त्वम् एषाम् ।
पचन्ति ते वृषभाँ अत्सि तेषाम् पृक्षेण यन् मघवन् हूयमानः ॥ १० ०२८ ०३
इदं सु मे जरितर् आ चिकिद्धि प्रतीपं शापं नद्यो वहन्ति ।
लोपाशः सिंहम् प्रत्यञ्चम् अत्साः क्रोष्टा वराहं निर् अतक्त कक्षात् ॥ १० ०२८ ०४
कथा त एतद् अहम् आ चिकेतं गृत्सस्य पाकस् तवसो मनीषाम् ।
त्वं नो विद्वाँ ऋतुथा वि वोचो यम् अर्धं ते मघवन् क्षेम्या धूः ॥ १० ०२८ ०५
एवा हि मां तवसं वर्धयन्ति दिवश् चिन् मे बृहत उत्तरा धूः ।

पुरू सहस्रा नि शिशामि साकम् अशत्रुं हि मा जनिता जजान ॥ १० ०२८ ०६
एवा हि मां तवसं जज्ञुर् उग्रं कर्मन्-कर्मन् वृषणम् इन्द्र देवाः ।
वधीं वृत्रं वज्रेण मन्दसानो ऽप व्रजम् महिना दाशुषे वम् ॥ १० ०२८ ०७
देवास आयन् परशूँर् अबिभ्रन् वना वृश्चन्तो अभि विड्भिर् आयन् ।
नि सुद्रव १ं दधतो वक्षणासु यत्रा कृपीटम् अनु तद् दहन्ति ॥ १० ०२८ ०८
शशः क्षुरम् प्रत्यञ्चं जगाराद्रिं लोगेन व्य् अभेदम् आरात् ।
बृहन्तं चिद् ऋहते रन्धयानि वयद् वत्सो वृषभं शूशुवानः ॥ १० ०२८ ०९
सुपर्ण इत्था नखम् आ सिषायावरुद्धः परिपदं न सिंहः ।
निरुद्धश् चिन् महिषस् तर्ष्यावान् गोधा तस्मा अयथं कर्षद् एतत् ॥ १० ०२८ १०
तेभ्यो गोधा अयथं कर्षद् एतद् ये ब्रह्मणः प्रतिपीयन्त्य् अन्नैः ।
सिम उक्ष्णो ऽवसृष्टाँ अदन्ति स्वयम् बलानि तन्वः शृणानाः ॥ १० ०२८ ११
एते शमीभिः सुशमी अभूवन् ये हिन्विरे तन्व १ः सोम उक्थैः ।
नृवद् वदन्न् उप नो माहि वाजान् दिवि श्रवो दधिषे नाम वीरः ॥ १० ०२८ १२

(८५५)

वने न वा यो न्य् अधायि चाकञ् छुचिर् वां स्तोमो भुरणाव् अजीगः ।
यस्येद् इन्द्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान् ॥ १० ०२९ ०१
प्र ते अस्या उषसः प्रापरस्या नृतौ स्याम नृतमस्य नृणाम् ।
अनु त्रिशोकः शतम् आवहन् नॄन् कुत्सेन रथो यो असत् ससवान् ॥ १० ०२९ ०२
कस् ते मद इन्द्र रन्त्यो भूद् दुरो गिरो अभ्य् उ १ग्रो वि धाव ।
कद् वाहो अर्वाग् उप मा मनीषा आ त्वा शक्याम् उपमं राधो अन्नैः ॥ १० ०२९ ०३
कद् उ द्युम्नम् इन्द्र त्वावतो नॄन् कया धिया करसे कन् न आगन् ।
मित्रो न सत्य उरुगाय भृत्या अन्ने समस्य यद् असन् मनीषाः ॥ १० ०२९ ०४
प्रेरय सूरो अर्थं न पारं ये अस्य कामं जनिधा इव ग्मन् ।
गिरश् च ये ते तुविजात पूर्वीर् नर इन्द्र प्रतिशिक्षन्त्य् अन्नैः ॥ १० ०२९ ०५
मात्रे नु ते सुमिते इन्द्र पूर्वी द्यौर् मज्मना पृथिवी काव्येन ।
वराय ते घृतवन्तः सुतासः स्वाद्मन् भवन्तु पीतये मधूनि ॥ १० ०२९ ०६

आ मध्वो अस्मा असिचन्न् अमत्रम् इन्द्राय पूर्णं स हि सत्यराधाः ।
स वावृधे वरिमन्न् आ पृथिव्या अभि क्रत्वा नर्यः पौंस्यैश् च ॥ १० ०२९ ०७
व्य् आनळ् इन्द्रः पृतनाः स्वोजा आस्मै यतन्ते सख्याय पूर्वीः ।
आ स्मा रथं न पृतनासु तिष्ठ यम् भद्रया सुमत्या चोदयासे ॥ १० ०२९ ०८

(८५६)
प्र देवत्रा ब्रह्मणे गातुर् एत्व् अपो अच्छा मनसो न प्रयुक्ति ।
महीम् मित्रस्य वरुणस्य धासिम् पृथुज्रयसे रीरधा सुवृक्तिम् ॥ १० ०३० ०१
अध्वर्यवो हविष्मन्तो हि भूताच्छाप इतोशतीर् उशन्तः ।
अव याश् चष्टे अरुणः सुपर्णस् तम् आस्यध्वम् ऊर्मिम् अद्या सुहस्ताः ॥ १० ०३० ०२
अध्वर्यवो ऽप इता समुद्रम् अपां नपातं हविषा यजध्वम् ।
स वो ददद् ऊर्मिम् अद्या सुपूतं तस्मै सोमम् मधुमन्तं सुनोत ॥ १० ०३० ०३
यो अनिध्मो दीदयद् अप्स्व् अ १ न्तर् यं विप्रास ईळते अध्वरेषु ।
अपां नपान् मधुमतीर् अपो दा याभिर् इन्द्रो वावृधे वीर्याय ॥ १० ०३० ०४
याभिः सोमो मोदते हर्षते च कल्याणीभिर् युवतिभिर् न मर्यः ।
ता अध्वर्यो अपो अच्छा परेहि यद् आसिञ्चा ओषधीभिः पुनीतात् ॥ १० ०३० ०५
एवेद् यूने युवतयो नमन्त यद् ईम् उशन्न् उशतीर् एत्य् अच्छ ।
सं जानते मनसा सं चिकित्रे ऽध्वर्यवो धिषणापश् च देवीः ॥ १० ०३० ०६
यो वो वृताभ्यो अकृणोद् उलोकं यो वो मह्या अभिशस्तेर् अमुञ्चत् ।
तस्मा इन्द्राय मधुमन्तम् ऊर्मिं देवमादनम् प्र हिणोतनापः ॥ १० ०३० ०७
प्रास्मै हिनोत मधुमन्तम् ऊर्मिं गर्भो यो वः सिन्धवो मध्व उत्सः ।
घृतपृष्ठम् ईड्यम् अध्वरेष्व् आपो रेवतीः शृणुता हवम् मे ॥ १० ०३० ०८
तं सिन्धवो मत्सरम् इन्द्रपानम् ऊर्मिम् प्र हेत य उभे इयर्ति ।
मदच्युतम् औशानं नभोजाम् परि त्रितन्तुं विचरन्तम् उत्सम् ॥ १० ०३० ०९
आवर्वृततीर् अध नु द्विधारा गोषुयुधो न नियवं चरन्तीः ।
ऋषे जनित्रीर् भुवनस्य पत्नीर् अपो वन्दस्व सवृधः सयोनीः ॥ १० ०३० १०
हिनोता नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानाम् ।

ऋतस्य योगे वि ष्यध्वम् ऊधः श्रुष्टीवरीर् भूतनास्मभ्यम् आपः ॥ १० ०३० ११
आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रम् बिभृथामृतं च ।
रायश् च स्थ स्वपत्यस्य पत्नीः सरस्वती तद् गृणते वयो धात् ॥ १० ०३० १२
प्रति यद् आपो अदृश्रम् आयतीर् घृतम् पयांसि बिभ्रतीर् मधूनि ।
अध्वर्युभिर् मनसा संविदाना इन्द्राय सोमं सुषुतम् भरन्तीः ॥ १० ०३० १३
एमा अग्मन् रेवतीर् जीवधन्या अध्वर्यवः सादयता सखायः ।
नि बर्हिषि धत्तन सोम्यासो ऽपां नप्त्रा संविदानास एनाः ॥ १० ०३० १४
आग्मन्न् आप उशतीर् बर्हिर् एदं न्य् अध्वरे असदन् देवयन्तीः ।
अध्वर्यवः सुनुतेन्द्राय सोमम् अभूद् उ वः सुशका देवयज्या ॥ १० ०३० १५

(८५७)
आ नो देवानाम् उप वेतु शंसो विश्वेभिस् तुरैर् अवसे यजत्रः ।
तेभिर् वयं सुषखायो भवेम तरन्तो विश्वा दुरिता स्याम ॥ १० ०३१ ०१
परि चिन् मर्तो द्रविणम् ममन्याद् ऋतस्य पथा नमसा विवासेत् ।
उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षम् मनसा जगृभ्यात् ॥ १० ०३१ ०२
अधायि धीतिर् अससृग्रम् अंशास् तीर्थे न दस्मम् उप यन्त्य् ऊमाः ।
अभ्य् आनश्म सुवितस्य शूषं नवेदसो अमृतानाम् अभूम ॥ १० ०३१ ०३
नित्यश् चाकन्यात् स्वपतिर् दमूना यस्मा उ देवः सविता जजान ।
भगो वा गोभिर् अर्यमेम् अनज्यात् सो अस्मै चारुश् छदयद् उत स्यात् ॥ १० ०३१ ०४
इयं सा भूया उषसाम् इव क्षा यद् ध क्षुमन्तः शवसा समायन् ।
अस्य स्तुतिं जरितुर् भिक्षमाणा आ नः शग्मास उप यन्तु वाजाः ॥ १० ०३१ ०५
अस्येद् एषा सुमतिः पप्रथानाभवत् पूर्व्या भूमना गौः ।
अस्य सनीळा असुरस्य योनौ समान आ भरणे बिभ्रमाणाः ॥ १० ०३१ ०६
किं स्विद् वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
संतस्थाने अजरे इतौउती अहानि पूर्वीर् उषसो जरन्त ॥ १० ०३१ ०७
नैतावद् एना परो अन्यद् अस्त्य् उक्षा स द्यावापृथिवी बिभर्ति ।

त्वचम् पवित्रं कृणुत स्वधावान् यद् ईं सूर्यं न हरितो वहन्ति ॥ १० ०३१ ०८
स्तेगो न क्षाम् अत्य् एति पृथ्वीम् मिहं न वातो वि ह वाति भूम ।
मित्रो यत्र वरुणो अज्यमानो ऽग्निर् वने न व्य् असृष्ट शोकम् ॥ १० ०३१ ०९
स्तरीर् यत् सूत सद्यो अज्यमाना व्यथिर् अव्यथीः कृणुत स्वगोपा ।
पुत्रो यत् पूर्वः पित्रोर् जनिष्ट शम्यां गौर् जगार यद् ध पृच्छान् ॥ १० ०३१ १०
उत कण्वं नृषदः पुत्रम् आहुर् उत श्यावो धनम् आदत्त वाजी ।
प्र कृष्णाय रुशद् अपिन्वतोधर् ऋतम् अत्र नकिर् अस्मा अपीपेत् ॥ १० ०३१ ११

(८५८)
प्र सु ग्मन्ता धियसानस्य सक्षणि वरेभिर् वराँ अभि षु प्रसीदतः ।
अस्माकम् इन्द्र उभयं जुजोषति यत् सोम्यस्यान्धसो बुबोधति ॥ १० ०३२ ०१
वीन्द्र यासि दिव्यानि रोचना वि पार्थिवानि रजसा पुरुष्टुत ।
ये त्वा वहन्ति मुहुर् अध्वराँ उप ते सु वन्वन्तु वग्वनाँ अराधसः ॥ १० ०३२ ०२
तद् इन् मे छन्त्सद् वपुषो वपुष्टरम् पुत्रो यज् जानम् पित्रोर् अधीयति ।
जाया पतिं वहति वग्नुना सुमत् पुंस इद् भद्रो वहतुः परिष्कृतः ॥ १० ०३२ ०३
तद् इत् सधस्थम् अभि चारु दीधय गावो यच् छासन् वहतुं न धेनवः ।
माता यन् मन्तुर् यूथस्य पूर्व्याभि वाणस्य सप्तधातुर् इज् जनः ॥ १० ०३२ ०४
प्र वो ऽच्छा रिरिचे देवयुष् पदम् एको रुद्रेभिर् याति तुर्वणिः ।
जरा वा येष्व् अमृतेषु दावने परि व ऊमेभ्यः सिञ्चता मधु ॥ १० ०३२ ०५
निधीयमानम् अपगूळ्हम् अप्सु प्र मे देवानां व्रतपा उवाच ।
इन्द्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहम् अग्ने अनुशिष्ट आगाम् ॥ १० ०३२ ०६
अक्षेत्रवित् क्षेत्रविदं ह्य् अप्राट् स प्रैति क्षेत्रविदानुशिष्टः ।
एतद् वै भद्रम् अनुशासनस्योत स्रुतिं विन्दत्य् अञ्जसीनाम् ॥ १० ०३२ ०७
अद्येद् उ प्राणीद् अममन्न् इमाहापीवृतो अधयन् मातुर् ऊधः ।
एम् एनम् आप जरिमा युवानम् अहेळन् वसुः सुमना बभूव ॥ १० ०३२ ०८
एतानि भद्रा कलश क्रियाम कुरुश्रवण ददतो मघानि ।
दान इद् वो मघवानः सो अस्त्व् अयं च सोमो हृदि यम् बिभर्मि ॥ १० ०३२ ०९

(८५९)
प्र मा॑ युयुज्रे प्र॒युजो॒ जना॑नां॒ वहा॑मि स्म पू॒षण॒म् अन्त॑रेण ।
विश्वे॑ दे॒वासो॒ अध॒ माम् अ॑रक्षन् दु॒ःशासु॒र् आगा॒द् इति॒ घोष॑ आसीत् ॥ १० ०३३ ०१
सम् मा॑ तपन्त्य् अ॒भितः॑ स॒पत्नी॑र् इ॒व पर्श॑वः ।
नि बा॑धते॒ अम॑तिर् न॒ग्नता॒ जसु॒र् वेर् न वे॑वीयते म॒तिः ॥ १० ०३३ ०२
मूषो॒ न शि॒श्ना व्य् अदन्ति मा॒ध्य स्तो॒तारं॑ ते शतक्रतो ।
स॒कृत् सु नो॑ मघवन्न् इन्द्र मृळया॒धा॑ पि॒तेव॑ नो भव ॥ १० ०३३ ०३
कु॒रु॒श्रव॑णम् आवृ॒णि राजा॑नं॒ त्रास॑दस्यवम् ।
मंहि॑ष्ठं वा॒घता॒म् ऋषिः॑ ॥ १० ०३३ ०४
यस्य॑ मा ह॒रितो॒ रथे॑ ति॒स्रो वह॑न्ति साधु॒या ।
स्तवै॑ स॒हस्र॑दक्षिणे ॥ १० ०३३ ०५
यस्य॒ प्रस्वा॑दसो॒ गिर॑ उप॒मश्र॑वसः पि॒तुः ।
क्षेत्रं॒ न र॒ण्वम् ऊ॒चुषे॑ ॥ १० ०३३ ०६
अधि॑ पुत्रोपमश्रवो॒ नपा॑न् मित्रातिथेर् इहि ।
पि॒तुष् टे॑ अस्मि वन्दि॒ता ॥ १० ०३३ ०७
यद् ईशी॑या॒मृता॑नाम् उ॒त वा॒ मर्त्या॑नाम् ।
जीवे॒द् इन् म॒घवा॒ मम॑ ॥ १० ०३३ ०८
न दे॒वाना॒म् अति॑ व्र॒तं श॒तात्मा॑ च॒न जी॑वति ।
तथा॑ यु॒जा वि वा॑वृते ॥ १० ०३३ ०९

(८६०)
प्रा॒वे॒पा मा॑ बृह॒तो मा॑दयन्ति प्रवाते॒जा इरि॑णे॒ वर्वृ॑तानाः ।
सोम॑स्येव मौजव॒तस्य॑ भ॒क्षो वि॒भीद॑को॒ जागृ॑वि॒र् मह्य॑म् अच्छान् ॥ १० ०३४ ०१
न मा॑ मिमेथ॒ न जि॑हीळ ए॒षा शि॒वा सखि॑भ्य उ॒त मह्य॑म् आसीत् ।
अ॒क्षस्या॒हम् ए॑कप॒रस्य॑ हे॒तोर् अनु॒व्रता॒म् अप॑ जा॒याम् अ॑रोधम् ॥ १० ०३४ ०२

द्वेष्टि श्वश्रूर् अप जाया रुणद्धि न नाथितो विन्दते मर्डितारम् ।
अश्वस्येव जरतो वस्न्यस्य नाहं विन्दामि कितवस्य भोगम् ॥ १० ०३४ ०३
अन्ये जायाम् परि मृशन्त्य् अस्य यस्यागृधद् वेदने वाज्य् अ१ क्षः ।
पिता माता भ्रातर एनम् आहुर् न जानीमो नयता बद्धम् एतम् ॥ १० ०३४ ०४
यद् आदीध्ये न दविषाण्य् एभिः परायद्भ्यो ऽव हीये सखिभ्यः ।
न्युप्ताश् च बभ्रवो वाचम् अक्रतँ एमीद् एषां निष्कृतं जारिणीव ॥ १० ०३४ ०५
सभाम् एति कितवः पृच्छमानो जेष्यामीति तन्वा३ शूशुजानः ।
अक्षासो अस्य वि तिरन्ति कामम् प्रतिदीव्ने दधत आ कृतानि ॥ १० ०३४ ०६
अक्षास इद् अङ्कुशिनो नितोदिनो निकृत्वानस् तपनास् तापयिष्णवः ।
कुमारदेष्णा जयतः पुनर्हणो मध्वा सम्पृक्ताः कितवस्य बर्हणा ॥ १० ०३४ ०७
त्रिपञ्चाशः क्रीळति व्रात एषां देव इव सविता सत्यधर्मा ।
उग्रस्य चिन् मन्यवे ना नमन्ते राजा चिद् एभ्यो नम इत् कृणोति ॥ १० ०३४ ०८
नीचा वर्तन्त उपरि स्फुरन्त्य् अहस्तासो हस्तवन्तं सहन्ते ।
दिव्या अङ्गारा इरिणे न्युप्ताः शीताः सन्तो हृदयं निर् दहन्ति ॥ १० ०३४ ०९
जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित् ।
ऋणावा बिभ्यद् धनम् इच्छमानो ऽन्येषाम् अस्तम् उप नक्तम् एति ॥ १० ०३४ १०
स्त्रियं दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिम् ।
पूर्वाह्णे अश्वान् युयुजे हि बभ्रून् सो अग्नेर् अन्ते वृषलः पपाद ॥ १० ०३४ ११
यो वः सेनानीर् महतो गणस्य राजा व्रातस्य प्रथमो बभूव ।
तस्मै कृणोमि न धना रुणध्मि दशाहम् प्राचीस् तद् ऋतं वदामि ॥ १० ०३४ १२
अक्षैर् मा दीव्यः कृषिम् इत् कृषस्व वित्ते रमस्व बहु मन्यमानः ।
तत्र गावः कितव तत्र जाया तन् मे वि चष्टे सवितायम् अर्यः ॥ १० ०३४ १३
मित्रं कृणुध्वं खलु मृळता नो मा नो घोरेण चरताभि धृष्णु ।
नि वो नु मन्युर् विशताम् अरातिर् अन्यो बभ्रूणाम् प्रसितौ न्व् अस्तु ॥ १० ०३४ १४

(८६१)
अबुध्रम् उ त्य इन्द्रवन्तो अग्नयो ज्योतिर् भरन्त उषसो व्युष्टिषु ।

म॒ही द्यावा॑पृथि॒वी चे॑तता॒म् अपो॑ ऽद्या दे॒वाना॒म् अव॒ आ वृ॑णीमहे ॥ १० ०३५ ०१
दि॒वस्पृ॑थि॒व्योर् अव॒ आ वृ॑णीमहे मा॒तॄन् सिन्धू॒न् पर्व॑ताञ् छर्य॒णाव॑तः ।
अ॒ना॒गा॒स्त्वं सूर्य॑म् उ॒षास॑म् ईमहे भ॒द्रं सोमः॑ सुवा॒नो अ॒द्या कृ॑णोतु नः ॥ १० ०३५ ०२
द्यावा॑ नो अ॒द्य पृ॑थि॒वी अना॑गसो म॒ही त्रा॑येतां सु॒वि॒ताय॑ मा॒तरा॑ ।
उ॒षा उ॒च्छन्त्य् अप॑ बाधताम् अ॒घं स्व॒स्त्य् अ १॒ ग्निं स॑मिधा॒नम् ई॑महे ॥ १० ०३५ ०३
इ॒यं न॑ उ॒स्रा प्र॑थ॒मा सु॒दे॑व्यं रे॒वत् स॒निभ्यो॑ रे॒वती॒ व्य् उच्छतु ।
आ॒रे म॒न्युं दु॒र्वि॑दत्र॑स्य धीमहि स्व॒स्त्य् अ १॒ ग्निं स॑मिधा॒नम् ई॑महे ॥ १० ०३५ ०४
प्र याः सिस्र॑ते॒ सूर्य॑स्य र॒श्मिभि॒र् ज्योति॒र् भर॑न्तीर् उ॒षसो॒ व्यु॑ष्टिषु ।
भ॒द्रा नो॑ अ॒द्य श्रव॑से॒ व्य् उच्छत स्व॒स्त्य् अ १॒ ग्निं स॑मिधा॒नम् ई॑महे ॥ १० ०३५ ०५
अ॒न॒मी॒वा उ॒षस॒ आ च॑रन्तु न॒ उद् अ॒ग्नयो॑ जिहतां॒ ज्योति॑षा बृ॒हत् ।
आयु॑क्षाताम् अ॒श्विना॒ तूतु॑जिं॒ रथं॑ स्व॒स्त्य् अ १॒ ग्निं स॑मिधा॒नम् ई॑महे ॥ १० ०३५ ०६
श्रेष्ठं॑ नो अ॒द्य स॑वित॒र् वरे॑ण्यम् भा॒गम् आ सु॑व॒ स हि र॑त्न॒धा असि॑ ।
रा॒यो जनि॑त्रीं धि॒षणा॒म् उप॑ ब्रुवे स्व॒स्त्य् अ १॒ ग्निं स॑मिधा॒नम् ई॑महे ॥ १० ०३५ ०७
पिप॑र्तु मा॒ तद् ऋ॒तस्य॑ प्र॒वाच॑नं दे॒वानां॒ यन् म॑नु॒ष्या॒ ३ अम॑न्महि ।
विश्वा॒ इद् उ॒स्रा स्पळ् उद् ए॑ति॒ सूर्यः॑ स्व॒स्त्य् अ १॒ ग्निं स॑मिधा॒नम् ई॑महे ॥ १० ०३५ ०८
अ॒द्वे॒षो अ॒द्य ब॒र्हिषः॒ स्तरी॑मणि॒ ग्राव्णां॒ योगे॒ मन्म॑नः॒ साध॑ ईमहे ।
आ॒दि॒त्यानां॒ शर्म॑णि॒ स्था भु॑रण्यसि स्व॒स्त्य् अ १॒ ग्निं स॑मिधा॒नम् ई॑महे ॥ १० ०३५ ०९
आ नो॑ ब॒र्हिः स॒धमा॑दे बृ॒हद् दि॒वि दे॒वाँ ई॑ळे सा॒दया॑ स॒प्त होतॄ॑न् ।
इन्द्र॑म् मि॒त्रं वरु॑णं सा॒तये॒ भगं॑ स्व॒स्त्य् अ १॒ ग्निं स॑मिधा॒नम् ई॑महे ॥ १० ०३५ १०
त आ॑दित्या॒ आ ग॑ता स॒र्वता॑तये वृ॒धे नो॑ य॒ज्ञम् अ॑वता सजोषसः ।
बृह॒स्पति॑म् पू॒षण॑म् अ॒श्विना॒ भगं॑ स्व॒स्त्य् अ १॒ ग्निं स॑मिधा॒नम् ई॑महे ॥ १० ०३५ ११
तन् नो॑ देवा यच्छत सुप्रवा॒चनं॑ छ॒र्दिर् आ॑दित्याः सु॒भरं॑ नृ॒पाय्य॑म् ।
पश्वे॑ तो॒काय॒ तन॑याय जी॒वसे॑ स्व॒स्त्य् अ १॒ ग्निं स॑मिधा॒नम् ई॑महे ॥ १० ०३५ १२
विश्वे॑ अ॒द्य म॒रुतो॒ विश्व॑ ऊ॒ती विश्वे॑ भवन्त्व् अ॒ग्नयः॒ समि॑द्धाः ।
विश्वे॑ नो दे॒वा अव॒सा ग॑मन्तु॒ विश्व॑म् अस्तु॒ द्रवि॑णं॒ वाजो॑ अ॒स्मे ॥ १० ०३५ १३
यं दे॑वा॒सो ऽव॑थ॒ वाज॑साता॒ यं त्राय॑ध्वे॒ यम् पि॑पृ॒थात्य् अंहः॑ ।
यो वो॑ गोपी॒थे न भ॒यस्य॒ वेद॒ ते स्या॑म दे॒ववी॑तये तुरासः ॥ १० ०३५ १४

(८६२)
उषासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा ।
इन्द्रं हुवे मरुतः पर्वताँ अप आदित्यान् द्यावापृथिवी अपः स्वः ॥ १० ०३६ ०१
द्यौश् च नः पृथिवी च प्रचेतस ऋतावरी रक्षताम् अंहसो रिषः ।
मा दुर्विदत्रा निरृतिर् न ईशत तद् देवानाम् अवो अद्या वृणीमहे ॥ १० ०३६ ०२
विश्वस्मान् नो अदितिः पात्व् अंहसो माता मित्रस्य वरुणस्य रेवतः ।
स्वर्वज् ज्योतिर् अवृकं नशीमहि तद् देवानाम् अवो अद्या वृणीमहे ॥ १० ०३६ ०३
ग्रावा वदन्न् अप रक्षांसि सेधतु दुष्वप्न्यं निरृतिं विश्वम् अत्रिणम् ।
आदित्यं शर्म मरुताम् अशीमहि तद् देवानाम् अवो अद्या वृणीमहे ॥ १० ०३६ ०४
एन्द्रो बर्हिः सीदतु पिन्वताम् इळा बृहस्पतिः सामभिर् ऋक्वो अर्चतु ।
सुप्रकेतं जीवसे मन्म धीमहि तद् देवानाम् अवो अद्या वृणीमहे ॥ १० ०३६ ०५
दिविस्पृशं यज्ञम् अस्माकम् अश्विना जीराध्वरं कृणुतं सुम्नम् इष्टये ।
प्राचीनरश्मिम् आहुतं घृतेन तद् देवानाम् अवो अद्या वृणीमहे ॥ १० ०३६ ०६
उप ह्वये सुहवम् मारुतं गणम् पावकम् ऋष्वं सख्याय शम्भुवम् ।
रायस् पोषं सौश्रवसाय धीमहि तद् देवानाम् अवो अद्या वृणीमहे ॥ १० ०३६ ०७
अपाम् पेरुं जीवधन्यम् भरामहे देवाव्यं सुहवम् अध्वरश्रियम् ।
सुरश्मिं सोमम् इन्द्रियं यमीमहि तद् देवानाम् अवो अद्या वृणीमहे ॥ १० ०३६ ०८
सनेम तत् सुसनिता सनित्वभिर् वयं जीवा जीवपुत्रा अनागसः ।
ब्रह्मद्विषो विष्वग् एनो भरेरत तद् देवानाम् अवो अद्या वृणीमहे ॥ १० ०३६ ०९
ये स्था मनोर् यज्ञियास् ते शृणोतन यद् वो देवा ईमहे तद् ददातन ।
जैत्रं क्रतुं रयिमद् वीरवद् यशस् तद् देवानाम् अवो अद्या वृणीमहे ॥ १० ०३६ १०
महद् अद्य महताम् आ वृणीमहे ऽवो देवानाम् बृहताम् अनर्वणाम् ।
यथा वसु वीरजातं नशामहै तद् देवानाम् अवो अद्या वृणीमहे ॥ १० ०३६ ११
महो अग्नेः समिधानस्य शर्मण्य् अनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितुः सवीमनि तद् देवानाम् अवो अद्या वृणीमहे ॥ १० ०३६ १२
ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः ।

ते सौभगं वीरवद् गोमद् अप्नो दधातन द्रविणं चित्रम् अस्मे ॥ १० ०३६ १३
सविता पश्चातात् सविता पुरस्तात् सवितोत्तरात्तात् सविताधरात्तात् ।
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घम् आयुः ॥ १० ०३६ १४

(८६३)
नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तद् ऋतं सपर्यत ।
दूरेदृशे देवजाताय केतवे दिवस् पुत्राय सूर्याय शंसत ॥ १० ०३७ ०१
सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यत्र ततनन्न् अहानि च ।
विश्वम् अन्यन् नि विशते यद् एजति विश्वाहापो विश्वाहोद् एति सूर्यः ॥ १० ०३७ ०२
न ते अदेवः प्रदिवो नि वासते यद् एतशेभिः पतरै रथर्यसि ।
प्राचीनम् अन्यद् अनु वर्तते रज उद् अन्येन ज्योतिषा यासि सूर्य ॥ १० ०३७ ०३
येन सूर्य ज्योतिषा बाधसे तमो जगच् च विश्वम् उदियर्षि भानुना ।
तेनास्मद् विश्वाम् अनिराम् अनाहुतिम् अपामीवाम् अप दुष्वप्न्यं सुव ॥ १० ०३७ ०४
विश्वस्य हि प्रेषितो रक्षसि व्रतम् अहेळयन्न् उच्चरसि स्वधा अनु ।
यद् अद्य त्वा सूर्योपब्रवामहै तं नो देवा अनु मंसीरत क्रतुम् ॥ १० ०३७ ०५
तं नो द्यावापृथिवी तन् न आप इन्द्रः शृण्वन्तु मरुतो हवं वचः ।
मा शूने भूम सूर्यस्य संदृशि भद्रं जीवन्तो जरणाम् अशीमहि ॥ १० ०३७ ०६
विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावन्तो अनमीवा अनागसः ।
उद्यन्तं त्वा मित्रमहो दिवे-दिवे ज्योग् जीवाः प्रति पश्येम सूर्य ॥ १० ०३७ ०७
महि ज्योतिर् बिभ्रतं त्वा विचक्षण भास्वन्तं चक्षुषे-चक्षुषे मयः ।
आरोहन्तम् बृहतः पाजसस् परि वयं जीवाः प्रति पश्येम सूर्य ॥ १० ०३७ ०८
यस्य ते विश्वा भुवनानि केतुना प्र चेरते नि च विशन्ते अक्तुभिः ।
अनागास्त्वेन हरिकेश सूर्याह्नाह्ना नो वस्यसा-वस्यसोद् इहि ॥ १० ०३७ ०९
शं नो भव चक्षसा शं नो अह्ना शम् भानुना शं हिमा शं घृणेन ।
यथा शम् अध्वञ् छम् असद् दुरोणे तत् सूर्य द्रविणं धेहि चित्रम् ॥ १० ०३७ १०
अस्माकं देवा उभयाय जन्मने शर्म यच्छत द्विपदे चतुष्पदे ।
अदत् पिबद् ऊर्जयमानम् आशितं तद् अस्मे शं योर् अरपो दधातन ॥ १० ०३७ ११

यद् वो॑ देवाश् चकृ॒म जि॒ह्वया॑ गु॒रु मन॑सो वा॒ प्रयु॑ती देव॒हेळ॑नम् ।
अरा॑वा॒ यो नो॑ अ॒भि दु॑च्छुना॒य॒ते तस्मि॒न् तद् एनो॑ वसवो॒ नि धे॑तन ॥ १० ०३७ १२

(८६४)
अ॒स्मिन् न॑ इन्द्र पृत्सु॒तौ यश॑स्वति॒ शिमी॑वति॒ क्रन्द॑सि॒ प्राव॑ सा॒तये॑ ।
यत्र॒ गोषा॑ता धृषि॒तेषु॑ खा॒दिषु॒ विष्व॑क् पत॑न्ति दि॒द्यवो॑ नृ॒षाह्ये॑ ॥ १० ०३८ ०१
स नः॑ क्षु॒मन्तं॒ सद॑ने॒ व्य् ऊर्णुहि॒ गोअ॑र्णसं र॒यिम् इ॑न्द्र श्र॒वाय्य॑म् ।
स्याम॑ ते॒ जय॑तः शक्र मे॒दिनो॒ यथा॑ व॒यम् उ॒श्मसि॒ तद् व॑सो कृधि ॥ १० ०३८ ०२
यो नो॒ दास॒ आर्यो॑ वा पुरुष्टु॒तादे॑व इन्द्र यु॒धये॒ चिके॑तति ।
अ॒स्माभि॑ष् टे सु॒षहाः॑ सन्तु॒ शत्र॑व॒स् त्वया॑ व॒यं तान् व॑नुयाम संग॒मे ॥ १० ०३८ ०३
यो द॒भ्रेभि॑र् हव्यो॒ यश् च॒ भूरि॑भि॒र् यो अ॒भीके॑ वरिवो॒विन् नृ॒षाह्ये॑ ।
तं वि॑खा॒दे सस्नि॑म् अ॒द्य श्रु॒तं नर॑म् अ॒र्वाञ्च॑म् इन्द्र॒म् अव॑से करामहे ॥ १० ०३८ ०४
स्ववृ॑जं॒ हि त्वाम् अ॒हम् इ॑न्द्र शु॒श्रवा॑नानु॒दं वृ॑षभ र॒ध्रचोद॑नम् ।
प्र मु॑ञ्चस्व॒ परि॒ कु॒त्सा॒द् इ॒हा ग॑हि॒ किम् उ॒ त्वावा॑न् मु॒ष्कयो॑र् ब॒द्ध आ॑सते ॥ १० ०३८ ०५

(८६५)
यो वा॒म् परि॑ज्मा सु॒वृद् अ॑श्विना॒ रथो॑ दो॒षाम् उ॒षासो॒ हव्यो॑ ह॒विष्म॑ता ।
श॒श्व॒त्त॒मास॒स् तम् उ॑ वाम् इ॒दं व॒यम् पि॒तु॒र् न नाम॑ सु॒हवं॑ हवामहे ॥ १० ०३९ ०१
चो॒दय॑तं सू॒नृताः॑ पिन्व॑तं॒ धिय॒ उत् पुरं॑धीर् ईरय॒तं तद् उ॑श्मसि ।
य॒शस॑म् भा॒गं कृ॑णुतं नो अश्विना॒ सोमं॒ न चारु॑म् म॒घव॑त्सु नस् कृतम् ॥ १० ०३९ ०२
अ॒मा॒जुर॑श् चिद् भवथो यु॒वम् भगो॑ ऽना॒शोश् चि॑द् अवि॒तारा॑पमस्य॑ चित् ।
अ॒न्धस्य॑ चिन् नासत्या कृ॒शस्य॑ चिद् यु॒वाम् इद् आ॑हु॒र् भि॒षजा॑ रु॒तस्य॑ चित् ॥ १० ०३९ ०३
यु॒वं च्यवा॑नं स॒नयं॒ यथा॒ रथ॒म् पु॒न॒र् यु॒वानं॑ च॒रथा॑य तक्षथुः ।
निष् टौ॒ग्र्यम् ऊ॑हथु॒र् अ॒द्भ्यस् परि॒ विश्वेत् ता वां॒ सव॑नेषु प्र॒वाच्या॑ ॥ १० ०३९ ०४

पुराणा वां वीर्या प्र ब्रवा जने ऽथो हासथुर् भिषजा मयोभुवा ।
ता वां नु नव्याव् अवसे करामहे ऽयं नासत्या श्रद् अरिर् यथा दधत् ॥ १० ०३९ ०५
इयं वाम् अह्वे शृणुतम् मे अश्विना पुत्रायेव पितरा मह्यं शिक्षतम् ।
अनापिर् अज्ञा असजात्यामतिः पुरा तस्या अभिशस्तेर् अव स्पृतम् ॥ १० ०३९ ०६
युवं रथेन विमदाय शुन्ध्युवं न्य् ऊहथुः पुरुमित्रस्य योषणाम् ।
युवं हवं वध्रिमत्या अगच्छतं युवं सुषुतिं चक्रथुः पुरंधये ॥ १० ०३९ ०७
युवं विप्रस्य जरणाम् उपेयुषः पुनः कलेर् अकृणुतं युवद् वयः ।
युवं वन्दनम् ऋश्यदाद् उद् ऊपथुर् युवं सद्यो विश्पलाम् एतवे कृथः ॥ १० ०३९ ०८
युवं ह रेभं वृषणा गुहा हितम् उद् ऐरयतम् ममृवांसम् अश्विना ।
युवम् ऋबीसम् उत तप्तम् अत्रय ओमन्वन्तं चक्रथुः सप्तवध्रये ॥ १० ०३९ ०९
युवं श्वेतम् पेदवे ऽश्विनाश्वं नवभिर् वाजैर् नवती च वाजिनम् ।
चर्कृत्यं ददथुर् द्रावयत्सखम् भगं न नृभ्यो हव्यम् मयोभुवम् ॥ १० ०३९ १०
न तं राजानाव् अदिते कुतश् चन नांहो अश्नोति दुरितं नकिर् भयम् ।
यम् अश्विना सुहवा रुद्रवर्तनी पुरोरथं कृणुथः पत्न्या सह ॥ १० ०३९ ११
आ तेन यातम् मनसो जवीयसा रथं यं वाम् ऋभवश् चक्रुर् अश्विना ।
यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः ॥ १० ०३९ १२
ता वर्तिर् यातं जयुषा वि पर्वतम् अपिन्वतं शयवे धेनुम् अश्विना ।
वृकस्य चिद् वर्तिकाम् अन्तर् आस्याद् युवं शचीभिर् ग्रसिताम् अमुञ्चतम् ॥ १० ०३९ १३
एतं वां स्तोमम् अश्विनाव् अकर्मातक्षाम भृगवो न रथम् ।
न्य् अमृक्षाम योषणां न मर्ये नित्यं न सूनुं तनयं दधानाः ॥ १० ०३९ १४

(८६६)
रथं यान्तं कुह को ह वां नरा प्रति द्युमन्तं सुविताय भूषति ।
प्रातर्यावाणं विभ्वं विशे-विशे वस्तोर्-वस्तोर् वहमानं धिया शमि ॥ १० ०४० ०१
कुह स्विद् दोषा कुह वस्तोर् अश्विना कुहाभिपित्वं करतः कुहोषतुः ।
को वां शयुत्रा विधवेव देवरम् मर्यं न योषा कृणुते सधस्थ आ ॥ १० ०४० ०२

प्रा॒तर् ज॑रेथे ज॒रणे॑व॒ काप॑या॒ वस्तो॑र्-वस्तोर् यज॒ता ग॑च्छथो गृ॒हम् ।
कस्य॑ ध्व॒स्रा भ॑वथः॒ कस्य॑ वा नरा राजपु॒त्रेव॒ सव॒नाव॑ गच्छथः ॥ १० ०४० ०३
यु॒वाम् मृ॒गेव॑ वा॒रणा मृ॑ग॒ण्यवो॑ दो॒षा वस्तो॑र् ह॒विषा॒ नि ह्व॑यामहे ।
यु॒वं होत्रा॑म् ऋतु॒था जुह्व॑ते न॒रेषं॒ जना॑य वहथः शुभस् पती ॥ १० ०४० ०४
यु॒वां ह॒ घोषा॒ पर्य् अ॑श्विना य॒ती राज्ञ॑ ऊचे दुहि॒ता पृ॒च्छे वां॑ नरा ।
भू॒तम् मे॒ अह्न॑ उ॒त भू॑तम् अ॒क्तवे ऽश्वा॑वते र॒थिने॑ शक्त॒म् अर्व॑ते ॥ १० ०४० ०५
यु॒वं क॒वी ष्ठः॒ पर्य् अ॑श्विना॒ रथं॒ विशो॒ न कुत्सो॑ जरि॒तुर् न॑शायथः ।
यु॒वोर् ह॒ मक्षा॒ पर्य् अ॑श्विना॒ मध्व् आ॒सा भ॑रत निष्कृ॒तं न योष॑णा ॥ १० ०४० ०६
यु॒वं ह॑ भु॒ज्युं यु॒वम् अ॑श्विना॒ वशं॑ यु॒वं शि॒ञ्जार॑म् उ॒शना॑म् उपा॑रथुः ।
यु॒वो ररा॑वा॒ परि॑ स॒ख्यम् आ॑सते यु॒वोर् अ॒हम् अव॑सा सु॒म्नम् आ च॑के ॥ १० ०४० ०७
यु॒वं ह॑ कृ॒शं यु॒वम् अ॑श्विना श॒युं यु॒वं वि॒धन्तं॑ वि॒धवा॑म् उरुष्यथः ।
यु॒वं स॒निभ्य॑ स्त॒नय॑न्तम् अश्वि॒नाप॑ व्र॒जम् ऊर्णुथः स॒प्तास्य॑म् ॥ १० ०४० ०८
जनि॑ष्ट॒ योषा॑ प॒तय॑त् कनीन॒को वि चारु॑हन् वी॒रुधो॑ दं॒सना॒ अनु॑ ।
आस्मै॑ रीयन्ते निव॒नेव॒ सिन्ध॑वो ऽस्मा अ॒ह्ने भ॑वति॒ तत् प॑तित्व॒नम् ॥ १० ०४० ०९
जी॒वं रु॑दन्ति॒ वि म॑यन्ते अध्व॒रे दी॒र्घाम् अनु॒ प्रसि॑तिं दीधियु॒र् नरः॑ ।
वा॒मम् पि॒तृभ्यो॒ य इ॒दं स॑मेरि॒रे मयः॒ पति॑भ्यो॒ जन॑यः परि॒ष्वजे॑ ॥ १० ०४० १०
न तस्य॑ विद्म॒ तद् उ॒ षु प्र वो॑चत यु॒वा ह॒ यद् यु॑व॒त्याः क्षेति॒ योनि॑षु ।
प्रि॒योस्रि॑यस्य वृष॒भस्य॑ रे॒तिनो॑ गृ॒हं ग॑मेमाश्विना॒ तद् उ॑श्मसि ॥ १० ०४० ११
आ वा॑म् अगन् सुम॒तिर् वा॑जिनीवसू॒ न्य् अश्विना हृ॒त्सु कामा॑ अयंसत ।
अभू॑तं गो॒पा मि॑थु॒ना शु॑भस् पती प्रि॒या अ॑र्य॒म्णो दुर्याँ॑ अशीमहि ॥ १० ०४० १२
ता म॑न्दसा॒ना मनु॑षो दुरो॒ण आ ध॒त्तं र॒यिं स॒हवी॑रं वच॒स्यवे॑ ।
कृ॒तं ती॒र्थं सु॑प्रपा॒णं शु॑भस् पती स्था॒णुम् प॑थे॒ष्ठाम् अप॑ दु॒र्मतिं॑ ह॑तम् ॥ १० ०४० १३
क्व॑ स्विद् अ॒द्य क॑त॒मास्व् अ॒श्विना॑ वि॒क्षु द॒स्रा मा॑दयेते शु॒भस् पती॑ ।
क ईं॒ नि ये॑मे कत॒मस्य॑ जग्मतु॒र् विप्र॑स्य वा॒ यज॑मानस्य वा गृ॒हम् ॥ १० ०४० १४

(८६७)
स॒मा॒नम् उ॒ त्यम् पु॑रुहू॒तम् उ॒क्थ्यं१॒॑ रथं॑ त्रिच॒क्रं सव॑ना॒ गनि॑ग्मतम् ।

परिज्मानं विदथ्यं सुवृक्तिभिर् वयं व्युष्टा उषसो हवामहे ॥ १० ०४१ ०१
प्रातर्युजं नासत्याधि तिष्ठथः प्रातर्यावाणम् मधुवाहनं रथम् ।
विशो येन गच्छथो यज्वरीर् नरा कीरेश् चिद् यज्ञं होतृमन्तम् अश्विना ॥ १० ०४१ ०२
अध्वर्युं वा मधुपाणिं सुहस्त्यम् अग्निधं वा धृतदक्षं दमूनसम् ।
विप्रस्य वा यत् सवनानि गच्छथो ऽत आ यातम् मधुपेयम् अश्विना ॥ १० ०४१ ०३

(८६८)
अस्तेव सु प्रतरं लायम् अस्यन् भूषन्न् इव प्र भरा स्तोमम् अस्मै ।
वाचा विप्रास् तरत वाचम् अर्यो नि रामय जरितः सोम इन्द्रम् ॥ १० ०४२ ०१
दोहेन गाम् उप शिक्षा सखायम् प्र बोधय जरितर् जारम् इन्द्रम् ।
कोशं न पूर्णं वसुना न्यृष्टम् आ च्यावय मघदेयाय शूरम् ॥ १० ०४२ ०२
किम् अङ्ग त्वा मघवन् भोजम् आहुः शिशीहि मा शिशयं त्वा शृणोमि ।
अप्नस्वती मम धीर् अस्तु शक्र वसुविदम् भगम् इन्द्रा भरा नः ॥ १० ०४२ ०३
त्वां जना ममसत्येष्व् इन्द्र संतस्थाना वि ह्वयन्ते समीके ।
अत्रा युजं कृणुते यो हविष्मान् नासुन्वता सख्यं वष्टि शूरः ॥ १० ०४२ ०४
धनं न स्यन्द्रम् बहुलं यो अस्मै तीव्रान् सोमाँ आसुनोति प्रयस्वान् ।
तस्मै शत्रून् सुतुकान् प्रातर् अह्नो नि स्वष्ट्रान् युवति हन्ति वृत्रम् ॥ १० ०४२ ०५
यस्मिन् वयं दधिमा शंसम् इन्द्रे यः शिश्राय मघवा कामम् अस्मे ।
आराच् चित् सन् भयताम् अस्य शत्रुर् न्य् अस्मै द्युम्ना जन्या नमन्ताम् ॥ १० ०४२ ०६
आराच् छत्रुम् अप बाधस्व दूरम् उग्रो यः शम्बः पुरुहूत तेन ।
अस्मे धेहि यवमद् गोमद् इन्द्र कृधी धियं जरित्रे वाजरत्नाम् ॥ १० ०४२ ०७
प्र यम् अन्तर् वृषसवासो अग्मन् तीव्राः सोमा बहुलान्तास इन्द्रम् ।
नाह दामानम् मघवा नि यंसन् नि सुन्वते वहति भूरि वामम् ॥ १० ०४२ ०८
उत प्रहाम् अतिदीव्या जयाति कृतं यच् छ्वघ्नी विचिनोति काले ।
यो देवकामो न धना रुणद्धि सम् इत् तं राया सृजति स्वधावान् ॥ १० ०४२ ०९

गोभिष् टरेमामतिं दुरेवां यवेन क्षुधम् पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्य् अस्माकेन वृजनेना जयेम ॥ १० ०४२ १०
बृहस्पतिर् नः परि पातु पश्चाद् उतोत्तरस्माद् अधराद् अघायोः ।
इन्द्रः पुरस्ताद् उत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ १० ०४२ ११

(८६९)
अच्छा म इन्द्रम् मतयः स्वर्विदः सध्रीचीर् विश्वा उशतीर् अनूषत ।
परि ष्वजन्ते जनयो यथा पतिम् मर्यं न शुन्ध्युम् मघवानम् ऊतये ॥ १० ०४३ ०१
न घा त्वद्रिग् अप वेति मे मनस् त्वे इत् कामम् पुरुहूत शिश्रय ।
राजेव दस्म नि षदो ऽधि बर्हिष्य् अस्मिन् सु सोमे ऽवपानम् अस्तु ते ॥ १० ०४३ ०२
विषूवृद् इन्द्रो अमतेर् उत क्षुधः स इद् रायो मघवा वस्व ईशते ।
तस्येद् इमे प्रवणे सप्त सिन्धवो वयो वर्धन्ति वृषभस्य शुष्मिणः ॥ १० ०४३ ०३
वयो न वृक्षं सुपलाशम् आसदन् सोमास इन्द्रम् मन्दिनश् चमूषदः ।
प्रैषाम् अनीकं शवसा दविद्युतद् विदत् स्व१र् मनवे ज्योतिर् आर्यम् ॥ १० ०४३ ०४
कृतं न श्वघ्नी वि चिनोति देवने संवर्गं यन् मघवा सूर्यं जयत् ।
न तत् ते अन्यो अनु वीर्यं शकन् न पुराणो मघवन् नोत नूतनः ॥ १० ०४३ ०५
विशं-विशम् मघवा पर्य् अशायत जनानां धेना अवचाकशद् वृषा ।
यस्याह शक्रः सवनेषु रण्यति स तीव्रैः सोमैः सहते पृतन्यतः ॥ १० ०४३ ०६
आपो न सिन्धुम् अभि यत् समक्षरन् सोमास इन्द्रं कुल्या इव ह्रदम् ।
वर्धन्ति विप्रा महो अस्य सादने यवं न वृष्टिर् दिव्येन दानुना ॥ १० ०४३ ०७
वृषा न क्रुद्धः पतयद् रजस्स्व् आ यो अर्यपत्नीर् अकृणोद् इमा अपः ।
स सुन्वते मघवा जीरदानवे ऽविन्दज् ज्योतिर् मनवे हविष्मते ॥ १० ०४३ ०८
उज् जायताम् परशुर् ज्योतिषा सह भूया ऋतस्य सुदुघा पुराणवत् ।
वि रोचताम् अरुषो भानुना शुचिः स्व१र् ण शुक्रं शुशुचीत सत्पतिः ॥ १० ०४३ ०९
गोभिष् टरेमामतिं दुरेवां यवेन क्षुधम् पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्य् अस्माकेन वृजनेना जयेम ॥ १० ०४३ १०
बृहस्पतिर् नः परि पातु पश्चाद् उतोत्तरस्माद् अधराद् अघायोः ।

इन्द्रः पुरस्ताद् उत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ १० ०४३ ११

(८७०)
आ यात्व् इन्द्रः स्वपतिर् मदाय यो धर्मणा तूतुजानस् तुविष्मान् ।
प्रत्वक्षाणो अति विश्वा सहांस्य् अपारेण महता वृष्ण्येन ॥ १० ०४४ ०१
सुष्ठामा रथः सुयमा हरी ते मिम्यक्ष वज्रो नृपते गभस्तौ ।
शीभं राजन् सुपथा याह्य् अर्वाङ् वर्धाम ते पपुषो वृष्ण्यानि ॥ १० ०४४ ०२
एन्द्रवाहो नृपतिं वज्रबाहुम् उग्रम् उग्रासस् तविषास एनम् ।
प्रत्वक्षसं वृषभं सत्यशुष्मम् एम् अस्मत्रा सधमादो वहन्तु ॥ १० ०४४ ०३
एवा पतिं द्रोणसाचं सचेतसम् ऊर्ज स्कम्भं धरुण आ वृषायसे ।
ओजः कृष्व सं गृभाय त्वे अप्य् असो यथा केनिपानाम् इनो वृधे ॥ १० ०४४ ०४
गमन्न् अस्मे वसून्य् आ हि शंसिषं स्वाशिषम् भरम् आ याहि सोमिनः ।
त्वम् ईशिषे सास्मिन्न् आ सत्सि बर्हिष्य् अनाधृष्या तव पात्राणि धर्मणा ॥ १० ०४४ ०५
पृथक् प्रायन् प्रथमा देवहूतयो ऽकृण्वत श्रवस्यानि दुष्टरा ।
न ये शेकुर् यज्ञियां नावम् आरुहम् ईर्मैव ते न्य् अविशन्त केपयः ॥ १० ०४४ ०६
एवैवापाग् अपरे सन्तु दूढ्यो ऽश्वा येषां दुर्युज आयुयुज्रे ।
इत्था ये प्राग् उपरे सन्ति दावने पुरूणि यत्र वयुनानि भोजना ॥ १० ०४४ ०७
गिरीꣳर् अज्रान् रेजमानाꣳ अधारयद् द्यौः क्रन्दद् अन्तरिक्षाणि कोपयत् ।
समीचीने धिषणे वि ष्कभायति वृष्णः पीत्वा मद उक्थानि शंसति ॥ १० ०४४ ०८
इमम् बिभर्मि सुकृतं ते अङ्कुशं येनारुजासि मघवञ् छफारुजः ।
अस्मिन् सु ते सवने अस्त्व् ओक्यं सुत इष्टौ मघवन् बोध्य् आभगः ॥ १० ०४४ ०९
गोभिष् टरेमामतिं दुरेवां यवेन क्षुधम् पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्य् अस्माकेन वृजनेना जयेम ॥ १० ०४४ १०
बृहस्पतिर् नः परि पातु पश्चाद् उतोत्तरस्माद् अधराद् अघायोः ।
इन्द्रः पुरस्ताद् उत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ १० ०४४ ११

(८७१)

दिवस् परि प्रथमं जज्ञे अग्निर् अस्मद् द्वितीयम् परि जातवेदाः ।
तृतीयम् अप्सु नृमणा अजस्रम् इन्धान एनं जरते स्वाधीः ॥ १० ०४५ ०१
विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा ।
विद्मा ते नाम परमं गुहा यद् विद्मा तम् उत्सं यत आजगन्थ ॥ १० ०४५ ०२
समुद्रे त्वा नृमणा अप्स्व् अ १ न्तर् नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीये त्वा रजसि तस्थिवांसम् अपाम् उपस्थे महिषा अवर्धन् ॥ १० ०४५ ०३
अक्रन्दद् अग्नि स्तनयन्न् इव द्यौः क्षामा रेरिहद् वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीम् इद्धो अख्यद् आ रोदसी भानुना भात्य् अन्तः ॥ १० ०४५ ०४
श्रीणाम् उदारो धरुणो रयीणाम् मनीषाणाम् प्रार्पणः सोमगोपाः ।
वसुः सूनुः सहसो अप्सु राजा वि भात्य् अग्र उषसाम् इधानः ॥ १० ०४५ ०५
विश्वस्य केतुर् भुवनस्य गर्भ आ रोदसी अपृणाज् जायमानः ।
वीळुं चिद् अद्रिम् अभिनत् परायञ् जना यद् अग्निम् अयजन्त पञ्च ॥ १० ०४५ ०६
उशिक् पावको अरतिः सुमेधा मर्तेष्व् अग्निर् अमृतो नि धायि ।
इयर्ति धूमम् अरुषम् भरिभ्रद् उच् छुक्रेण शोचिषा द्याम् इनक्षन् ॥ १० ०४५ ०७
दृशानो रुक्म उर्विया व्य् अद्यौद् दुर्मर्षम् आयुः श्रिये रुचानः ।
अग्निर् अमृतो अभवद् वयोभिर् यद् एनं द्यौर् जनयत् सुरेताः ॥ १० ०४५ ०८
यस् ते अद्य कृणवद् भद्रशोचे ऽपूपं देव घृतवन्तम् अग्ने ।
प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ ॥ १० ०४५ ०९
आ तम् भज सौश्रवसेष्व् अग्न उक्थ-उक्थ आ भज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्य् उज् जातेन भिनदद् उज् जनित्वैः ॥ १० ०४५ १०
त्वाम् अग्ने यजमाना अनु द्यून् विश्वा वसु दधिरे वार्याणि ।
त्वया सह द्रविणम् इच्छमाना व्रजं गोमन्तम् उशिजो वि वव्रुः ॥ १० ०४५ ११
अस्ताव्य् अग्निर् नरां सुशेवो वैश्वानर ऋषिभिः सोमगोपाः ।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिम् अस्मे सुवीरम् ॥ १० ०४५ १२

(८७२)
प्र होता जातो महान् नभोविन् नृषद्वा सीदद् अपाम् उपस्थे ।
दधिर् यो धायि स ते वयांसि यन्ता वसूनि विधते तनूपाः ॥ १० ०४६ ०१
इमं विधन्तो अपां सधस्थे पशुं न नष्टम् पदैर् अनु ग्मन् ।
गुहा चतन्तम् उशिजो नमोभिर् इच्छन्तो धीरा भृगवो ऽविन्दन् ॥ १० ०४६ ०२
इमं त्रितो भूर्य् अविन्दद् इच्छन् वैभूवसो मूर्धन्य् अघ्न्यायाः ।
स शेवृधो जात आ हर्म्येषु नाभिर् युवा भवति रोचनस्य ॥ १० ०४६ ०३
मन्द्रं होतारम् उशिजो नमोभिः प्राञ्चं यज्ञं नेतारम् अध्वराणाम् ।
विशाम् अकृण्वन्न् अरतिम् पावकं हव्यवाहं दधतो मानुषेषु ॥ १० ०४६ ०४
प्र भूर् जयन्तम् महां विपोधाम् मूरा अमूरम् पुरां दर्माणम् ।
नयन्तो गर्भं वनां धियं धुर् हिरिश्मश्रुं नार्वाणं धनर्चम् ॥ १० ०४६ ०५
नि पस्त्यासु त्रित स्तभूयन् परिवीतो योनौ सीदद् अन्तः ।
अतः संगृभ्या विशां दमूना विधर्मणायन्त्रैर् ईयते नॄन् ॥ १० ०४६ ०६
अस्याजरासो दमाम् अरित्रा अर्चद्धूमासो अग्नयः पावकाः ।
श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥ १० ०४६ ०७
प्र जिह्वया भरते वेपो अग्निः प्र वयुनानि चेतसा पृथिव्याः ।
तम् आयवः शुचयन्तम् पावकम् मन्द्रं होतारं दधिरे यजिष्ठम् ॥ १० ०४६ ०८
द्यावा यम् अग्निम् पृथिवी जनिष्टाम् आपस् त्वष्टा भृगवो यं सहोभिः ।
ईळेन्यम् प्रथमम् मातरिश्वा देवास् ततक्षुर् मनवे यजत्रम् ॥ १० ०४६ ०९
यं त्वा देवा दधिरे हव्यवाहम् पुरुस्पृहो मानुषासो यजत्रम् ।
स यामन्न् अग्ने स्तुवते वयो धाः प्र देवयन् यशसः सं हि पूर्वीः ॥ १० ०४६ १०

(८७३)
जगृभ्मा ते दक्षिणम् इन्द्र हस्तं वसूयवो वसुपते वसूनाम् ।
विद्मा हि त्वा गोपतिं शूर गोनाम् अस्मभ्यं चित्रं वृषणं रयिं दाः ॥ १० ०४७ ०१
स्वायुधं स्ववसं सुनीथं चतुःसमुद्रं धरुणं रयीणाम् ।

चर्कृत्यं शंस्यम् भूरिवारम् अस्मभ्यं चित्रं वृषणं रयिं दाः ॥ १० ०४७ ०२
सुब्रह्माणं देववन्तम् बृहन्तम् उरुं गभीरम् पृथुबुध्नम् इन्द्र ।
श्रुतऋषिम् उग्रम् अभिमातिषाहम् अस्मभ्यं चित्रं वृषणं रयिं दाः ॥ १० ०४७ ०३
सनद्वाजं विप्रवीरं तरुत्रं धनस्पृतं शूशुवांसं सुदक्षम् ।
दस्युहनम् पूर्भिदम् इन्द्र सत्यम् अस्मभ्यं चित्रं वृषणं रयिं दाः ॥ १० ०४७ ०४
अश्वावन्तं रथिनं वीरवन्तं सहस्रिणं शतिनं वाजम् इन्द्र ।
भद्रव्रातं विप्रवीरं स्वर्षाम् अस्मभ्यं चित्रं वृषणं रयिं दाः ॥ १० ०४७ ०५
प्र सप्तगुम् ऋतधीतिं सुमेधाम् बृहस्पतिम् मतिर् अच्छा जिगाति ।
य आङ्गिरसो नमसोपसद्यो ऽस्मभ्यं चित्रं वृषणं रयिं दाः ॥ १० ०४७ ०६
वनीवानो मम दूतास इन्द्रं स्तोमाश् चरन्ति सुमतीर् इयानाः ।
हृदिस्पृशो मनसा वच्यमाना अस्मभ्यं चित्रं वृषणं रयिं दाः ॥ १० ०४७ ०७
यत् त्वा यामि दद्धि तन् न इन्द्र बृहन्तं क्षयम् असमं जनानाम् ।
अभि तद् द्यावापृथिवी गृणीताम् अस्मभ्यं चित्रं वृषणं रयिं दाः ॥ १० ०४७ ०८

(८७४)
अहम् भुवं वसुनः पूर्व्यस् पतिर् अहं धनानि सं जयामि शश्वतः ।
मां हवन्ते पितरं न जन्तवो ऽहं दाशुषे वि भजामि भोजनम् ॥ १० ०४८ ०१
अहम् इन्द्रो रोधो वक्षो अथर्वणस् त्रिताय गा अजनयम् अहेर् अधि ।
अहं दस्युभ्यः परि नृम्णम् आ ददे गोत्रा शिक्षन् दधीचे मातरिश्वने ॥ १० ०४८ ०२
मह्यं त्वष्टा वज्रम् अतक्षद् आयसम् मयि देवासो ऽवृजन्न् अपि क्रतुम् ।
ममानीकं सूर्यस्येव दुष्टरम् माम् आर्यन्ति कृतेन कर्त्वेन च ॥ १० ०४८ ०३
अहम् एतं गव्ययम् अश्व्यम् पशुम् पुरीषिणं सायकेना हिरण्ययम् ।
पुरू सहस्रा नि शिशामि दाशुषे यन् मा सोमास उक्थिनो अमन्दिषुः ॥ १० ०४८ ०४
अहम् इन्द्रो न परा जिग्य इद् धनं न मृत्यवे ऽव तस्थे कदा चन ।
सोमम् इन् मा सुन्वन्तो याचता वसु न मे पूरवः सख्ये रिषाथन ॥ १० ०४८ ०५
अहम् एताञ् छाश्वसतो द्वा-द्वेन्द्रं ये वज्रं युधये ऽकृण्वत ।
आह्वयमानाँ अव हन्मनाहनं दृळ्हा वदन्न् अनमस्युर् नमस्विनः ॥ १० ०४८ ०६

अभी इदम् एकम् एको अस्मि निष्षाळ् अभी द्वा किम् उ त्रयः करन्ति ।
खले न पर्षान् प्रति हन्मि भूरि किम् मा निन्दन्ति शत्रवो ऽनिन्द्राः ॥ १० ०४८ ०७
अहं गुङ्गुभ्यो अतिथिग्वम् इष्करम् इषं न वृत्रतुरं विक्षु धारयम् ।
यत् पर्णयघ्न उत वा करञ्जहे प्राहम् महे वृत्रहत्ये अशुश्रवि ॥ १० ०४८ ०८
प्र मे नमी साप्य इषे भुजे भूद् गवाम् एषे सख्या कृणुत द्विता ।
दिद्युं यद् अस्य समिथेषु मंहयम् आद् इद् एनं शंस्यम् उक्थ्यं करम् ॥ १० ०४८ ०९
प्र नेमस्मिन् ददृशे सोमो अन्तर् गोपा नेमम् आविर् अस्था कृणोति ।
स तिग्मशृङ्गं वृषभं युयुत्सन् द्रुहस् तस्थौ बहुले बद्धो अन्तः ॥ १० ०४८ १०
आदित्यानां वसूनां रुद्रियाणां देवो देवानां न मिनामि धाम ।
ते मा भद्राय शवसे ततक्षुर् अपराजितम् अस्तृतम् अषाळ्हम् ॥ १० ०४८ ११

(८७५)
अहं दां गृणते पूर्व्यं वस्व् अहम् ब्रह्म कृणवम् मह्यं वर्धनम् ।
अहम् भुवं यजमानस्य चोदितायज्वनः साक्षि विश्वस्मिन् भरे ॥ १० ०४९ ०१
मां धुर् इन्द्रं नाम देवता दिवश् च ग्मश् चापां च जन्तवः ।
अहं हरी वृषणा विव्रता रघू अहं वज्रं शवसे धृष्ण्व् आ ददे ॥ १० ०४९ ०२
अहम् अत्कं कवये शिश्नथं हथैर् अहं कुत्सम् आवम् आभिर् ऊतिभिः ।
अहं शुष्णस्य श्नथिता वधर् यमं न यो रर आर्यं नाम दस्यवे ॥ १० ०४९ ०३
अहम् पितेव वेतसूर् अभिष्टये तुग्रं कुत्साय स्मदिभं च रन्धयम् ।
अहम् भुवं यजमानस्य राजनि प्र यद् भरे तुजये न प्रियाधृषे ॥ १० ०४९ ०४
अहं रन्धयम् मृगयं श्रुतर्वणे यन् माजिहीत वयुना चनानुषक् ।
अहं वेशं नम्रम् आयवे ऽकरम् अहं सव्याय पड्गृभिम् अरन्धयम् ॥ १० ०४९ ०५
अहं स यो नववास्त्वम् बृहद्रथं सं वृत्रेव दासं वृत्रहारुजम् ।
यद् वर्धयन्तम् प्रथयन्तम् आनुषग् दूरे पारे रजसो रोचनाकरम् ॥ १० ०४९ ०६
अहं सूर्यस्य परि याम्य् आशुभिः प्रैतशेभिर् वहमान ओजसा ।
यन् मा सावो मनुष आह निर्णिज ऋधक् कृषे दासं कृत्व्यं हथैः ॥ १० ०४९ ०७
अहं सप्तहा नहुषो नहुष्टरः प्राश्रावयं शवसा तुर्वशं यदुम् ।

अ॒हं न्य् अ॒ १ न्यं सह॑सा॒ सह॑स् क॒रं नव॒ व्राध॑तो नव॒तिं च॑ वक्षयम् ॥ १० ०४९ ०८
अ॒हं स॒प्त स्र॒वतो॑ धारयं॑ वृषा॑ द्रवि॒त्न्वः पृथि॒व्यां सी॒रा अधि॑ ।
अ॒हम् अर्णां॑सि॒ वि ति॑रामि सु॒क्रतु॒र् यु॒धा वि॑दम् मन॑वे गा॒तुम् इ॒ष्टये॑ ॥ १० ०४९ ०९
अ॒हं तद् आ॑सु धारयं॑ यद् आ॑सु॒ न दे॒वश् च॒न त्वष्टाधा॑रय॒द् रुश॑त् ।
स्पा॒र्हं गवा॒म् ऊध॑स्सु व॒क्षणा॒स्व् आ मधो॒र् मधु॒ श्वात्र्यं सोम॑म् आ॒शिर॑म् ॥ १० ०४९ १०
ए॒वा दे॒वाँ इन्द्रो॑ विव्ये॒ नॄन् प्र च्यौ॒त्नेन॑ म॒घवा॑ स॒त्यरा॑धाः ।
विश्वेत् ता ते॑ हरिवः शचीवो ऽ॒भि तु॒रासः॑ स्वयशो गृणन्ति ॥ १० ०४९ ११

(८७६)
प्र वो॑ म॒हे मन्द॑माना॒यान्धसो ऽर्चा॑ वि॒श्वान॑राय विश्वा॒भुवे॑ ।
इन्द्र॑स्य॒ यस्य॒ सुम॑खं सहो॒ महि॒ श्रवो॑ नृ॒म्णं च॒ रोद॑सी सप॒र्यतः॑ ॥ १० ०५० ०१
सो चि॒न् नु सख्या॒ नर्य॑ इ॒न स्तु॒तश् च॒र्कृत्य॒ इन्द्रो माव॑ते॒ नरे॑ ।
विश्वा॑सु धू॒र्षु वा॑ज॒कृत्ये॑षु सत्पते वृ॒त्रे वा॒प्स्व् अ॒ १ भि शू॑र मन्दसे ॥ १० ०५० ०२
के ते नर॑ इन्द्र॒ ये त॑ इ॒षे ये ते॑ सु॒म्नं स॑धन्य॒ १ म् इय॑क्षान् ।
के ते॒ वाजा॑यासु॒र्या॑य हिन्वि॒रे के अ॒प्सु स्वासू॒र्वरा॑सु॒ पौंस्ये॑ ॥ १० ०५० ०३
भु॒वस् त्वम् इ॑न्द्र ब्रह्म॑णा म॒हान् भुवो॒ विश्वे॑षु॒ सव॑नेषु य॒ज्ञियः॑ ।
भुवो॒ नॄंश् च्यौ॒त्नो विश्व॑स्मि॒न् भ॑रे॒ ज्येष्ठ॑श् च॒ मन्त्रो॑ विश्वचर्षणे ॥ १० ०५० ०४
अवा॒ नु कं॑ ज्याया॑न् य॒ज्ञव॑नसो म॒हीं त॒ ओमा॑त्रां कृ॒ष्टयो॑ विदुः ।
असो॒ नु क॑म् अ॒जरो॒ वर्धा॑श् च॒ विश्वेद् ए॒ता सव॑ना तूतु॒मा कृ॑षे ॥ १० ०५० ०५
ए॒ता विश्वा॒ सव॑ना तूतु॒मा कृ॑षे स्वयं॑ सू॑नो सहसो॒ यानि॑ दधि॒षे ।
वरा॑य ते॒ पात्रं धर्म॑णे॒ तना॑ य॒ज्ञो मन्त्रो॒ ब्रह्मोद्य॑तं॒ वचः॑ ॥ १० ०५० ०६
ये ते॑ विप्र ब्रह्म॒कृतः॑ सु॒ते सचा॒ वसू॑नां च॒ वसु॑नश् च दा॒वने॑ ।
प्र ते सु॒म्नस्य॒ मन॑सा प॒था भु॑व॒न् मदे॑ सु॒तस्य॑ सो॒म्यस्यान्ध॑सः ॥ १० ०५० ०७

(८७७)
म॒हत् तद् उल्बं॒ स्थवि॑रं॒ तद् आ॑सी॒द् येनावि॑ष्टितः प्रवि॒वेशि॑था॒पः ।

विश्वा अपश्यद् बहुधा ते अग्ने जातवेदस् तन्वो देव एकः ॥ १० ०५१ ०१
को मा ददर्श कतमः स देवो यो मे तन्वो बहुधा पर्यपश्यत् ।
क्वाह मित्रावरुणा क्षियन्त्य् अग्नेर् विश्वाः समिधो देवयानीः ॥ १० ०५१ ०२
ऐच्छाम त्वा बहुधा जातवेदः प्रविष्टम् अग्ने अप्स्व् ओषधीषु ।
तं त्वा यमो अचिकेच् चित्रभानो दशान्तरुष्याद् अतिरोचमानम् ॥ १० ०५१ ०३
होत्राद् अहं वरुण बिभ्यद् आयं नेद् एव मा युनजन्न् अत्र देवाः ।
तस्य मे तन्वो बहुधा निविष्टा एतम् अर्थं न चिकेताहम् अग्निः ॥ १० ०५१ ०४
एहि मनुर् देवयुर् यज्ञकामो ऽरंकृत्या तमसि क्षेष्य् अग्ने ।
सुगान् पथः कृणुहि देवयानान् वह हव्यानि सुमनस्यमानः ॥ १० ०५१ ०५
अग्नेः पूर्वे भ्रातरो अर्थम् एतं रथीवाध्वानम् अन्व् आवरीवुः ।
तस्माद् भिया वरुण दूरम् आयं गौरो न क्षेप्नोर् अविजे ज्यायाः ॥ १० ०५१ ०६
कुर्मस् त आयुर् अजरं यद् अग्ने यथा युक्तो जातवेदो न रिष्याः ।
अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविषः सुजात ॥ १० ०५१ ०७
प्रयाजान् मे अनुयाजांश् च केवलान् ऊर्जस्वन्तं हविषो दत्त भागम् ।
घृतं चापाम् पुरुषं चौषधीनाम् अग्नेश् च दीर्घम् आयुर् अस्तु देवाः ॥ १० ०५१ ०८
तव प्रयाजा अनुयाजाश् च केवल ऊर्जस्वन्तो हविषः सन्तु भागाः ।
तवाग्ने यज्ञो ऽयम् अस्तु सर्वस् तुभ्यं नमन्ताम् प्रदिशश् चतस्रः ॥ १० ०५१ ०९

(८७८)
विश्वे देवाः शास्तन मा यथेह होता वृतो मनवै यन् निषद्य ।
प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यम् आ वो वहानि ॥ १० ०५२ ०१
अहं होता न्य् असीदं यजीयान् विश्वे देवा मरुतो मा जुनन्ति ।
अहर्-अहर् अश्विनाध्वर्यवं वाम् ब्रह्मा समिद् भवति साहुतिर् वाम् ॥ १० ०५२ ०२
अयं यो होता किर् उ स यमस्य कम् अप्य् ऊहे यत् समञ्जन्ति देवाः ।
अहर्-अहर् जायते मासि-मास्य् अथा देवा दधिरे हव्यवाहम् ॥ १० ०५२ ०३
मां देवा दधिरे हव्यवाहम् अपम्लुक्तम् बहु कृच्छ्रा चरन्तम् ।
अग्निर् विद्वान् यज्ञं नः कल्पयाति पञ्चयामं त्रिवृतं सप्ततन्तुम् ॥ १० ०५२ ०४

आ वो॑ यक्ष्य् अमृत॒त्वं सु॒वीरं॒ यथा॑ वो देवा॒ वरि॑वः॒ करा॑णि ।
आ बा॒ह्वोर् वज्र॒म् इन्द्र॑स्य धेया॒म् अथे॒मा विश्वाः॒ पृत॑ना जयाति ॥ १० ०५२ ०५
त्रीणि॑ श॒ता त्री स॒हस्रा॒ण्य् अ॒ग्निं त्रिं॒शच् च॑ दे॒वा नव॑ चासपर्यन् ।
औक्ष॑न् घृ॒तैर् अस्तृ॑णन् ब॒र्हिर् अ॑स्मा॒ आद् इद् धोता॑रं॒ न्य् असादयन्त ॥ १० ०५२ ०६

(८७१)
यम् ऐच्छा॑म॒ मन॑सा॒ सो ऽयम् आगा॑द् य॒ज्ञस्य॑ वि॒द्वान् परु॑षश् चिकि॒त्वान् ।
स नो॑ यक्षद् दे॒वता॑ता॒ यजी॑यान् नि हि षत्स॒द् अन्त॑रः॒ पूर्वो॑ अ॒स्मत् ॥ १० ०५३ ०१
अरा॑धि॒ होता॑ नि॒षदा॒ यजी॑यान् अ॒भि प्रयां॑सि॒ सुधि॑तानि॒ हि ख्यत् ।
यजा॑महै य॒ज्ञिया॒न् हन्त॑ दे॒वाँ ईळा॑महा॒ ईड्याँ॒ आज्ये॑न ॥ १० ०५३ ०२
सा॒ध्वीम् अ॑कर् दे॒ववी॑तिं नो अ॒द्य य॒ज्ञस्य॑ जि॒ह्वाम् अ॑विदाम॒ गुह्या॑म् ।
स आयु॒र् आगा॑त् सु॒रभि॒र् वसा॑नो भ॒द्राम् अ॑कर् दे॒वहू॑तिं नो अ॒द्य ॥ १० ०५३ ०३
तद् अ॒द्य वा॒चः प्र॑थ॒मम् म॑सीय॒ येनासु॑राँ अ॒भि दे॒वा असा॑म ।
ऊर्जा॑द उ॒त य॑ज्ञियासः॒ पञ्च॑ जना॒ मम॑ हो॒त्रं जु॑षध्वम् ॥ १० ०५३ ०४
पञ्च॒ जना॒ मम॑ हो॒त्रं जु॑षन्तां॒ गोजा॑ता उ॒त ये य॒ज्ञिया॑सः ।
पृ॒थिवी नः॒ पार्थि॑वात् पा॒त्व् अंह॑सो ऽन्तरि॑क्षं दि॒व्यात् पा॑त्व् अ॒स्मान् ॥ १० ०५३ ०५
तन्तुं॑ त॒न्वन् रज॑सो भा॒नुम् अन्व् इ॑हि॒ ज्योति॑ष्मतः प॒थो र॑क्ष धि॒या कृ॒तान् ।
अ॒नु॒ल्ब॒णं व॑यत॒ जोगु॑वा॒म् अपो॒ मनु॑र् भव ज॒नया॒ दैव्यं॒ जन॑म् ॥ १० ०५३ ०६
अ॒क्षा॒नहो॑ नह्यतनो॒त सो॑म्या॒ इष्कृ॑णुध्वं र॒शना ओत पिं॑शत ।
अ॒ष्टाव॑न्धुरं वहता॒भितो॒ रथं॒ येन॑ दे॒वासो॒ अन॑यन्न् अ॒भि प्रि॒यम् ॥ १० ०५३ ०७
अश्म॑न्वती रीयते॒ सं र॑भध्व॒म् उत् ति॑ष्ठत॒ प्र त॑रता सखायः ।
अत्रा॑ जहाम॒ ये अस॒न्न् अशे॑वाः शि॒वान् व॒यम् उत् त॑रेमा॒भि वाजा॑न् ॥ १० ०५३ ०८
त्वष्टा॑ मा॒या वे॑द् अ॒पसा॑म् अ॒पस्त॑मो॒ बिभ्र॒त् पात्रा॑ देव॒पाना॑नि॒ शंत॑मा ।
शिशी॑ते नू॒नम् प॑र॒शुं स्वा॑य॒सं येन॑ वृ॒श्चाद् एत॑शो॒ ब्रह्म॑ण॒स् पतिः॑ ॥ १० ०५३ ०९
स॒तो नू॒नं क॑वयः॒ सं शि॑शीत॒ वाशी॑भि॒र् याभि॑र् अ॒मृता॑य॒ तक्ष॑थ ।
वि॒द्वांसः॑ प॒दा गुह्या॑नि कर्त॒न येन॑ दे॒वासो॑ अमृत॒त्वम् आ॑न॒शुः ॥ १० ०५३ १०
गर्भे॒ योषा॒म् अद॑धुर् व॒त्सम् आ॒सन्य् अ॑पीच्येन॒ मन॑सो॒त जि॒ह्वया॑ ।

स वि॒श्वाहा॑ सु॒मना॑ यो॒ग्या अ॒भि सि॑षा॒सनि॑र् वनते का॒र इज् जिति॑म् ॥ १० ०५३ ११

तां सु ते॑ की॒र्तिम् म॑घवन् महि॒त्वा यत् त्वा॑ भी॒ते रोद॑सी॒ अह्व॑येताम् ।
प्रावो॑ दे॒वाꣳआति॑रो॒ दास॒म् ओजः॑ प्र॒जायै॑ त्व॒स्यै यद् अशि॑क्ष इन्द्र ॥ १० ०५४ ०१
यद् अच॑रस् त॒न्वा वावृधा॒नो बला॑नीन्द्र प्रब्रुवा॒णो जने॑षु ।
मा॒येत् सा ते॒ यानि॑ यु॒द्धान्य् आ॒हुर् नाद्य शत्रुं॑ न॒नु पु॒रा वि॑वित्से ॥ १० ०५४ ०२
क उ॒ नु ते॑ महि॒मनः॑ समस्या॒स्मत् पूर्व॑ ऋष॒यो ऽन्त॑म् आपुः ।
यन् मा॒तरं॑ च पि॒तरं॑ च सा॒कम् अज॑नयथास् त॒न्व१ः स्वायाः॑ ॥ १० ०५४ ०३
च॒त्वारि॑ ते असु॒र्या॑णि॒ नामादा॑भ्यानि महि॒षस्य॑ सन्ति ।
त्वम् अ॒ङ्ग तानि॒ विश्वा॑नि वित्से॒ येभिः॒ कर्मा॑णि मघवञ् च॒कर्थ॑ ॥ १० ०५४ ०४
त्वं विश्वा॑ दधिषे॒ केव॑लानि॒ यान्य् आ॒विर् या च॒ गुहा॒ वसू॑नि ।
काम॒म् इन् मे॑ मघव॒न् मा वि ता॑री॒स् त्वम् आ॑ज्ञा॒ता त्वम् इ॑न्द्रासि दा॒ता ॥ १० ०५४
०५
यो अद॑धा॒ज् ज्योति॑षि॒ ज्योति॑र् अ॒न्तर् यो अ॑सृ॒जन् मधु॑ना॒ सम् मधू॑नि ।
अध॑ प्रि॒यं शू॒षम् इन्द्रा॑य॒ मन्म॑ ब्रह्म॒कृतो॑ बृ॒हदु॑क्थाद् अवाचि ॥ १० ०५४ ०६

(८८०)
दू॒रे तन् नाम॒ गुह्य॑म् परा॒चैर् यत् त्वा॑ भी॒ते अह्व॑येतां वयो॒धै ।
उद् अ॑स्तभ्नाः पृथि॒वीं द्याम् अ॒भीके॒ भ्रातुः॑ पु॒त्रान् म॑घवन् तित्विषा॒णः ॥ १० ०५५ ०१
म॒हत् तन् नाम॒ गुह्य॑म् पुरु॒स्पृग् येन॑ भू॒तं ज॒नयो॒ येन॒ भव्य॑म् ।
प्र॒त्नं जा॒तं ज्योति॒र् यद् अ॑स्य प्रि॒यम् प्रि॒याः सम् अ॑विशन्त॒ पञ्च॑ ॥ १० ०५५ ०२
आ रोद॑सी अपृणा॒द् ओत मध्य॑म् पञ्च॑ दे॒वाꣳ ऋ॑तु॒शः स॒प्त-स॑प्त ।
च॒तुस्त्रिं॑शता पुरु॒धा वि च॑ष्टे॒ सरू॑पेण॒ ज्योति॑षा॒ विव्र॑तेन ॥ १० ०५५ ०३
यद् उ॑ष औच्छः॑ प्रथ॒मा वि॒भाना॒म् अज॑नयो॒ येन॑ पु॒ष्टस्य॑ पु॒ष्टम् ।
यत् ते॑ जामि॒त्वम् अव॑र॒म् पर॑स्या म॒हन् म॑हत्या अ॑सुर॒त्वम् एक॑म् ॥ १० ०५५ ०४
वि॒धुं द॑द्रा॒णं सम॑ने बहू॒नां युवा॑नं॒ सन्त॑म् पलि॒तो ज॑गार ।

देवस्य पश्य काव्यम् महित्वाद्या ममार स ह्यः सम् आन ॥ १० ०५५ ०५
शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनाद् अनीळः ।
यच् चिकेत सत्यम् इत् तन् न मोघं वसु स्पार्हम् उत जेतोत दाता ॥ १० ०५५ ०६
ऐभिर् ददे वृष्ण्या पौंस्यानि येभिर् औक्षद् वृत्रहत्याय वज्री ।
ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्मम् उदजायन्त देवाः ॥ १० ०५५ ०७
युजा कर्माणि जनयन् विश्वौजा अशस्तिहा विश्वमनास् तुराषाट् ।
पीत्वी सोमस्य दिव आ वृधानः शूरो निर् युधाधमद् दस्यून् ॥ १० ०५५ ०८

(८८१)
इदं त एकम् पर ऊं त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशने तन्व १ श् चारुर् एधि प्रियो देवानाम् परमे जनित्रे ॥ १० ०५६ ०१
तनूष् टे वाजिन् तन्व १ं नयन्ती वामम् अस्मभ्यं धातु शर्म तुभ्यम् ।
अह्रुतो महो धरुणाय देवान् दिवीव ज्योतिः स्वम् आ मिमीयाः ॥ १० ०५६ ०२
वाज्य् असि वाजिनेना सुवेनीः सुवित स्तोमं सुवितो दिवं गाः ।
सुवितो धर्म प्रथमानु सत्या सुवितो देवान् सुवितो ऽनु पत्म ॥ १० ०५६ ०३
महिम्न एषाम् पितरश् चनेशिरे देवा देवेष्व् अदधुर् अपि क्रतुम् ।
सम् अविव्यचुर् उत यान्य् अत्विषुर् ऐषां तनूषु नि विविशुः पुनः ॥ १० ०५६ ०४
सहोभिर् विश्वम् परि चक्रमू रजः पूर्वा धामान्य् अमिता मिमानाः ।
तनूषु विश्वा भुवना नि येमिरे प्रासारयन्त पुरुध प्रजा अनु ॥ १० ०५६ ०५
द्विधा सूनवो ऽसुरं स्वर्विदम् आस्थापयन्त तृतीयेन कर्मणा ।
स्वाम् प्रजाम् पितरः पित्र्यं सह आवरेष्व् अदधुस् तन्तुम् आततम् ॥ १० ०५६ ०६
नावा न क्षोदः प्रदिशः पृथिव्याः स्वस्तिभिर् अति दुर्गाणि विश्वा ।
स्वाम् प्रजाम् बृहदुक्थो महित्वावरेष्व् अदधाद् आ परेषु ॥ १० ०५६ ०७

(८८२)
मा प्र गाम पथो वयम् मा यज्ञाद् इन्द्र सोमिनः ।

मान्त स्थुर् नो अरातयः ॥ १० ०५७ ०१
यो यज्ञस्य प्रसाधनस् तन्तुर् देवेष्व् आततः ।
तम् आहुतं नशीमहि ॥ १० ०५७ ०२
मनो न्व् आ हुवामहे नाराशंसेन सोमेन ।
पितॄणां च मन्मभिः ॥ १० ०५७ ०३
आ त एतु मनः पुनः क्रत्वे दक्षाय जीवसे ।
ज्योक् च सूर्यं दृशे ॥ १० ०५७ ०४
पुनर् नः पितरो मनो ददातु दैव्यो जनः ।
जीवं व्रातं सचेमहि ॥ १० ०५७ ०५
वयं सोम व्रते तव मनस् तनूषु बिभ्रतः ।
प्रजावन्तः सचेमहि ॥ १० ०५७ ०६

(८८३)
यत् ते यमं वैवस्वतम् मनो जगाम दूरकम् ।
तत् त आ वर्तयामसीह क्षयाय जीवसे ॥ १० ०५८ ०१
यत् ते दिवं यत् पृथिवीम् मनो जगाम दूरकम् ।
तत् त आ वर्तयामसीह क्षयाय जीवसे ॥ १० ०५८ ०२
यत् ते भूमिं चतुर्भृष्टिम् मनो जगाम दूरकम् ।
तत् त आ वर्तयामसीह क्षयाय जीवसे ॥ १० ०५८ ०३
यत् ते चतस्रः प्रदिशो मनो जगाम दूरकम् ।
तत् त आ वर्तयामसीह क्षयाय जीवसे ॥ १० ०५८ ०४
यत् ते समुद्रम् अर्णवम् मनो जगाम दूरकम् ।
तत् त आ वर्तयामसीह क्षयाय जीवसे ॥ १० ०५८ ०५
यत् ते मरीचीः प्रवतो मनो जगाम दूरकम् ।
तत् त आ वर्तयामसीह क्षयाय जीवसे ॥ १० ०५८ ०६
यत् ते अपो यद् ओषधीर् मनो जगाम दूरकम् ।
तत् त आ वर्तयामसीह क्षयाय जीवसे ॥ १० ०५८ ०७

यत् ते सूर्यं यद् उषसम् मनो जगाम दूरकम् ।
तत् त आ वर्तयामसीह क्षयाय जीवसे ॥ १० ०५८ ०८
यत् ते पर्वतान् बृहतो मनो जगाम दूरकम् ।
तत् त आ वर्तयामसीह क्षयाय जीवसे ॥ १० ०५८ ०९
यत् ते विश्वम् इदं जगन् मनो जगाम दूरकम् ।
तत् त आ वर्तयामसीह क्षयाय जीवसे ॥ १० ०५८ १०
यत् ते पराः परावतो मनो जगाम दूरकम् ।
तत् त आ वर्तयामसीह क्षयाय जीवसे ॥ १० ०५८ ११
यत् ते भूतं च भव्यं च मनो जगाम दूरकम् ।
तत् त आ वर्तयामसीह क्षयाय जीवसे ॥ १० ०५८ १२

(८८४)
प्र तार्य् आयुः प्रतरं नवीय स्थातारेव क्रतुमता रथस्य ।
अध च्यवान उत् तवीत्य् अर्थम् परातरं सु निरृतिर् जिहीताम् ॥ १० ०५९ ०१
सामन् नु राये निधिमन् न्व् अन्नं करामहे सु पुरुध श्रवांसि ।
ता नो विश्वानि जरिता ममत्तु परातरं सु निरृतिर् जिहीताम् ॥ १० ०५९ ०२
अभी ष्व् अ१र्यः पौंस्यैर् भवेम द्यौर् न भूमिं गिरयो नाज्रान् ।
ता नो विश्वानि जरिता चिकेत परातरं सु निरृतिर् जिहीताम् ॥ १० ०५९ ०३
मो षु णः सोम मृत्यवे परा दाः पश्येम नु सूर्यम् उच्चरन्तम् ।
द्युभिर् हितो जरिमा सू नो अस्तु परातरं सु निरृतिर् जिहीताम् ॥ १० ०५९ ०४
असुनीते मनो अस्मासु धारय जीवातवे सु प्र तिरा न आयुः ।
रारन्धि नः सूर्यस्य संदृशि घृतेन त्वं तन्वं वर्धयस्व ॥ १० ०५९ ०५
असुनीते पुनर् अस्मासु चक्षुः पुनः प्राणम् इह नो धेहि भोगम् ।
ज्योक् पश्येम सूर्यम् उच्चरन्तम् अनुमते मृळया नः स्वस्ति ॥ १० ०५९ ०६
पुनर् नो असुम् पृथिवी ददातु पुनर् द्यौर् देवी पुनर् अन्तरिक्षम् ।
पुनर् नः सोमस् तन्वं ददातु पुनः पूषा पथ्या३ं या स्वस्तिः ॥ १० ०५९ ०७
शं रोदसी सुबन्धवे यह्वी ऋतस्य मातरा ।

भरताम् अप यद् रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥ १० ०५९ ०८
अव द्वके अव त्रिका दिवश् चरन्ति भेषजा ।
क्षमा चरिष्णव् एककम् भरताम् अप यद् रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं च
नाममत् ॥ १० ०५९ ०९
सम् इन्द्रेरय गाम् अनड्वाहं य आवहद् उशीनराण्या अनः ।
भरताम् अप यद् रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥ १० ०५९ १०

(८८५)
आ जनं त्वेषसंदृशम् माहीनानाम् उपस्तुतम् ।
अगन्म बिभ्रतो नमः ॥ १० ०६० ०१
असमातिं नितोशनं त्वेषं निययिनं रथम् ।
भजेरथस्य सत्पतिम् ॥ १० ०६० ०२
यो जनान् महिषाँइवातितस्थौ पवीरवान् ।
उतापवीरवान् युधा ॥ १० ०६० ०३
यस्येक्ष्वाकुर् उप व्रते रेवान् मराय्य् एधते ।
दिवीव पञ्च कृष्टयः ॥ १० ०६० ०४
इन्द्र क्षत्रासमातिषु रथप्रोष्ठेषु धारय ।
दिवीव सूर्यं दृशे ॥ १० ०६० ०५
अगस्त्यस्य नद्भ्यः सप्ती युनक्षि रोहिता ।
पणीन् न्य् अक्रमीर् अभि विश्वान् राजन्न् अराधसः ॥ १० ०६० ०६
अयम् मातायम् पितायं जीवातुर् आगमत् ।
इदं तव प्रसर्पणं सुबन्धव् एहि निर् इहि ॥ १० ०६० ०७
यथा युगं वरत्रया नह्यन्ति धरुणाय कम् ।
एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥ १० ०६० ०८
यथेयम् पृथिवी मही दाधारेमान् वनस्पतीन् ।
एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥ १० ०६० ०९
यमाद् अहं वैवस्वतात् सुबन्धोर् मन आभरम् ।

जीवातवे न मृत्यवे ऽथो अरिष्टतातये ॥ १० ०६० १०
न्य१ग् वातो ऽव वाति न्यक् तपति सूर्यः ।
नीचीनम् अघ्न्या दुहे न्यग् भवतु ते रपः ॥ १० ०६० ११
अयम् मे हस्तो भगवान् अयम् मे भगवत्तरः ।
अयम् मे विश्वभेषजो ऽयं शिवाभिमर्शनः ॥ १० ०६० १२

(८८६)
इदम् इत्था रौद्रं गूर्तवचा ब्रह्म क्रत्वा शच्याम् अन्तर् आजौ ।
क्राणा यद् अस्य पितरा मंहनेष्ठाः पर्षत् पक्थे अहन्न् आ सप्त होतॄन् ॥ १० ०६१ ०१
स इद् दानाय दभ्याय वन्वञ् च्यवानः सूदैर् अमिमीत वेदिम् ।
तूर्वयाणो गूर्तवचस्तमः क्षोदो न रेत इतऊति सिञ्चत् ॥ १० ०६१ ०२
मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता ।
आ यः शर्याभिस् तुविनृम्णो अस्याश्रीणीतादिशं गभस्तौ ॥ १० ०६१ ०३
कृष्णा यद् गोष्व् अरुणीषु सीदद् दिवो नपाताश्विना हुवे वाम् ।
वीतम् मे यज्ञम् आ गतम् मे अन्नं ववन्वांसा नेषम् अस्मृतध्रू ॥ १० ०६१ ०४
प्रथिष्ट यस्य वीरकर्मम् इष्णद् अनुष्ठितं नु नर्यो अपौहत् ।
पुनस् तद् आ वृहति यत् कनाया दुहितुर् आ अनुभृतम् अनर्वा ॥ १० ०६१ ०५
मध्या यत् कर्त्वम् अभवद् अभीके कामं कृण्वाने पितरि युवत्याम् ।
मनानग् रेतो जहतुर् वियन्ता सानौ निषिक्तं सुकृतस्य योनौ ॥ १० ०६१ ०६
पिता यत् स्वां दुहितरम् अधिष्कन् क्ष्मया रेतः संजग्मानो नि षिञ्चत् ।
स्वाध्यो ऽजनयन् ब्रह्म देवा वास्तोष् पतिं व्रतपां निर् अतक्षन् ॥ १० ०६१ ०७
स ई वृषा न फेनम् अस्यद् आजौ स्मद् आ परैद् अप दभ्रचेताः ।
सरत् पदा न दक्षिणा परावृङ् न ता नु मे पृशन्यो जगृभ्रे ॥ १० ०६१ ०८
मक्षू न वह्निः प्रजाया उपब्दिर् अग्निं न नग्न उप सीदद् ऊधः ।
सनितेध्मं सनितोत वाजं स धर्ता जज्ञि सहसा यवीयुत् ॥ १० ०६१ ०९
मक्षू कनायाः सख्यं नवग्वा ऋतं वदन्त ऋतयुक्तिम् अग्मन् ।
द्विबर्हसो य उप गोपम् आगुर् अदक्षिणासो अच्युता दुदुक्षन् ॥ १० ०६१ १०

मक्षू कनायाः सख्यं नवीयो राधो न रेत ऋतम् इत् तुरण्यन् ।
शुचि यत् ते रेक्ण आयजन्त सबर्दुघायाः पय उस्रियायाः ॥ १० ०६१ ११
पश्वा यत् पश्चा वियुता बुधन्तेति ब्रवीति वक्तरी रराणः ।
वसोर् वसुत्वा कारवो ऽनेहा विश्वं विवेष्टि द्रविणम् उप क्षु ॥ १० ०६१ १२
तद् इन् न्व् अस्य परिषद्वानो अग्मन् पुरू सदन्तो नार्षदम् बिभित्सन् ।
वि शुष्णस्य संग्रथितम् अनर्वा विदत् पुरुप्रजातस्य गुहा यत् ॥ १० ०६१ १३
भर्गो ह नामोत यस्य देवाः स्व१र् ण ये त्रिषधस्थे निषेदुः ।
अग्निर् ह नामोत जातवेदाः श्रुधी नो होतर् ऋतस्य होताध्रुक् ॥ १० ०६१ १४
उत त्या मे रौद्राव् अर्चिमन्ता नासत्याव् इन्द्र गूर्तये यजध्यै ।
मनुष्वद् वृक्तबर्हिषे रराणा मन्दू हितप्रयसा विक्षु यज्यू ॥ १० ०६१ १५
अयं स्तुतो राजा वन्दि वेधा अपश् च विप्रस् तरति स्वसेतुः ।
स कक्षीवन्तं रेजयत् सो अग्निं नेमिं न चक्रम् अर्वतो रघुद्रु ॥ १० ०६१ १६
स द्विबन्धुर् वैतरणो यष्टा सबर्धुं धेनुम् अस्वं दुहध्यै ।
सं यन् मित्रावरुणा वृञ्ज उक्थैर् ज्येष्ठेभिर् अर्यमणं वरूथैः ॥ १० ०६१ १७
तद्बन्धुः सूरिर् दिवि ते धियंधा नाभानेदिष्ठो रपति प्र वेनन् ।
सा नो नाभिः परमास्य वा घाहं तत् पश्चा कतिथश् चिद् आस ॥ १० ०६१ १८
इयम् मे नाभिर् इह मे सधस्थम् इमे मे देवा अयम् अस्मि सर्वः ।
द्विजा अह प्रथमजा ऋतस्येदं धेनुर् अदुहज् जायमाना ॥ १० ०६१ १९
अधासु मन्द्रो अरतिर् विभावाव स्यति द्विवर्तनिर् वनेषाट् ।
ऊर्ध्वा यच् छ्रेणिर् न शिशुर् दन् मक्षू स्थिरं शेवृधं सूत माता ॥ १० ०६१ २०
अधा गाव उपमातिं कनाया अनु श्वान्तस्य कस्य चित् परेयुः ।
श्रुधि त्वं सुद्रविणो नस् त्वं याळ् आश्वघ्नस्य वावृधे सूनृताभिः ॥ १० ०६१ २१
अध त्वम् इन्द्र विद्ध्य् अ१स्मान् महो राये नृपते वज्रबाहुः ।
रक्षा च नो मघोनः पाहि सूरीन् अनेहसस् ते हरिवो अभिष्टौ ॥ १० ०६१ २२
अध यद् राजाना गविष्टौ सरत् सरण्युः कारवे जरण्युः ।
विप्रः प्रेष्ठः स ह्य् एषाम् बभूव परा च वक्षद् उत पर्षद् एनान् ॥ १० ०६१ २३
अधा न्व् अस्य जेन्यस्य पुष्टौ वृथा रेभन्त ईमहे तद् ऊ नु ।
सरण्युर् अस्य सूनुर् अश्वो विप्रश् चासि श्रवसश् च सातौ ॥ १० ०६१ २४

युवोर् यदि सख्यायास्मे शर्धाय स्तोमं जुजुषे नमस्वान् ।
विश्वत्र यस्मिन्न् आ गिरः समीचीः पूर्वीव गातुर् दाशत् सूनृतायै ॥ १० ०६१ २५
स गृणानो अद्भिर् देववान् इति सुबन्धुर् नमसा सूक्तैः ।
वर्धद् उक्थैर् वचोभिर् आ हि नूनं व्य् अध्वैति पयस उस्रियायाः ॥ १० ०६१ २६
त ऊ षु णो महो यजत्रा भूत देवास ऊतये सजोषाः ।
ये वाजाँ अनयता वियन्तो ये स्था निचेतारो अमूराः ॥ १० ०६१ २७

(८८७)
ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यम् अमृतत्वम् आनश ।
तेभ्यो भद्रम् अङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥ १० ०६२ ०१
य उदाजन् पितरो गोमयं वस्व् ऋतेनाभिन्दन् परिवत्सरे वलम् ।
दीर्घायुत्वम् अङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥ १० ०६२ ०२
य ऋतेन सूर्यम् आरोहयन् दिव्य् अप्रथयन् पृथिवीम् मातरं वि ।
सुप्रजास्त्वम् अङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥ १० ०६२ ०३
अयं नाभा वदति वल्गु वो गृहे देवपुत्रा ऋषयस् तच् छृणोतन ।
सुब्रह्मण्यम् अङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥ १० ०६२ ०४
विरूपास इद् ऋषयस् त इद् गम्भीरवेपसः ।
ते अङ्गिरसः सूनवस् ते अग्नेः परि जज्ञिरे ॥ १० ०६२ ०५
ये अग्नेः परि जज्ञिरे विरूपासो दिवस् परि ।
नवग्वो नु दशग्वो अङ्गिरस्तमो सचा देवेषु मंहते ॥ १० ०६२ ०६
इन्द्रेण युजा निः सृजन्त वाघतो व्रजं गोमन्तम् अश्विनम् ।
सहस्रम् मे ददतो अष्टकर्ण्य १ : श्रवो देवेष्व् अक्रत ॥ १० ०६२ ०७
प्र नूनं जायताम् अयम् मनुस् तोक्मेव रोहतु ।
यः सहस्रं शताश्वं सद्यो दानाय मंहते ॥ १० ०६२ ०८
न तम् अश्नोति कश् चन दिव इव सान्व् आरभम् ।
सावर्ण्यस्य दक्षिणा वि सिन्धुर् इव पप्रथे ॥ १० ०६२ ०९
उत दासा परिविषे स्मद्दिष्टी गोपरीणसा ।
यदुस् तुर्वश् च मामहे ॥ १० ०६२ १०

सहस्रदा ग्रामणीर् मा रिषन् मनुः सूर्येणास्य यतमानैतु दक्षिणा ।
सावर्णेर् देवाः प्र तिरन्त्व् आयुर् यस्मिन्न् अश्रान्ता असनाम वाजम् ॥ १० ०६२ ११

(८८८)
परावतो ये दिधिषन्त आप्यम् मनुप्रीतासो जनिमा विवस्वतः ।
ययातेर् ये नहुष्यस्य बर्हिषि देवा आसते ते अधि ब्रुवन्तु नः ॥ १० ०६३ ०१
विश्वा हि वो नमस्यानि वन्द्या नामानि देवा उत यज्ञियानि वः ।
ये स्थ जाता अदितेर् अद्भ्यस् परि ये पृथिव्यास् ते म इह श्रुता हवम् ॥ १० ०६३ ०२
येभ्यो माता मधुमत् पिन्वते पयः पीयूषं द्यौर् अदितिर् अद्रिबर्हाः ।
उक्थशुष्मान् वृषभरान् स्वप्नसस् ताँ आदित्याँ अनु मदा स्वस्तये ॥ १० ०६३ ०३
नृचक्षसो अनिमिषन्तो अर्हणा बृहद् देवासो अमृतत्वम् आनशुः ।
ज्योतीरथा अहिमाया अनागसो दिवो वर्ष्माणं वसते स्वस्तये ॥ १० ०६३ ०४
सम्राजो ये सुवृधो यज्ञम् आययुर् अपरिह्वृता दधिरे दिवि क्षयम् ।
ताँ आ विवास नमसा सुवृक्तिभिर् महो आदित्याँ अदितिं स्वस्तये ॥ १० ०६३ ०५
को व स्तोमं राधति यं जुजोषथ विश्वे देवासो मनुषो यति ष्ठन ।
को वो ऽध्वरं तुविजाता अरं करद् यो नः पर्षद् अत्य् अंहः स्वस्तये ॥ १० ०६३ ०६
येभ्यो होत्राम् प्रथमाम् आयेजे मनुः समिद्धाग्निर् मनसा सप्त होतृभिः ।
त आदित्या अभयं शर्म यच्छत सुगा नः कर्त सुपथा स्वस्तये ॥ १० ०६३ ०७
य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर् जगतश् च मन्तवः ।
ते नः कृताद् अकृताद् एनसस् पर्य् अद्या देवासः पिपृता स्वस्तये ॥ १० ०६३ ०८
भरेष्व् इन्द्रं सुहवं हवामहे ऽंहोमुचं सुकृतं दैव्यं जनम् ।
अग्निम् मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये ॥ १० ०६३ ०९
सुत्रामाणम् पृथिवीं द्याम् अनेहसं सुशर्माणम् अदितिं सुप्रणीतिम् ।
दैवीं नावं स्वरित्राम् अनागसम् अस्रवन्तीम् आ रुहेमा स्वस्तये ॥ १० ०६३ १०
विश्वे यजत्रा अधि वोचतोतये त्रायध्वं नो दुरेवाया अभिह्रुतः ।
सत्यया वो देवहूत्या हुवेम शृण्वतो देवा अवसे स्वस्तये ॥ १० ०६३ ११
अपामीवाम् अप विश्वाम् अनाहुतिम् अपारातिं दुर्विदत्राम् अघायतः ।

आरे देवा द्वेषो अस्मद् युयोतनोरु णः शर्म यच्छता स्वस्तये ॥ १० ०६३ १२
अरिष्टः स मर्तो विश्व एधते प्र प्रजाभिर् जायते धर्मणस् परि ।
यम् आदित्यासो नयथा सुनीतिभिर् अति विश्वानि दुरिता स्वस्तये ॥ १० ०६३ १३
यं देवासो ऽवथ वाजसातौ यं शूरसाता मरुतो हिते धने ।
प्रातर्यावाणं रथम् इन्द्र सानसिम् अरिष्यन्तम् आ रुहेमा स्वस्तये ॥ १० ०६३ १४
स्वस्ति नः पथ्यासु धन्वसु स्वस्त्य् अ १ प्सु वृजने स्वर्वति ।
स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये मरुतो दधातन ॥ १० ०६३ १५
स्वस्तिर् इद् धि प्रपथे श्रेष्ठा रेक्णस्वत्य् अभि या वामम् एति ।
सा नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा ॥ १० ०६३ १६
एवा प्लतेः सूनुर् अवीवृधद् वो विश्व आदित्या अदिते मनीषी ।
ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ॥ १० ०६३ १७

(८८९)
कथा देवानां कतमस्य यामनि सुमन्तु नाम शृण्वताम् मनामहे ।
को मृळाति कतमो नो मयस् करत् कतम ऊती अभ्य् आ ववर्तति ॥ १० ०६४ ०१
क्रतूयन्ति क्रतवो हृत्सु धीतयो वेनन्ति वेनाः पतयन्त्य् आ दिशः ।
न मर्डिता विद्यते अन्य एभ्यो देवेषु मे अधि कामा अयंसत ॥ १० ०६४ ०२
नरा वा शंसम् पूषणम् अगोह्यम् अग्निं देवेद्धम् अभ्य् अर्चसे गिरा ।
सूर्यामासा चन्द्रमसा यमं दिवि त्रितं वातम् उषसम् अक्तुम् अश्विना ॥ १० ०६४ ०३
कथा कविस् तुवीरवान् कया गिरा बृहस्पतिर् वावृधते सुवृक्तिभिः ।
अज एकपात् सुहवेभिर् ऋक्वभिर् अहिः शृणोतु बुध्न्यो ३ हवीमनि ॥ १० ०६४ ०४
दक्षस्य वादिते जन्मनि व्रते राजाना मित्रावरुणा विवाससि ।
अतूर्तपन्थाः पुरुरथो अर्यमा सप्तहोता विषुरूपेषु जन्मसु ॥ १० ०६४ ०५
ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।
सहस्रसा मेधसाताव् इव त्मना महो ये धनं समिथेषु जभ्रिरे ॥ १० ०६४ ०६
प्र वो वायुं रथयुजम् पुरंधिं स्तोमैः कृणुध्वं सख्याय पूषणम् ।
ते हि देवस्य सवितुः सवीमनि क्रतुं सचन्ते सचितः सचेतसः ॥ १० ०६४ ०७

त्रिः सप्त सस्रा नद्यो महीर् अपो वनस्पतीन् पर्वताँ अग्निम् ऊतये ।
कृशानुम् अस्तॄन् तिष्यं सधस्थ आ रुद्रं रुद्रेषु रुद्रियं हवामहे ॥ १० ०६४ ०८
सरस्वती सरयुः सिन्धुर् ऊर्मिभिर् महो महीर् अवसा यन्तु वक्षणीः ।
देवीर् आपो मातरः सूदयित्न्वो घृतवत् पयो मधुमन् नो अर्चत ॥ १० ०६४ ०९
उत माता बृहद्दिवा शृणोतु नस् त्वष्टा देवेभिर् जनिभिः पिता वचः ।
ऋभुक्षा वाजो रथस्पतिर् भगो रण्वः शंसः शशमानस्य पातु नः ॥ १० ०६४ १०
रण्वः संदृष्टौ पितुमाँ इव क्षयो भद्रा रुद्राणाम् मरुताम् उपस्तुतिः ।
गोभिः ष्याम यशसो जनेष्व् आ सदा देवास इळया सचेमहि ॥ १० ०६४ ११
याम् मे धियम् मरुत इन्द्र देवा अददात वरुण मित्र यूयम् ।
ताम् पीपयत पयसेव धेनुं कुविद् गिरो अधि रथे वहाथ ॥ १० ०६४ १२
कुविद् अङ्ग प्रति यथा चिद् अस्य नः सजात्यस्य मरुतो बुबोधथ ।
नाभा यत्र प्रथमं संनसामहे तत्र जामित्वम् अदितिर् दधातु नः ॥ १० ०६४ १३
ते हि द्यावापृथिवी मातरा मही देवी देवाञ् जन्मना यज्ञिये इतः ।
उभे बिभृत उभयम् भरीमभिः पुरू रेतांसि पितृभिश् च सिञ्चतः ॥ १० ०६४ १४
वि षा होत्रा विश्वम् अश्नोति वार्यम् बृहस्पतिर् अरमतिः पनीयसी ।
ग्रावा यत्र मधुषुद् उच्यते बृहद् अवीवशन्त मतिभिर् मनीषिणः ॥ १० ०६४ १५
एवा कविस् तुवीरवाँ ऋतज्ञा द्रविणस्युर् द्रविणसश् चकानः ।
उक्थेभिर् अत्र मतिभिश् च विप्रो ऽपीपयद् गयो दिव्यानि जन्म ॥ १० ०६४ १६
एवा प्लतेः सूनुर् अवीवृधद् वो विश्व आदित्या अदिते मनीषी ।
ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ॥ १० ०६४ १७

(८९०)
अग्निर् इन्द्रो वरुणो मित्रो अर्यमा वायुः पूषा सरस्वती सजोषसः ।
आदित्या विष्णुर् मरुतः स्वर् बृहत् सोमो रुद्रो अदितिर् ब्रह्मणस् पतिः ॥ १० ०६५ ०१
इन्द्राग्नी वृत्रहत्येषु सत्पती मिथो हिन्वाना तन्वा समोकसा ।
अन्तरिक्षम् मह्य् आ पप्रुर् ओजसा सोमो घृतश्रीर् महिमानम् ईरयन् ॥ १० ०६५ ०२
तेषां हि मह्ना महताम् अनर्वणां स्तोमाँ इयर्म्य् ऋतज्ञा ऋतावृधाम् ।

ये अप्सवम् अर्णवं चित्रराधसस् ते नो रासन्ताम् महये सुमित्र्याः ॥ १० ०६५ ०३
स्वर्णरम् अन्तरिक्षाणि रोचना द्यावाभूमी पृथिवीं स्कम्भुर् ओजसा ।
पृक्षा इव महयन्तः सुरातयो देवा स्तवन्ते मनुषाय सूरयः ॥ १० ०६५ ०४
मित्राय शिक्ष वरुणाय दाशुषे या सम्राजा मनसा न प्रयुच्छतः ।
ययोर् धाम धर्मणा रोचते बृहद् ययोर् उभे रोदसी नाधसी वृतौ ॥ १० ०६५ ०५
या गौर् वर्तनिम् पर्येति निष्कृतम् पयो दुहाना व्रतनीर् अवारतः ।
सा प्रब्रुवाणा वरुणाय दाशुषे देवेभ्यो दाशद् धविषा विवस्वते ॥ १० ०६५ ०६
दिवक्षसो अग्निजिह्वा ऋतावृध ऋतस्य योनिं विमृशन्त आसते ।
द्यां स्कभित्व्य् अ १ प आ चक्रुर् ओजसा यज्ञं जनित्वी तन्वी ३ नि मामृजुः ॥ १०
०६५ ०७
परिक्षिता पितरा पूर्वजावरी ऋतस्य योना क्षयतः समोकसा ।
द्यावापृथिवी वरुणाय सव्रते घृतवत् पयो महिषाय पिन्वतः ॥ १० ०६५ ०८
पर्जन्यावाता वृषभा पुरीषिणेन्द्रवायू वरुणो मित्रो अर्यमा ।
देवाँ आदित्याँ अदितिं हवामहे ये पार्थिवासो दिव्यासो अप्सु ये ॥ १० ०६५ ०९
त्वष्टारं वायुम् ऋभवो य ओहते दैव्या होतारा उषसं स्वस्तये ।
बृहस्पतिं वृत्रखादं सुमेधसम् इन्द्रियं सोमं धनसा उ ईमहे ॥ १० ०६५ १०
ब्रह्म गाम् अश्वं जनयन्त ओषधीर् वनस्पतीन् पृथिवीम् पर्वताँ अपः ।
सूर्यं दिवि रोहयन्तः सुदानव आर्या व्रता विसृजन्तो अधि क्षमि ॥ १० ०६५ ११
भुज्युम् अंहसः पिपृथो निर् अश्विना श्यावम् पुत्रं वध्रिमत्या अजिन्वतम् ।
कमद्युवं विमदायोहथुर् युवं विष्णाप्व १ं विश्वकायाव सृजथः ॥ १० ०६५ १२
पावीरवी तन्यतुर् एकपाद् अजो दिवो धर्ता सिन्धुर् आपः समुद्रियः ।
विश्वे देवासः शृणवन् वचांसि मे सरस्वती सह धीभिः पुरंध्या ॥ १० ०६५ १३
विश्वे देवाः सह धीभिः पुरंध्या मनोर् यजत्रा अमृता ऋतज्ञाः ।
रातिषाचो अभिषाचः स्वर्विदः स्व १ र् गिरो ब्रह्म सूक्तं जुषेरत ॥ १० ०६५ १४
देवान् वसिष्ठो अमृतान् ववन्दे ये विश्वा भुवनाभि प्रतस्थुः ।
ते नो रासन्ताम् उरुगायम् अद्य यूयम् पात स्वस्तिभिः सदा नः ॥ १० ०६५ १५

(८९१)
देवान् हुवे बृहच्छ्रवसः स्वस्तये ज्योतिष्कृतो अध्वरस्य प्रचेतसः ।
ये वावृधुः प्रतरं विश्ववेदस इन्द्रज्येष्ठासो अमृता ऋतावृधः ॥ १० ०६६ ०१
इन्द्रप्रसूता वरुणप्रशिष्टा ये सूर्यस्य ज्योतिषो भागम् आनशुः ।
मरुद्गणे वृजने मन्म धीमहि माघोने यज्ञं जनयन्त सूरयः ॥ १० ०६६ ०२
इन्द्रो वसुभिः परि पातु नो गयम् आदित्यैर् नो अदितिः शर्म यच्छतु ।
रुद्रो रुद्रेभिर् देवो मृळयाति नस् त्वष्टा नो ग्नाभिः सुविताय जिन्वतु ॥ १० ०६६ ०३
अदितिर् द्यावापृथिवी ऋतम् महद् इन्द्राविष्णू मरुतः स्वर् बृहत् ।
देवाँ आदित्याँ अवसे हवामहे वसून् रुद्रान् सवितारं सुदंससम् ॥ १० ०६६ ०४
सरस्वान् धीभिर् वरुणो धृतव्रतः पूषा विष्णुर् महिमा वायुर् अश्विना ।
ब्रह्मकृतो अमृता विश्ववेदसः शर्म नो यंसन् त्रिवरूथम् अंहसः ॥ १० ०६६ ०५
वृषा यज्ञो वृषणः सन्तु यज्ञिया वृषणो देवा वृषणो हविष्कृतः ।
वृषणा द्यावापृथिवी ऋतावरी वृषा पर्जन्यो वृषणो वृषस्तुभः ॥ १० ०६६ ०६
अग्नीषोमा वृषणा वाजसातये पुरुप्रशस्ता वृषणा उप ब्रुवे ।
याव् ईजिरे वृषणो देवयज्यया ता नः शर्म त्रिवरूथं वि यंसतः ॥ १० ०६६ ०७
धृतव्रताः क्षत्रिया यज्ञनिष्कृतो बृहद्दिवा अध्वराणाम् अभिश्रियः ।
अग्निहोतार ऋतसापो अद्रुहो ऽपो असृजन्न् अनु वृत्रतूर्ये ॥ १० ०६६ ०८
द्यावापृथिवी जनयन्न् अभि व्रताप ओषधीर् वनिनानि यज्ञिया ।
अन्तरिक्षं स्व १ र् आ पप्रुर् ऊतये वशं देवासस् तन्वी ३ नि मामृजुः ॥ १० ०६६ ०९
धर्तारो दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः ।
आप ओषधीः प्र तिरन्तु नो गिरो भगो रातिर् वाजिनो यन्तु मे हवम् ॥ १० ०६६ १०
समुद्रः सिन्धू रजो अन्तरिक्षम् अज एकपात् तनयित्नुर् अर्णवः ।
अहिर् बुध्न्यः शृणवद् वचांसि मे विश्वे देवास उत सूरयो मम ॥ १० ०६६ ११
स्याम वो मनवो देववीतये प्राञ्चं नो यज्ञम् प्र णयत साधुया ।
आदित्या रुद्रा वसवः सुदानव इमा ब्रह्म शस्यमानानि जिन्वत ॥ १० ०६६ १२
दैव्या होतारा प्रथमा पुरोहित ऋतस्य पन्थाम् अन्व् एमि साधुया ।
क्षेत्रस्य पतिम् प्रतिवेशम् ईमहे विश्वान् देवाँ अमृताँ अप्रयुच्छतः ॥ १० ०६६ १३
वसिष्ठासः पितृवद् वाचम् अक्रत देवाँ ईळाना ऋषिवत् स्वस्तये ।

प्रीता इव ज्ञातयः कामम् एत्यास्मे देवासो ऽव धूनुता वसु ॥ १० ०६६ १४
देवान् वसिष्ठो अमृतान् ववन्दे ये विश्वा भुवनाभि प्रतस्थुः ।
ते नो रासन्ताम् उरुगायम् अद्य यूयम् पात स्वस्तिभिः सदा नः ॥ १० ०६६ १५

(८१२)
इमां धियं सप्तशीर्ष्णीम् पिता न ऋतप्रजाताम् बृहतीम् अविन्दत् ।
तुरीयं स्विज् जनयद् विश्वजन्यो ऽयास्य उक्थम् इन्द्राय शंसन् ॥ १० ०६७ ०१
ऋतं शंसन्त ऋजु दीध्याना दिवस् पुत्रासो असुरस्य वीराः ।
विप्रम् पदम् अङ्गिरसो दधाना यज्ञस्य धाम प्रथमम् मनन्त ॥ १० ०६७ ०२
हंसैर् इव सखिभिर् वावदद्भिर् अश्मन्मयानि नहना व्यस्यन् ।
बृहस्पतिर् अभिकनिक्रदद् गा उत प्रास्तौद् उच् च विद्वाँ अगायत् ॥ १० ०६७ ०३
अवो द्वाभ्याम् पर एकया गा गुहा तिष्ठन्तीर् अनृतस्य सेतौ ।
बृहस्पतिस् तमसि ज्योतिर् इच्छन्न् उद् उस्रा आकर् वि हि तिस्र आवः ॥ १० ०६७ ०४
विभिद्या पुरं शयथेम् अपाचीं निस् त्रीणि साकम् उदधेर् अकृन्तत् ।
बृहस्पतिर् उषसं सूर्यं गाम् अर्कं विवेद स्तनयन्न् इव द्यौः ॥ १० ०६७ ०५
इन्द्रो वलं रक्षितारं दुघानां करेणेव वि चकर्ता रवेण ।
स्वेदाञ्जिभिर् आशिरम् इच्छमानो ऽरोदयत् पणिम् आ गा अमुष्णात् ॥ १० ०६७ ०६
स ईं सत्येभिः सखिभिः शुचद्भिर् गोधायसं वि धनसैर् अदर्दः ।
ब्रह्मणस् पतिर् वृषभिर् वराहैर् घर्मस्वेदेभिर् द्रविणं व्य् आनट् ॥ १० ०६७ ०७
ते सत्येन मनसा गोपतिं गा इयानास इषणयन्त धीभिः ।
बृहस्पतिर् मिथोअवद्यपेभिर् उद् उस्रिया असृजत स्वयुग्भिः ॥ १० ०६७ ०८
तं वर्धयन्तो मतिभिः शिवाभिः सिंहम् इव नानदतं सधस्थे ।
बृहस्पतिं वृषणं शूरसातौ भरे-भरे अनु मदेम जिष्णुम् ॥ १० ०६७ ०९
यदा वाजम् असनद् विश्वरूपम् आ द्याम् अरुक्षद् उत्तराणि सद्म ।
बृहस्पतिं वृषणं वर्धयन्तो नाना सन्तो बिभ्रतो ज्योतिर् आसा ॥ १० ०६७ १०
सत्याम् आशिषं कृणुता वयोधै कीरिं चिद् ध्य् अवथ स्वेभिर् एवैः ।
पश्चा मृधो अप भवन्तु विश्वास् तद् रोदसी शृणुतं विश्वमिन्वे ॥ १० ०६७ ११

इन्द्रो मह्ना महतो अर्णवस्य वि मूर्धानम् अभिनद् अर्बुदस्य ।
अहन्न् अहिम् अरिणात् सप्त सिन्धून् देवैर् द्यावापृथिवी प्रावतं नः ॥ १० ०६७ १२

(८९३)
उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः ।
गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिम् अभ्य् अ १ र्का अनावन् ॥ १० ०६८ ०१
सं गोभिर् आङ्गिरसो नक्षमाणो भग इवेद् अर्यमणं निनाय ।
जने मित्रो न दम्पती अनक्ति बृहस्पते वाजयाशूर् इवाजौ ॥ १० ०६८ ०२
साध्वर्या अतिथिनीर् इषिरा स्पार्हाः सुवर्णा अनवद्यरूपाः ।
बृहस्पतिः पर्वतेभ्यो वितूर्या निर् गा ऊपे यवम् इव स्थिविभ्यः ॥ १० ०६८ ०३
आप्रुषायन् मधुन ऋतस्य योनिम् अवक्षिपन्न् अर्क उल्काम् इव द्योः ।
बृहस्पतिर् उद्धरन्न् अश्मनो गा भूम्या उद्नेव वि त्वचम् बिभेद ॥ १० ०६८ ०४
अप ज्योतिषा तमो अन्तरिक्षाद् उद्नः शीपालम् इव वात आजत् ।
बृहस्पतिर् अनुमृश्या वलस्याभ्रम् इव वात आ चक्र आ गाः ॥ १० ०६८ ०५
यदा वलस्य पीयतो जसुम् भेद् बृहस्पतिर् अग्नितपोभिर् अर्कैः ।
दद्भिर् न जिह्वा परिविष्टम् आदद् आविर् निधीर् अकृणोद् उस्रियाणाम् ॥ १० ०६८
०६
बृहस्पतिर् अमत हि त्यद् आसां नाम स्वरीणां सदने गुहा यत् ।
आण्डेव भित्त्वा शकुनस्य गर्भम् उद् उस्रियाः पर्वतस्य त्मनाजत् ॥ १० ०६८ ०७
अश्नापिनद्धम् मधु पर्य् अपश्यन् मत्स्यं न दीन उदनि क्षियन्तम् ।
निष् टज् जभार चमसं न वृक्षाद् बृहस्पतिर् विरवेणा विकृत्य ॥ १० ०६८ ०८
सोषाम् अविन्दत् स स्व १ : सो अग्निं सो अर्केण वि बबाधे तमांसि ।
बृहस्पतिर् गोवपुषो वलस्य निर् मज्जानं न पर्वणो जभार ॥ १० ०६८ ०९
हिमेव पर्णा मुषिता वनानि बृहस्पतिनाकृपयद् वलो गाः ।
अनानुकृत्यम् अपुनश् चकार यात् सूर्यामासा मिथ उच्चरातः ॥ १० ०६८ १०
अभि श्यावं न कृशनेभिर् अश्वं नक्षत्रेभिः पितरो द्याम् अपिंशन् ।
रात्र्यां तमो अदधुर् ज्योतिर् अहन् बृहस्पतिर् भिनद् अद्रिं विदद् गाः ॥ १० ०६८ ११

इदम् अकर्म नमो अभ्रियाय यः पूर्वीर् अन्व् आनोनवीति ।
बृहस्पतिः स हि गोभिः सो अश्वैः स वीरेभिः स नृभिर् नो वयो धात् ॥ १० ०६८ १२

(८१४)
भद्रा अग्नेर् वध्र्यश्वस्य संदृशो वामी प्रणीतिः सुरणा उपेतयः ।
यद् ईं सुमित्रा विशो अग्र इन्धते घृतेनाहुतो जरते दविद्युतत् ॥ १० ०६९ ०१
घृतम् अग्नेर् वध्र्यश्वस्य वर्धनं घृतम् अन्नं घृतम् व् अस्य मेदनम् ।
घृतेनाहुत उर्विया वि पप्रथे सूर्य इव रोचते सर्पिरासुतिः ॥ १० ०६९ ०२
यत् ते मनुर् यद् अनीकं सुमित्रः समीधे अग्ने तद् इदं नवीयः ।
स रेवच् छोच स गिरो जुषस्व स वाजं दर्षि स इह श्रवो धाः ॥ १० ०६९ ०३
यं त्वा पूर्वम् ईळितो वध्र्यश्वः समीधे अग्ने स इदं जुषस्व ।
स न स्तिपा उत भवा तनूपा दात्रं रक्षस्व यद् इदं ते अस्मे ॥ १० ०६९ ०४
भवा द्युम्नी वाध्र्यश्वोत गोपा मा त्वा तारीद् अभिमातिर् जनानाम् ।
शूर इव धृष्णुश् च्यवनः सुमित्रः प्र नु वोचं वाध्र्यश्वस्य नाम ॥ १० ०६९ ०५
सम् अज्र्या पर्वत्या वसूनि दासा वृत्राण्य् आर्या जिगेथ ।
शूर इव धृष्णुश् च्यवनो जनानां त्वम् अग्ने पृतनायूँर् अभि ष्याः ॥ १० ०६९ ०६
दीर्घतन्तुर् बृहदुक्षायम् अग्निः सहस्रस्तरीः शतनीथ ऋभ्वा ।
द्युमान् द्युमत्सु नृभिर् मृज्यमानः सुमित्रेषु दीदयो देवयत्सु ॥ १० ०६९ ०७
त्वे धेनुः सुदुघा जातवेदो ऽसश्चतेव समना सबर्धुक् ।
त्वं नृभिर् दक्षिणावद्भिर् अग्ने सुमित्रेभिर् इध्यसे देवयद्भिः ॥ १० ०६९ ०८
देवाश् चित् ते अमृता जातवेदो महिमानं वाध्र्यश्व प्र वोचन् ।
यत् सम्पृच्छम् मानुषीर् विश आयन् त्वं नृभिर् अजयस् त्वावृधेभिः ॥ १० ०६९ ०९
पितेव पुत्रम् अबिभर् उपस्थे त्वाम् अग्ने वध्र्यश्वः सपर्यन् ।
जुषाणो अस्य समिधं यविष्ठोत पूर्वाँ अवनोर् व्राधतश् चित् ॥ १० ०६९ १०
शश्वद् अग्निर् वध्र्यश्वस्य शत्रून् नृभिर् जिगाय सुतसोमवद्भिः ।
समनं चिद् अदहश् चित्रभानो ऽव व्राधन्तम् अभिनद् वृधश् चित् ॥ १० ०६९ ११
अयम् अग्निर् वध्र्यश्वस्य वृत्रहा सनकात् प्रेद्धो नमसोपवाक्यः ।
स नो अजामीँर् उत वा विजामीन् अभि तिष्ठ शर्धतो वाध्र्यश्व ॥ १० ०६९ १२

(८९५)
इमाम् मे अग्ने समिधं जुषस्वेळस् पदे प्रति हर्या घृताचीम् ।
वर्ष्मन् पृथिव्याः सुदिनत्वे अह्नाम् ऊर्ध्वो भव सुक्रतो देवयज्या ॥ १० ०७० ०१
आ देवानाम् अग्रयावेह यातु नराशंसो विश्वरूपेभिर् अश्वैः ।
ऋतस्य पथा नमसा मियेधो देवेभ्यो देवतमः सुषूदत् ॥ १० ०७० ०२
शश्वत्तमम् ईळते दूत्याय हविष्मन्तो मनुष्यासो अग्निम् ।
वहिष्ठैर् अश्वैः सुवृता रथेना देवान् वक्षि नि षदेह होता ॥ १० ०७० ०३
वि प्रथतां देवजुष्टं तिरश्चा दीर्घं द्राघ्मा सुरभि भूत्व् अस्मे ।
अहेळता मनसा देव बर्हिर् इन्द्रज्येष्ठाँ उशतो यक्षि देवान् ॥ १० ०७० ०४
दिवो वा सानु स्पृशता वरीयः पृथिव्या वा मात्रया वि श्रयध्वम् ।
उशतीर् द्वारो महिना महद्भिर् देवं रथं रथयुर् धारयध्वम् ॥ १० ०७० ०५
देवी दिवो दुहितरा सुशिल्पे उषासानक्ता सदतां नि योनौ ।
आ वां देवास उशती उशन्त उरौ सीदन्तु सुभगे उपस्थे ॥ १० ०७० ०६
ऊर्ध्वो ग्रावा बृहद् अग्निः समिद्धः प्रिया धामान्य् अदितेर् उपस्थे ।
पुरोहिताव् ऋत्विजा यज्ञे अस्मिन् विदुष्टरा द्रविणम् आ यजेथाम् ॥ १० ०७० ०७
तिस्रो देवीर् बर्हिर् इदं वरीय आ सीदत चकृमा वः स्योनम् ।
मनुष्वद् यज्ञं सुधिता हवींषीळा देवी घृतपदी जुषन्त ॥ १० ०७० ०८
देव त्वष्टर् यद् ध चारुत्वम् आनड् यद् अङ्गिरसाम् अभवः सचाभूः ।
स देवानाम् पाथ उप प्र विद्वाँ उशन् यक्षि द्रविणोदः सुरत्नः ॥ १० ०७० ०९
वनस्पते रशनया नियूया देवानाम् पाथ उप वक्षि विद्वान् ।
स्वदाति देवः कृणवद् धवींष्य् अवतां द्यावापृथिवी हवम् मे ॥ १० ०७० १०
आग्ने वह वरुणम् इष्टये न इन्द्रं दिवो मरुतो अन्तरिक्षात् ।
सीदन्तु बर्हिर् विश्व आ यजत्राः स्वाहा देवा अमृता मादयन्ताम् ॥ १० ०७० ११

(८९६)

बृहस्पते प्रथमं वाचो अग्रं यत् प्रैरत नामधेयं दधानाः ।
यद् एषां श्रेष्ठं यद् अरिप्रम् आसीत् प्रेणा तद् एषां निहितं गुहाविः ॥ १० ०७१ ०१
सक्तुम् इव तितउना पुनन्तो यत्र धीरा मनसा वाचम् अक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर् निहिताधि वाचि ॥ १० ०७१ ०२
यज्ञेन वाचः पदवीयम् आयन् ताम् अन्व् अविन्दन्न् ऋषिषु प्रविष्टाम् ।
ताम् आभृत्या व्य् अदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते ॥ १० ०७१ ०३
उत त्वः पश्यन् न ददर्श वाचम् उत त्वः शृण्वन् न शृणोत्य् एनाम् ।
उतो त्वस्मै तन्व १ं वि सस्रे जायेव पत्य उशती सुवासाः ॥ १० ०७१ ०४
उत त्वं सख्ये स्थिरपीतम् आहुर् नैनं हिन्वन्त्य् अपि वाजिनेषु ।
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलाम् अपुष्पाम् ॥ १० ०७१ ०५
यस् तित्याज सचिविदं सखायं न तस्य वाच्य् अपि भागो अस्ति ।
यद् ईं शृणोत्य् अलकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम् ॥ १० ०७१ ०६
अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्व् असमा बभूवुः ।
आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे ॥ १० ०७१ ०७
हृदा तष्टेषु मनसो जवेषु यद् ब्राह्मणाः संयजन्ते सखायः ।
अत्राह त्वं वि जहुर् वेद्याभिर् ओहब्रह्माणो वि चरन्त्य् उ त्वे ॥ १० ०७१ ०८
इमे ये नार्वाङ् न परश् चरन्ति न ब्राह्मणासो न सुतेकरासः ।
त एते वाचम् अभिपद्य पापया सिरीस् तन्त्रं तन्वते अप्रजज्ञयः ॥ १० ०७१ ०९
सर्वे नन्दन्ति यशसागतेन सभासाहेन सख्या सखायः ।
किल्बिषस्पृत् पितुषणिर् ह्य् एषाम् अरं हितो भवति वाजिनाय ॥ १० ०७१ १०
ऋचां त्वः पोषम् आस्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु ।
ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ॥ १० ०७१ ११

(८९७)
देवानां नु वयं जाना प्र वोचाम विपन्यया ।
उक्थेषु शस्यमानेषु यः पश्याद् उत्तरे युगे ॥ १० ०७२ ०१
ब्रह्मणस् पतिर् एता सं कर्मार इवाधमत् ।

देवानाम् पूर्व्ये युगे ऽसतः सद् अजायत ॥ १० ०७२ ०२
देवानां युगे प्रथमे ऽसतः सद् अजायत ।
तद् आशा अन्व् अजायन्त तद् उत्तानपदस् परि ॥ १० ०७२ ०३
भूर् जज्ञ उत्तानपदो भुव आशा अजायन्त ।
अदितेर् दक्षो अजायत दक्षाद् व् अदितिः परि ॥ १० ०७२ ०४
अदितिर् ह्य् अजनिष्ट दक्ष या दुहिता तव ।
तां देवा अन्व् अजायन्त भद्रा अमृतबन्धवः ॥ १० ०७२ ०५
यद् देवा अदः सलिले सुसंरब्धा अतिष्ठत ।
अत्रा वो नृत्यताम् इव तीव्रो रेणुर् अपायत ॥ १० ०७२ ०६
यद् देवा यतयो यथा भुवनान्य् अपिन्वत ।
अत्रा समुद्र आ गूळ्हम् आ सूर्यम् अजभर्तन ॥ १० ०७२ ०७
अष्टौ पुत्रासो अदितेर् ये जातास् तन्व१ स् परि ।
देवाँ उप प्रैत् सप्तभिः परा मार्ताण्डम् आस्यत् ॥ १० ०७२ ०८
सप्तभिः पुत्रैर् अदितिर् उप प्रैत् पूर्व्यं युगम् ।
प्रजायै मृत्यवे त्वत् पुनर् मार्ताण्डम् आभरत् ॥ १० ०७२ ०९

(८९८)
जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः ।
अवर्धन्न् इन्द्रम् मरुतश् चिद् अत्र माता यद् वीरं दधनद् धनिष्ठा ॥ १० ०७३ ०१
द्रुहो निषत्ता पृशनी चिद् एवैः पुरू शंसेन वावृधुष् ट इन्द्रम् ।
अभीवृतेव ता महापदेन ध्वान्तात् प्रपित्वाद् उद् अरन्त गर्भाः ॥ १० ०७३ ०२
ऋष्वा ते पादा प्र यज् जिगास्य् अवर्धन् वाजा उत ये चिद् अत्र ।
त्वम् इन्द्र सालावृकान् सहस्रम् आसन् दधिषे अश्विना ववृत्याः ॥ १० ०७३ ०३
समना तूर्णिर् उप यासि यज्ञम् आ नासत्या सख्याय वक्षि ।
वसाव्याम् इन्द्र धारयः सहस्राश्विना शूर ददतुर् मघानि ॥ १० ०७३ ०४
मन्दमान ऋताद् अधि प्रजायै सखिभिर् इन्द्र इषिरेभिर् अर्थम् ।
आभिर् हि माया उप दस्युम् आगान् मिहः प्र तम्रा अवपत् तमांसि ॥ १० ०७३ ०५
सनामाना चिद् ध्वसयो न्य् अस्मा अवाहन्न् इन्द्र उषसो यथानः ।

ऋष्वैर् अगच्छः सखिभिर् निकामैः साकम् प्रतिष्ठा हृद्या जघन्थ ॥ १० ०७३ ०६
त्वं जघन्थ नमुचिम् मखस्युं दासं कृण्वान ऋषये विमायम् ।
त्वं चकर्थ मनवे स्योनान् पथो देवत्राञ्जसेव यानान् ॥ १० ०७३ ०७
त्वम् एतानि पप्रिषे वि नामेशान इन्द्र दधिषे गभस्तौ ।
अनु त्वा देवाः शवसा मदन्त्य् उपरिबुध्नान् वनिनश् चकर्थ ॥ १० ०७३ ०८
चक्रं यद् अस्याप्स्व् आ निषत्तम् उतो तद् अस्मै मध्व् इच् चच्छद्यात् ।
पृथिव्याम् अतिषितं यद् ऊधः पयो गोष्व् अदधा ओषधीषु ॥ १० ०७३ ०९
अश्वाद् इयायेति यद् वदन्त्य् ओजसो जातम् उत मन्य एनम् ।
मन्योर् इयाय हर्म्येषु तस्थौ यतः प्रजज्ञ इन्द्रो अस्य वेद ॥ १० ०७३ १०
वयः सुपर्णा उप सेदुर् इन्द्रम् प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वान्तम् ऊर्णुहि पूर्धि चक्षुर् मुमुग्ध्य् अ१स्मान् निधयेव बद्धान् ॥ १० ०७३ ११

(८९९)
वसूनां वा चर्कृष इयक्षन् धिया वा यज्ञैर् वा रोदस्योः ।
अर्वन्तो वा ये रयिमन्तः सातौ वनुं वा ये सुश्रुणं सुश्रुतो धुः ॥ १० ०७४ ०१
हव एषाम् असुरो नक्षत द्यां श्रवस्यता मनसा निंसत क्षाम् ।
चक्षाणा यत्र सुविताय देवा द्यौर् न वारेभिः कृणवन्त स्वैः ॥ १० ०७४ ०२
इयम् एषाम् अमृतानां गीः सर्वताता ये कृपणन्त रत्नम् ।
धियं च यज्ञं च साधन्तस् ते नो धान्तु वसव्य१म् असामि ॥ १० ०७४ ०३
आ तत् त इन्द्रायवः पनन्ताभि य ऊर्वं गोमन्तं तितृत्सान् ।
सकृत्स्व१ं ये पुरुपुत्राम् महीं सहस्रधाराम् बृहतीं दुदुक्षन् ॥ १० ०७४ ०४
शचीव इन्द्रम् अवसे कृणुध्वम् अनानतं दमयन्तम् पृतन्यून् ।
ऋभुक्षणम् मघवानं सुवृक्तिम् भर्ता यो वज्रं नर्यम् पुरुक्षुः ॥ १० ०७४ ०५
यद् वावान पुरुतमम् पुराषाळ् आ वृत्रहेन्द्रो नामान्य् अप्राः ।
अचेति प्रासहस् पतिस् तुविष्मान् यद् ईम् उश्मसि कर्तवे करत् तत् ॥ १० ०७४ ०६

(१००)
प्र सु व आपो महिमानम् उत्तमं कारुर् वोचाति सदने विवस्वतः ।
प्र सप्त-सप्त त्रेधा हि चक्रमुः प्र सृत्वरीणाम् अति सिन्धुर् ओजसा ॥ १० ०७५ ०१
प्र ते ऽरदद् वरुणो यातवे पथः सिन्धो यद् वाजाँ अभ्य् अद्रवस् त्वम् ।
भूम्या अधि प्रवता यासि सानुना यद् एषाम् अग्रं जगताम् इरज्यसि ॥ १० ०७५ ०२
दिवि स्वनो यतते भूम्योपर्य् अनन्तं शुष्मम् उद् इयर्ति भानुना ।
अभ्राद् इव प्र स्तनयन्ति वृष्टयः सिन्धुर् यद् एति वृषभो न रोरुवत् ॥ १० ०७५ ०३
अभि त्वा सिन्धो शिशुम् इन् न मातरो वाश्रा अर्षन्ति पयसेव धेनवः ।
राजेव युध्वा नयसि त्वम् इत् सिचौ यद् आसाम् अग्रम् प्रवताम् इनक्षसि ॥ १० ०७५ ०४
इमम् मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्य् आ ।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्य् आ सुषोमया ॥ १० ०७५ ०५
तृष्टामया प्रथमं यातवे सजूः सुसर्त्वा रसया श्वेत्या त्या ।
त्वं सिन्धो कुभया गोमतीं क्रुमुम् मेहत्न्वा सरथं याभिर् ईयसे ॥ १० ०७५ ०६
ऋजीत्य् एनी रुशती महित्वा परि ज्रयांसि भरते रजांसि ।
अदब्धा सिन्धुर् अपसाम् अपस्तमाश्वा न चित्रा वपुषीव दर्शता ॥ १० ०७५ ०७
स्वश्वा सिन्धुः सुरथा सुवासा हिरण्ययी सुकृता वाजिनीवती ।
ऊर्णावती युवतिः सीलमावत्य् उताधि वस्ते सुभगा मधुवृधम् ॥ १० ०७५ ०८
सुखं रथं युयुजे सिन्धुर् अश्विनं तेन वाजं सनिषद् अस्मिन्न् आजौ ।
महान् ह्य् अस्य महिमा पनस्यते ऽदब्धस्य स्वयशसो विरप्शिनः ॥ १० ०७५ ०९

आ व ऋञ्जस ऊर्जां व्युष्टिष्व् इन्द्रम् मरुतो रोदसी अनक्तन ।
उभे यथा नो अहनी सचाभुवा सदः-सदो वरिवस्यात उद्भिदा ॥ १० ०७६ ०१
तद् उ श्रेष्ठं सवनं सुनोतनात्यो न हस्तयतो अद्रिः सोतरि ।
विदद् ध्य् अ १ र्यो अभिभूति पौंस्यम् महो राये चित् तरुते यद् अर्वतः ॥ १० ०७६ ०२
तद् इद् ध्य् अस्य सवनं विवेर् अपो यथा पुरा मनवे गातुम् अश्रेत् ।

गोअर्णसि त्वाष्ट्रे अश्वनिर्णिजि प्रेम् अध्वरेष्व् अध्वराँ अशिश्रयुः ॥ १० ०७६ ०३
अप हत रक्षसो भङ्गुरावत स्कभायत निरृतिं सेधतामतिम् ।
आ नो रयिं सर्ववीरं सुनोतन देवाव्यम् भरत श्लोकम् अद्रयः ॥ १० ०७६ ०४
दिवश् चिद् आ वो ऽमवत्तरेभ्यो विभ्वना चिद् आश्वपस्तरेभ्यः ।
वायोश् चिद् आ सोमरभस्तरेभ्यो ऽग्नेश् चिद् अर्च पितुकृत्तरेभ्यः ॥ १० ०७६ ०५
भुरन्तु नो यशसः सोत्व् अन्धसो ग्रावाणो वाचा दिविता दिवित्मता ।
नरो यत्र दुहते काम्यम् मध्व् आघोषयन्तो अभितो मिथस्तुरः ॥ १० ०७६ ०६
सुन्वन्ति सोमं रथिरासो अद्रयो निर् अस्य रसं गविषो दुहन्ति ते ।
दुहन्त्य् ऊधर् उपसेचनाय कं नरो हव्या न मर्जयन्त आसभिः ॥ १० ०७६ ०७
एते नरः स्वपसो अभूतन य इन्द्राय सुनुथ सोमम् अद्रयः ।
वामं-वामं वो दिव्याय धाम्ने वसु-वसु वः पार्थिवाय सुन्वते ॥ १० ०७६ ०८

अभ्रप्रुषो न वाचा प्रुषा वसु हविष्मन्तो न यज्ञा विजानुषः ।
सुमारुतं न ब्रह्माणम् अर्हसे गणम् अस्तोष्य् एषां न शोभसे ॥ १० ०७७ ०१
श्रिये मर्यासो अञ्जीर् अकृण्वत सुमारुतं न पूर्वीर् अति क्षपः ।
दिवस् पुत्रास एता न येतिर आदित्यासस् ते अक्रा न वावृधुः ॥ १० ०७७ ०२
प्र ये दिवः पृथिव्या न बर्हणा त्मना रिरिच्रे अभ्रान् न सूर्यः ।
पाजस्वन्तो न वीराः पनस्यवो रिशादसो न मर्या अभिद्यवः ॥ १० ०७७ ०३
युष्माकम् बुध्ने अपां न यामनि विथुर्यति न मही श्रथर्यति ।
विश्वप्सुर् यज्ञो अर्वाग् अयं सु वः प्रयस्वन्तो न सत्राच आ गत ॥ १० ०७७ ०४
यूयं धूर्षु प्रयुजो न रश्मिभिर् ज्योतिष्मन्तो न भासा व्युष्टिषु ।
श्येनासो न स्वयशसो रिशादसः प्रवासो न प्रसितासः परिप्रुषः ॥ १० ०७७ ०५
प्र यद् वहध्वे मरुतः पराकाद् यूयम् महः संवरणस्य वस्वः ।
विदानासो वसवो राध्यस्याराच् चिद् द्वेषः सनुतर् युयोत ॥ १० ०७७ ०६
य उदृचि यज्ञे अध्वरेष्ठा मरुद्भ्यो न मानुषो ददाशत् ।
रेवत् स वयो दधते सुवीरं स देवानाम् अपि गोपीथे अस्तु ॥ १० ०७७ ०७
ते हि यज्ञेषु यज्ञियास ऊमा आदित्येन नाम्ना शम्भविष्ठाः ।

ते नोऽवन्तु रथतूर् मनीषाम् महश् च यामन्न् अध्वरे चकानाः ॥ १० ०७७ ०८

विप्रासो न मन्मभिः स्वाध्यो देवाव्यो३ न यज्ञैः स्वप्नसः ।
राजानो न चित्राः सुसंदृशः क्षितीनां न मर्या अरेपसः ॥ १० ०७८ ०१
अग्निर् न ये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः सद्यऊतयः ।
प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुशर्माणो न सोमा ऋतं यते ॥ १० ०७८ ०२
वातासो न ये धुनयो जिगत्नवोऽग्नीनां न जिह्वा विरोकिणः ।
वर्मण्वन्तो न योधाः शिमीवन्तः पितॄणां न शंसाः सुरातयः ॥ १० ०७८ ०३
रथानां न येऽराः सनाभयो जिगीवांसो न शूरा अभिद्यवः ।
वरेयवो न मर्या घृतप्रुषोऽभिस्वर्तारो अर्कं न सुष्टुभः ॥ १० ०७८ ०४
अश्वासो न ये ज्येष्ठास आशवो दिधिषवो न रथ्यः सुदानवः ।
आपो न निम्नैर् उदभिर् जिगत्नवो विश्वरूपा अङ्गिरसो न सामभिः ॥ १० ०७८ ०५
ग्रावाणो न सूरयः सिन्धुमातर आदर्दिरासो अद्रयो न विश्वहा ।
शिशूला न क्रीळयः सुमातरो महाग्रामो न यामन्न् उत त्विषा ॥ १० ०७८ ०६
उषसां न केतवोऽध्वरश्रियः शुभंयवो नाञ्जिभिर् व्य् अश्वितन् ।
सिन्धवो न ययियो भ्राजदृष्टयः परावतो न योजनानि ममिरे ॥ १० ०७८ ०७
सुभागान् नो देवाः कृणुता सुरत्नान् अस्मान् स्तोतॄन् मरुतो वावृधानाः ।
अधि स्तोत्रस्य सख्यस्य गात सनाद् धि वो रत्नधेयानि सन्ति ॥ १० ०७८ ०८

अपश्यम् अस्य महतो महित्वम् अमर्त्यस्य मर्त्यासु विक्षु ।
नाना हनू विभृते सम् भरेते असिन्वती बप्सती भूर्य् अत्तः ॥ १० ०७९ ०१
गुहा शिरो निहितम् ऋधग् अक्षी असिन्वन्न् अत्ति जिह्वया वनानि ।
अत्राण्य् अस्मै पड्भिः सम् भरन्त्य् उत्तानहस्ता नमसाधि विक्षु ॥ १० ०७९ ०२
प्र मातुः प्रतरं गुह्यम् इच्छन् कुमारो न वीरुधः सर्पद् उर्वीः ।
ससं न पक्वम् अविदच् छुचन्तं रिरिह्वांसं रिप उपस्थे अन्तः ॥ १० ०७९ ०३
तद् वाम् ऋतं रोदसी प्र ब्रवीमि जायमानो मातरा गर्भो अत्ति ।

नाहं दे॒वस्य॒ मर्त्यं॑श् चिकेता॒ग्निर् अ॒ङ्ग विचे॑ता॒: स प्रचे॑ताः ॥ १० ०७९ ०४
यो अ॑स्मा॒ अन्नं॑ तृ॒ष्व् आ ॒३ँ दधा॒त्य् आज्यै॑र् घृ॒तैर् जु॒होति॒ पुष्य॑ति ।
तस्मै॑ स॒हस्र॑म् अ॒क्षभि॒र् वि च॒क्षे ऽग्ने॑ वि॒श्वत॑: प्र॒त्यङ्ङ् अ॑सि॒ त्वम् ॥ १० ०७९ ०५
किं दे॒वेषु॒ त्यज॒ एन॑श् चक॒र्थाग्ने॑ पृ॒च्छामि॒ नु त्वाम् अवि॑द्वान् ।
अक्री॑ळ॒न् क्रीळ॒न् हरि॒र् अत्त॑वे॒ ऽदन् वि प॑र्व॒शश् च॑कर्त॒ गाम् इ॑वा॒सिः ॥ १० ०७९ ०६
विषू॑चो॒ अश्वा॑न् युयुजे वने॒जा ऋजी॑तिभी रश॒नाभि॑र् गृभी॒तान् ।
च॒क्ष॒दे मि॒त्रो वसु॑भि॒: सुजा॑त॒: सम् आ॑नृधे॒ पर्व॑भिर् वावृधा॒नः ॥ १० ०७९ ०७

अ॒ग्निः सप्तिं॑ वाजम्भ॒रं द॑दात्य् अ॒ग्निर् वी॒रं श्रुत्यं॑ कर्म॒निष्ठा॑म् ।
अ॒ग्नी रोद॑सी॒ वि च॑रत् सम॒ञ्जन्न् अ॒ग्निर् नारीं॑ वी॒रकु॑क्षिम् पुरं॑धिम् ॥ १० ०८० ०१
अ॒ग्नेर् अप्न॑सः स॒मिद् अ॑स्तु भ॒द्राग्निर् म॒ही रोद॑सी॒ आ वि॑वेश ।
अ॒ग्निर् एकं॑ चोदयत् स॒मत्स्व् अ॒ग्निर् वृ॒त्राणि॑ दयते पु॒रूणि॑ ॥ १० ०८० ०२
अ॒ग्निर् ह॒ त्यं जर॑त॒: कर्ण॑म् आवा॒ग्निर् अ॒द्भ्यो निर् अ॑दह॒ज् जरू॑थम् ।
अ॒ग्निर् अत्रिं॑ घ॒र्म उ॑रुष्यद् अ॒न्तर् अ॒ग्निर् नृ॒मेध॑म् प्र॒जया॑सृज॒त् सम् ॥ १० ०८० ०३
अ॒ग्निर् दा॒द् द्रवि॑णं वी॒रपे॑शा अ॒ग्निर् ऋषिं॒ यः स॒हस्रा॑ स॒नोति॑ ।
अ॒ग्निर् दि॒वि ह॒व्यम् आ त॑तान॒ग्नेर् धामा॑नि॒ विभृ॑ता पु॒रुत्रा ॥ १० ०८० ०४
अ॒ग्निम् उ॒क्थैर् ऋष॑यो॒ वि ह्व॑यन्ते॒ ऽग्निं नरो॒ यामा॑नि बाधि॒तास॑: ।
अ॒ग्निं वयो॑ अ॒न्तरि॑क्षे॒ पत॑न्तो॒ ऽग्निः स॒हस्रा॒ परि॑ याति॒ गोना॑म् ॥ १० ०८० ०५
अ॒ग्निं विश॑ ईळते॒ मानु॑षी॒र् या अ॒ग्निम् मनु॑षो॒ नहु॑षो॒ वि जा॒ताः ।
अ॒ग्निर् गान्ध॑र्वीम् प॒थ्याम् ऋ॒तस्या॒ग्नेर् गव्यू॑तिर् घृ॒त आ निष॑त्ता ॥ १० ०८० ०६
अ॒ग्नये॒ ब्रह्म॑ ऋ॒भव॑स् ततक्षुर् अ॒ग्निम् म॒हाम् अ॑वोचामा सुवृ॒क्तिम् ।
अग्ने॒ प्राव॑ जरि॒तारं॑ यवि॒ष्ठाग्ने॒ महि॒ द्रवि॑ण॒म् आ य॑जस्व ॥ १० ०८० ०७

य इ॒मा विश्वा॒ भुव॑नानि॒ जुह्व॒द् ऋषि॒र् होता॒ न्य् असी॑दत् पि॒ता नः॑ ।
स आ॒शिषा॒ द्रवि॑णम् इ॒च्छमा॑नः प्रथम॒च्छद् अव॑राँ आ वि॑वेश ॥ १० ०८१ ०१
किं स्वि॑द् आसीद् अधि॒ष्ठान॑म् आ॒रम्भ॑णं कत॒मत् स्वि॑त् क॒थासी॑त् ।

यतो भूमिं जनयन् विश्वकर्मा वि द्याम् और्णोन् महिना विश्वचक्षाः ॥ १० ०८१ ०२
विश्वतश्चक्षुर् उत विश्वतोमुखो विश्वतोबाहुर् उत विश्वतस्पात् ।
सम् बाहुभ्यां धमति सम् पतत्रैर् द्यावाभूमी जनयन् देव एकः ॥ १० ०८१ ०३
किं स्विद् वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेद् उ तद् यद् अध्यतिष्ठद् भुवनानि धारयन् ॥ १० ०८१ ०४
या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्न् उतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ॥ १० ०८१ ०५
विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीम् उत द्याम् ।
मुह्यन्त्व् अन्ये अभितो जनास इहास्माकम् मघवा सूरिर् अस्तु ॥ १० ०८१ ०६
वाचस् पतिं विश्वकर्माणम् ऊतये मनोजुवं वाजे अद्या हुवेम ।
स नो विश्वानि हवनानि जोषद् विश्वशम्भूर् अवसे साधुकर्मा ॥ १० ०८१ ०७

चक्षुषः पिता मनसा हि धीरो घृतम् एने अजनन् नन्नमाने ।
यदेद् अन्ता अददृहन्त पूर्व आद् इद् द्यावापृथिवी अप्रथेताम् ॥ १० ०८२ ०१
विश्वकर्मा विमना आद् विहाया धाता विधाता परमोत संदृक् ।
तेषाम् इष्टानि सम् इषा मदन्ति यत्रा सप्तऋषीन् पर एकम् आहुः ॥ १० ०८२ ०२
यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव तं सम्प्रश्नम् भुवना यन्त्य् अन्या ॥ १० ०८२ ०३
त आयजन्त द्रविणं सम् अस्मा ऋषयः पूर्वे जरितारो न भूना ।
असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्न् इमानि ॥ १० ०८२ ०४
परो दिवा पर एना पृथिव्या परो देवेभिर् असुरैर् यद् अस्ति ।
कं स्विद् गर्भम् प्रथमं दध्र आपो यत्र देवाः समपश्यन्त विश्वे ॥ १० ०८२ ०५
तम् इद् गर्भम् प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभाव् अध्य् एकम् अर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः ॥ १० ०८२ ०६
न तं विदाथ य इमा जजानान्यद् युष्माकम् अन्तरम् बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश् चरन्ति ॥ १० ०८२ ०७

यस् ते मन्यो ऽविधद् वज्र सायक सह ओजः पुष्यति विश्वम् आनुषक् ।
साह्याम दासम् आर्यं त्वया युजा सहस्कृतेन सहसा सहस्वता ॥ १० ०८३ ०१
मन्युर् इन्द्रो मन्युर् एवास देवो मन्युर् होता वरुणो जातवेदाः ।
मन्युं विश ईळते मानुषीर् याः पाहि नो मन्यो तपसा सजोषाः ॥ १० ०८३ ०२
अभीहि मन्यो तवसस् तवीयान् तपसा युजा वि जहि शत्रून् ।
अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्य् आ भरा त्वं नः ॥ १० ०८३ ०३
त्वं हि मन्यो अभिभूत्योजाः स्वयम्भूर् भामो अभिमातिषाहः ।
विश्वचर्षणिः सहुरिः सहावान् अस्मास्व् ओजः पृतनासु धेहि ॥ १० ०८३ ०४
अभागः सन्न् अप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः ।
तं त्वा मन्यो अक्रतुर् जिहीळाहं स्वा तनूर् बलदेयाय मेहि ॥ १० ०८३ ०५
अयं ते अस्म्य् उप मेह्य् अर्वाङ् प्रतीचीनः सहुरे विश्वधायः ।
मन्यो वज्रिन्न् अभि माम् आ ववृत्स्व हनाव दस्यूंर् उत बोध्य् आपेः ॥ १० ०८३ ०६
अभि प्रेहि दक्षिणतो भवा मे ऽधा वृत्राणि जङ्घनाव भूरि ।
जुहोमि ते धरुणम् मध्वो अग्रम् उभा उपांशु प्रथमा पिबाव ॥ १० ०८३ ०७

त्वया मन्यो सरथम् आरुजन्तो हर्षमाणासो धृषिता मरुत्वः ।
तिग्मेषव आयुधा संशिशाना अभि प्र यन्तु नरो अग्निरूपाः ॥ १० ०८४ ०१
अग्निर् इव मन्यो त्विषितः सहस्व सेनानीर् नः सहुरे हूत एधि ।
हत्वाय शत्रून् वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व ॥ १० ०८४ ०२
सहस्व मन्यो अभिमातिम् अस्मे रुजन् मृणन् प्रमृणन् प्रेहि शत्रून् ।
उग्रं ते पाजो नन्व् आ रुरुध्रे वशी वशं नयस एकज त्वम् ॥ १० ०८४ ०३
एको बहूनाम् असि मन्यव् ईळितो विशं-विशं युधये सं शिशाधि ।
अकृत्तरुक् त्वया युजा वयं द्युमन्तं घोषं विजयाय कृण्महे ॥ १० ०८४ ०४
विजेषकृद् इन्द्र इवानवब्रवो ऽस्माकम् मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मा तम् उत्सं यत आबभूथ ॥ १० ०८४ ०५
आभूत्या सहजा वज्र सायक सहो बिभर्ष्य् अभिभूत उत्तरम् ।

क्रत्वा नो मन्यो सह मेद्य् एधि महाधनस्य पुरुहूत संसृजि ॥ १० ०८४ ०६
संसृष्टं धनम् उभयं समाकृतम् अस्मभ्यं दत्तां वरुणश् च मन्युः ।
भियं दधाना हृदयेषु शत्रवः पराजितासो अप नि लयन्ताम् ॥ १० ०८४ ०७

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः ।
ऋतेनादित्यास् तिष्ठन्ति दिवि सोमो अधि श्रितः ॥ १० ०८५ ०१
सोमेनादित्या बलिनः सोमेन पृथिवी मही ।
अथो नक्षत्राणाम् एषाम् उपस्थे सोम आहितः ॥ १० ०८५ ०२
सोमम् मन्यते पपिवान् यत् सम्पिंषन्त्य् ओषधिम् ।
सोमं यम् ब्रह्माणो विदुर् न तस्याश्नाति कश् चन ॥ १० ०८५ ०३
आच्छद्विधानैर् गुपितो बार्हतैः सोम रक्षितः ।
ग्राव्णाम् इच् छृण्वन् तिष्ठसि न ते अश्नाति पार्थिवः ॥ १० ०८५ ०४
यत् त्वा देव प्रपिबन्ति तत आ प्यायसे पुनः ।
वायुः सोमस्य रक्षिता समानाम् मास आकृतिः ॥ १० ०८५ ०५
रैभ्य् आसीद् अनुदेयी नाराशंसी न्योचनी ।
सूर्याया भद्रम् इद् वासो गाथयैति परिष्कृतम् ॥ १० ०८५ ०६
चित्तिर् आ उपबर्हणं चक्षुर् आ अभ्यञ्जनम् ।
द्यौर् भूमिः कोश आसीद् यद् अयात् सूर्या पतिम् ॥ १० ०८५ ०७
स्तोमा आसन् प्रतिधयः कुरीरं छन्द ओपशः ।
सूर्याया अश्विना वराग्निर् आसीत् पुरोगवः ॥ १० ०८५ ०८
सोमो वधूयुर् अभवद् अश्विनास्ताम् उभा वरा ।
सूर्यां यत् पत्ये शंसन्तीम् मनसा सविताददात् ॥ १० ०८५ ०९
मनो अस्या अन आसीद् द्यौर् आसीद् उत छदिः ।
शुक्राव् अनड्वाहाव् आस्तां यद् अयात् सूर्या गृहम् ॥ १० ०८५ १०
ऋक्सामाभ्याम् अभिहितौ गावौ ते सामनाव् इतः ।
श्रोत्रं ते चक्रे आस्तां दिवि पन्थाश् चराचारः ॥ १० ०८५ ११
शुची ते चक्रे यात्या व्यानो अक्ष आहतः ।

अनो मनस्मयं सूर्यारोहत् प्रयती पतिम् ॥ १० ०८५ १२
सूर्याया वहतुः प्रागात् सविता यम् अवासृजत् ।
अघासु हन्यन्ते गावो ऽर्जुन्योः पर्य् उह्यते ॥ १० ०८५ १३
यद् अश्विना पृच्छमानाव् अयातं त्रिचक्रेण वहतुं सूर्यायाः ।
विश्वे देवा अनु तद् वाम् अजानन् पुत्रः पितराव् अवृणीत पूषा ॥ १० ०८५ १४
यद् अयातं शुभस् पती वरेयं सूर्याम् उप ।
क्वैकं चक्रं वाम् आसीत् क्व देष्ट्राय तस्थथुः ॥ १० ०८५ १५
द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः ।
अथैकं चक्रं यद् गुहा तद् अद्धातय इद् विदुः ॥ १० ०८५ १६
सूर्यायै देवेभ्यो मित्राय वरुणाय च ।
ये भूतस्य प्रचेतस इदं तेभ्यो ऽकरं नमः ॥ १० ०८५ १७
पूर्वापरं चरतो माययैतौ शिशू क्रीळन्तौ परि यातो अध्वरम् ।
विश्वान्य् अन्यो भुवनाभिचष्ट ऋतूर् अन्यो विदधज् जायते पुनः ॥ १० ०८५ १८
नवो-नवो भवति जायमानो ऽह्नां केतुर् उषसाम् एत्य् अग्रम् ।
भागं देवेभ्यो वि दधात्य् आयन् प्र चन्द्रमास् तिरते दीर्घम् आयुः ॥ १० ०८५ १९
सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ।
आ रोह सूर्ये अमृतस्य लोकं स्योनम् पत्ये वहतुं कृणुष्व ॥ १० ०८५ २०
उद् ईर्ष्वातः पतिवती ह्य् ए३षा विश्वावसुं नमसा गीर्भिर् ईळे ।
अन्याम् इच्छ पितृषदं व्यक्तां स ते भागो जनुषा तस्य विद्धि ॥ १० ०८५ २१
उद् ईर्ष्वातो विश्वावसो नमसेळा महे त्वा ।
अन्याम् इच्छ प्रफर्व्य१ं सं जायाम् पत्या सृज ॥ १० ०८५ २२
अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम् ।
सम् अर्यमा सम् भगो नो निनीयात् सं जास्पत्यं सुयमम् अस्तु देवाः ॥ १० ०८५ २३
प्र त्वा मुञ्चामि वरुणस्य पाशाद् येन त्वाबध्नात् सविता सुशेवः ।
ऋतस्य योनौ सुकृतस्य लोके ऽरिष्टां त्वा सह पत्या दधामि ॥ १० ०८५ २४
प्रेतो मुञ्चामि नामुतः सुबद्धाम् अमुतस् करम् ।
यथेयम् इन्द्र मीढ्वः सुपुत्रा सुभगासति ॥ १० ०८५ २५
पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन ।

गृहान् गच्छ गृहपत्नी यथासो वशिनी त्वं विदथम् आ वदासि ॥ १० ०८५ २६
इह प्रियम् प्रजया ते सम् ऋध्यताम् अस्मिन् गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्व १ं सं सृजस्वाधा जिव्री विदथम् आ वदाथः ॥ १० ०८५ २७
नीललोहितम् भवति कृत्यासक्तिर् व्य् अज्यते ।
एधन्ते अस्या ज्ञातयः पतिर् बन्धेषु बध्यते ॥ १० ०८५ २८
परा देहि शामुल्यम् ब्रह्मभ्यो वि भजा वसु ।
कृत्यैषा पद्वती भूत्व्य् आ जाया विशते पतिम् ॥ १० ०८५ २९
अश्रीरा तनूर् भवति रुशती पापयामुया ।
पतिर् यद् वध्वो ३ वाससा स्वम् अङ्गम् अभिधित्सते ॥ १० ०८५ ३०
ये वध्वश् चन्द्रं वहतुं यक्ष्मा यन्ति जनाद् अनु ।
पुनस् तान् यज्ञिया देवा नयन्तु यत आगताः ॥ १० ०८५ ३१
मा विदन् परिपन्थिनो य आसीदन्ति दम्पती ।
सुगेभिर् दुर्गम् अतीताम् अप द्रान्त्व् अरातयः ॥ १० ०८५ ३२
सुमङ्गलीर् इयं वधूर् इमां समेत पश्यत ।
सौभाग्यम् अस्यै दत्त्वायाथास्तं वि परेतन ॥ १० ०८५ ३३
तृष्टम् एतत् कटुकम् एतद् अपाष्ठवद् विषवन् नैतद् अत्तवे ।
सूर्यां यो ब्रह्मा विद्यात् स इद् वाधूयम् अर्हति ॥ १० ०८५ ३४
आशसनं विशसनम् अथो अधिविकर्तनम् ।
सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुन्धति ॥ १० ०८५ ३५
गृभ्णामि ते सौभगत्वाय हस्तम् मया पत्या जरदष्टिर् यथासः ।
भगो अर्यमा सविता पुरंधिर् मह्यं त्वादुर् गार्हपत्याय देवाः ॥ १० ०८५ ३६
ताम् पूषञ् छिवतमाम् एरयस्व यस्याम् बीजम् मनुष्या ३ वपन्ति ।
या न ऊरू उशती विश्रयाति यस्याम् उशन्तः प्रहराम शेपम् ॥ १० ०८५ ३७
तुभ्यम् अग्रे पर्य् अवहन् सूर्यां वहतुना सह ।
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥ १० ०८५ ३८
पुनः पत्नीम् अग्निर् अदाद् आयुषा सह वर्चसा ।
दीर्घायुर् अस्या यः पतिर् जीवाति शरदः शतम् ॥ १० ०८५ ३९
सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः ।

तृतीयो अग्निष् टे पतिस् तुरीयस् ते मनुष्यजाः ॥ १० ०८५ ४०
सोमो ददद् गन्धर्वाय गन्धर्वो ददद् अग्नये ।
रयिं च पुत्रांश् चादाद् अग्निर् मह्यम् अथो इमाम् ॥ १० ०८५ ४१
इहैव स्तम् मा वि यौष्टं विश्वम् आयुर् व्य् अश्नुतम् ।
क्रीळन्तौ पुत्रैर् नप्तृभिर् मोदमानौ स्वे गृहे ॥ १० ०८५ ४२
आ नः प्रजां जनयतु प्रजापतिर् आजरसाय सम् अनक्त्व् अर्यमा ।
अदुर्मङ्गलीः पतिलोकम् आ विश शं नो भव द्विपदे शं चतुष्पदे ॥ १० ०८५ ४३
अघोरचक्षुर् अपतिघ्न्य् एधि शिवा पशुभ्यः सुमनाः सुवर्चाः ।
वीरसूर् देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥ १० ०८५ ४४
इमां त्वम् इन्द्र मीढ्वः सुपुत्रां सुभगां कृणु ।
दशास्याम् पुत्रान् आ धेहि पतिम् एकादशं कृधि ॥ १० ०८५ ४५
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वाम् भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥ १० ०८५ ४६
सम् अञ्जन्तु विश्वे देवाः सम् आपो हृदयानि नौ ।
सम् मातरिश्वा सं धाता सम् उ देष्ट्री दधातु नौ ॥ १० ०८५ ४७

वि हि सोतोर् असृक्षत नेन्द्रं देवम् अमंसत ।
यत्रामदद् वृषाकपिर् अर्यः पुष्टेषु मत्सखा विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ ०१
परा हीन्द्र धावसि वृषाकपेर् अति व्यथिः ।
नो अह प्र विन्दस्य् अन्यत्र सोमपीतये विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ ०२
किम् अयं त्वां वृषाकपिश् चकार हरितो मृगः ।
यस्मा इरस्यसीद् उ न्व् अ १ र्यो वा पुष्टिमद् वसु विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ ०३
यम् इमं त्वं वृषाकपिम् प्रियम् इन्द्राभिरक्षसि ।
श्वा न्व् अस्य जम्भिषद् अपि कर्णे वराहयुर् विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ ०४
प्रिया तष्टानि मे कपिर् व्यक्ता व्य् अदूदुषत् ।
शिरो न्व् अस्य राविषं न सुगं दुष्कृते भुवं विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ ०५

न मत् स्त्री सुभसत्तरा न सुयाशुतरा भुवत् ।
न मत् प्रतिच्यवीयसी न सक्थ्य् उद्यमीयसी विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ ०६
उवे अम्ब सुलाभिके यथेवाङ्ग भविष्यति ।
भसन् मे अम्ब सक्थि मे शिरो मे वीव हृष्यति विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ ०७
किं सुबाहो स्वङ्गुरे पृथुष्टो पृथुजाघने ।
किं शूरपत्नि नस् त्वम् अभ्य् अमीषि वृषाकपिं विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ ०८
अवीराम् इव माम् अयं शरारुर् अभि मन्यते ।
उताहम् अस्मि वीरिणीन्द्रपत्नी मरुत्सखा विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ ०९
संहोत्रं स्म पुरा नारी समनं वाव गच्छति ।
वेधा ऋतस्य वीरिणीन्द्रपत्नी महीयते विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ १०
इन्द्राणीम् आसु नारिषु सुभगाम् अहम् अश्रवम् ।
नह्य् अस्या अपरं चन जरसा मरते पतिर् विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ ११
नाहम् इन्द्राणि रारण सख्युर् वृषाकपेर् ऋते ।
यस्येदम् अप्यं हविः प्रियं देवेषु गच्छति विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ १२
वृषाकपायि रेवति सुपुत्र आद् उ सुस्नुषे ।
घसत् त इन्द्र उक्षणः प्रियं काचित्करं हविर् विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ १३
उक्ष्णो हि मे पञ्चदश साकम् पचन्ति विंशतिम् ।
उताहम् अद्मि पीव इद् उभा कुक्षी पृणन्ति मे विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ १४
वृषभो न तिग्मशृङ्गो ऽन्तर् यूथेषु रोरुवत् ।
मन्थस् त इन्द्र शं हृदे यं ते सुनोति भावयुर् विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ १५
न सेशे यस्य रम्बते ऽन्तरा सक्थ्या ३ कपृत् ।
सेद् ईशे यस्य रोमशं निषेदुषो विजृम्भते विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ १६
न सेशे यस्य रोमशं निषेदुषो विजृम्भते ।
सेद् ईशे यस्य रम्बते ऽन्तरा सक्थ्या ३ कपृद् विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ १७
अयम् इन्द्र वृषाकपिः परस्वन्तं हतं विदत् ।
असिं सूनां नवं चरुम् आद् एधस्यान आचितं विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ १८
अयम् एमि विचाकशद् विचिन्वन् दासम् आर्यम् ।
पिबामि पाकसुत्वनो ऽभि धीरम् अचाकशं विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ १९

धन्व च यत् कृन्तत्रं च कति स्वित् ता वि योजना ।
नेदीयसो वृषाकपे ऽस्तम् एहि गृहाँ उप विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ २०
पुनर् एहि वृषाकपे सुविता कल्पयावहै ।
य एष स्वप्ननंशनो ऽस्तम् एषि पथा पुनर् विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ २१
यद् उदञ्चो वृषाकपे गृहम् इन्द्राजगन्तन ।
क्व१ स्य पुल्वघो मृगः कम् अगञ् जनयोपनो विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ २२
पर्शुर् ह नाम मानवी साकं ससूव विंशतिम् ।
भद्रम् भल त्यस्या अभूद् यस्या उदरम् आमयद् विश्वस्माद् इन्द्र उत्तरः ॥ १० ०८६ २३

रक्षोहणं वाजिनम् आ जिघर्मि मित्रम् प्रथिष्ठम् उप यामि शर्म ।
शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम् ॥ १० ०८७ ०१
अयोदंष्ट्रो अर्चिषा यातुधानान् उप स्पृश जातवेदः समिद्धः ।
आ जिह्वया मूरदेवान् रभस्व क्रव्यादो वृक्त्व्य् अपि धत्स्वासन् ॥ १० ०८७ ०२
उभोभयाविन्न् उप धेहि दंष्ट्रा हिंस्रः शिशानो ऽवरम् परं च ।
उतान्तरिक्षे परि याहि राजञ् जम्भैः सं धेह्य् अभि यातुधानान् ॥ १० ०८७ ०३
यज्ञैर् इषूः संनममानो अग्ने वाचा शल्याँ अशनिभिर् दिहानः ।
ताभिर् विध्य हृदये यातुधानान् प्रतीचो बाहून् प्रति भङ्ध्य् एषाम् ॥ १० ०८७ ०४
अग्ने त्वचं यातुधानस्य भिन्धि हिंस्राशनिर् हरसा हन्त्व् एनम् ।
प्र पर्वाणि जातवेदः शृणीहि क्रव्यात् क्रविष्णुर् वि चिनोतु वृक्णम् ॥ १० ०८७ ०५
यत्रेदानीम् पश्यसि जातवेदस् तिष्ठन्तम् अग्न उत वा चरन्तम् ।
यद् वान्तरिक्षे पथिभिः पतन्तं तम् अस्ता विध्य शर्वा शिशानः ॥ १० ०८७ ०६
उतालब्धं स्पृणुहि जातवेद आलेभानाद् ऋष्टिभिर् यातुधानात् ।
अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विङ्कास् तम् अदन्त्व् एनीः ॥ १० ०८७ ०७
इह प्र ब्रूहि यतमः सो अग्ने यो यातुधानो य इदं कृणोति ।
तम् आ रभस्व समिधा यविष्ठ नृचक्षसश् चक्षुषे रन्धयैनम् ॥ १० ०८७ ०८
तीक्ष्णेनाग्ने चक्षुषा रक्ष यज्ञम् प्राञ्चं वसुभ्यः प्र णय प्रचेतः ।
हिंस्रं रक्षांस्य् अभि शोशुचानम् मा त्वा दभन् यातुधाना नृचक्षः ॥ १० ०८७ ०९

नृचक्षा रक्षः परि पश्य विक्षु तस्य त्रीणि प्रति शृणीह्य अग्रा ।
तस्याग्ने पृष्टीर् हरसा शृणीहि त्रेधा मूलं यातुधानस्य वृश्च ॥ १० ०८७ १०
त्रिर् यातुधानः प्रसितिं त एत्व् ऋतं यो अग्ने अनृतेन हन्ति ।
तम् अर्चिषा स्फूर्जयञ् जातवेदः समक्षम् एनं गृणते नि वृङ्धि ॥ १० ०८७ ११
तद् अग्ने चक्षुः प्रति धेहि रेभे शफारुजं येन पश्यसि यातुधानम् ।
अथर्ववज् ज्योतिषा दैव्येन सत्यं धूर्वन्तम् अचितं न्य् ओष ॥ १० ०८७ १२
यद् अग्ने अद्य मिथुना शपातो यद् वाचस् तृष्टं जनयन्त रेभाः ।
मन्योर् मनसः शरव्या ३ जायते या तया विध्य हृदये यातुधानान् ॥ १० ०८७ १३
परा शृणीहि तपसा यातुधानान् पराग्ने रक्षो हरसा शृणीहि ।
परार्चिषा मूरदेवाञ् छृणीहि परासुतृपो अभि शोशुचानः ॥ १० ०८७ १४
पराद्य देवा वृजिनं शृणन्तु प्रत्यग् एनं शपथा यन्तु तृष्टाः ।
वाचास्तेनं शरव ऋच्छन्तु मर्मन् विश्वस्यैतु प्रसितिं यातुधानः ॥ १० ०८७ १५
यः पौरुषेयेण क्रविषा समङ्क्ते यो अश्व्येन पशुना यातुधानः ।
यो अघ्न्याया भरति क्षीरम् अग्ने तेषां शीर्षाणि हरसापि वृश्च ॥ १० ०८७ १६
संवत्सरीणम् पय उस्रियायास् तस्य माशीद् यातुधानो नृचक्षः ।
पीयूषम् अग्ने यतमस् तितृप्सात् तम् प्रत्यञ्चम् अर्चिषा विध्य मर्मन् ॥ १० ०८७ १७
विषं गवां यातुधानाः पिबन्त्व् आ वृश्च्यन्ताम् अदितये दुरेवाः ।
परैनान् देवः सविता ददातु परा भागम् ओषधीनां जयन्ताम् ॥ १० ०८७ १८
सनाद् अग्ने मृणसि यातुधानान् न त्वा रक्षांसि पृतनासु जिग्युः ।
अनु दह सहमूरान् क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ॥ १० ०८७ १९
त्वं नो अग्ने अधराद् उदक्तात् त्वम् पश्चाद् उत रक्षा पुरस्तात् ।
प्रति ते ते अजरासस् तपिष्ठा अघशंसं शोशुचतो दहन्तु ॥ १० ०८७ २०
पश्चात् पुरस्ताद् अधराद् उदक्तात् कविः काव्येन परि पाहि राजन् ।
सखे सखायम् अजरो जरिम्णे ऽग्ने मर्ताँ अमर्त्यस् त्वं नः ॥ १० ०८७ २१
परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि ।
धृषद्वर्णं दिवे-दिवे हन्तारम् भङ्गुरावताम् ॥ १० ०८७ २२
विषेण भङ्गुरावतः प्रति ष्म रक्षसो दह ।
अग्ने तिग्मेन शोचिषा तपुरग्राभिर् ऋष्टिभिः ॥ १० ०८७ २३

प्रत्य् अग्ने मिथुना दह यातुधाना किमीदिना ।
सं त्वा शिशामि जागृह्य् अदब्धं विप्र मन्मभिः ॥ १० ०८७ २४
प्रत्य् अग्ने हरसा हरः शृणीहि विश्वतः प्रति ।
यातुधानस्य रक्षसो बलं वि रुज वीर्यम् ॥ १० ०८७ २५

हविष् पान्तम् अजरं स्वर्विदि दिविस्पृश्य् आहुतं जुष्टम् अग्नौ ।
तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथन्त ॥ १० ०८८ ०१
गीर्णम् भुवनं तमसापगूळ्हम् आविः स्वर् अभवज् जाते अग्नौ ।
तस्य देवाः पृथिवी द्यौर् उतापो ऽरणयन्न् ओषधीः सख्ये अस्य ॥ १० ०८८ ०२
देवेभिर् न्व् ऐषितो यज्ञियेभिर् अग्निं स्तोषाण्य् अजरम् बृहन्तम् ।
यो भानुना पृथिवीं द्याम् उतेमाम् आततान रोदसी अन्तरिक्षम् ॥ १० ०८८ ०३
यो होतासीत् प्रथमो देवजुष्टो यं समाञ्जन्न् आज्येना वृणानाः ।
स पतत्रीत्वरं स्था जगद् यच् छ्वात्रम् अग्निर् अकृणोज् जातवेदाः ॥ १० ०८८ ०४
यज् जातवेदो भुवनस्य मूर्धन्न् अतिष्ठो अग्ने सह रोचनेन ।
तं त्वाहेम मतिभिर् गीर्भिर् उक्थैः स यज्ञियो अभवो रोदसिप्राः ॥ १० ०८८ ०५
मूर्धा भुवो भवति नक्तम् अग्निस् ततः सूर्यो जायते प्रातर् उद्यन् ।
मायाम् ऊ तु यज्ञियानाम् एताम् अपो यत् तूर्णिश् चरति प्रजानन् ॥ १० ०८८ ०६
दृशेन्यो यो महिना समिद्धो ऽरोचत दिवियोनिर् विभावा ।
तस्मिन्न् अग्नौ सूक्तवाकेन देवा हविर् विश्व आजुहवुस् तनूपाः ॥ १० ०८८ ०७
सूक्तवाकम् प्रथमम् आद् इद् अग्निम् आद् इद् धविर् अजनयन्त देवाः ।
स एषां यज्ञो अभवत् तनूपास् तं द्यौर् वेद तम् पृथिवी तम् आपः ॥ १० ०८८ ०८
यं देवासो ऽजनयन्ताग्निं यस्मिन्न् आजुहवुर् भुवनानि विश्वा ।
सो अर्चिषा पृथिवीं द्याम् उतेमाम् ऋजूयमानो अतपन् महित्वा ॥ १० ०८८ ०९
स्तोमेन हि दिवि देवासो अग्निम् अजीजनञ् छक्तिभी रोदसिप्राम् ।
तम् ऊ अकृण्वन् त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः ॥ १० ०८८ १०
यदेद् एनम् अदधुर् यज्ञियासो दिवि देवाः सूर्यम् आदितेयम् ।
यदा चरिष्णू मिथुनाव् अभूताम् आद् इत् प्रापश्यन् भुवनानि विश्वा ॥ १० ०८८ ११

विश्वस्मा अग्निम् भुवनाय देवा वैश्वानरं केतुम् अह्नाम् अकृण्वन् ।
आ यस् ततानोषसो विभातीर् अपो ऊर्णोति तमो अर्चिषा यन् ॥ १० ०८८ १२
वैश्वानरं कवयो यज्ञियासो ऽग्निं देवा अजनयन्न् अजुर्यम् ।
नक्षत्रम् प्रत्नम् अमिनच् चरिष्णु यक्षस्याध्यक्षं तविषम् बृहन्तम् ॥ १० ०८८ १३
वैश्वानरं विश्वहा दीदिवांसम् मन्त्रैर् अग्निं कविम् अच्छा वदामः ।
यो महिम्ना परिबभूवोर्वी उतावस्ताद् उत देवः परस्तात् ॥ १० ०८८ १४
द्वे स्रुती अशृणवम् पितॄणाम् अहं देवानाम् उत मर्त्यानाम् ।
ताभ्याम् इदं विश्वम् एजत् सम् एति यद् अन्तरा पितरम् मातरं च ॥ १० ०८८ १५
द्वे समीची बिभृतश् चरन्तं शीर्षतो जातम् मनसा विमृष्टम् ।
स प्रत्यङ् विश्वा भुवनानि तस्थाव् अप्रयुच्छन् तरणिर् भ्राजमानः ॥ १० ०८८ १६
यत्रा वदेते अवरः परश् च यज्ञन्योः कतरो नौ वि वेद ।
आ शेकुर् इत् सधमादं सखायो नक्षन्त यज्ञं क इदं वि वोचत् ॥ १० ०८८ १७
कत्य् अग्नयः कति सूर्यासः कत्य् उषासः कत्य् उ स्विद् आपः ।
नोपस्पिजं वः पितरो वदामि पृच्छामि वः कवयो विद्मने कम् ॥ १० ०८८ १८
यावन्मात्रम् उषसो न प्रतीकं सुपर्ण्यो ३ वसते मातरिश्वः ।
तावद् दधात्य् उप यज्ञम् आयन् ब्राह्मणो होतुर् अवरो निषीदन् ॥ १० ०८८ १९

इन्द्रं स्तवा नृतमं यस्य मह्ना विबबाधे रोचना वि ज्मो अन्तान् ।
आ यः पप्रौ चर्षणीधृद् वरोभिः प्र सिन्धुभ्यो रिरिचानो महित्वा ॥ १० ०८९ ०१
स सूर्यः पर्य् उरू वरांस्य् एन्द्रो ववृत्याद् रथ्येव चक्रा ।
अतिष्ठन्तम् अपस्य १ं न सर्गं कृष्णा तमांसि त्विष्या जघान ॥ १० ०८९ ०२
समानम् अस्मा अनपावृद् अर्च क्ष्मया दिवो असमम् ब्रह्म नव्यम् ।
वि यः पृष्ठेव जनिमान्य् अर्य इन्द्रश् चिकाय न सखायम् ईषे ॥ १० ०८९ ०३
इन्द्राय गिरो अनिशितसर्गा अपः प्रेरयं सगरस्य बुध्नात् ।
यो अक्षेणेव चक्रिया शचीभिर् विष्वक् तस्तम्भ पृथिवीम् उत द्याम् ॥ १० ०८९ ०४
आपान्तमन्युस् तृपलप्रभर्मा धुनिः शिमीवाञ् छरुमाँ ऋजीषी ।
सोमो विश्वान्य् अतसा वनानि नार्वाग् इन्द्रम् प्रतिमानानि देभुः ॥ १० ०८९ ०५

न यस्य द्यावापृथिवी न धन्व नान्तरिक्षं नाद्रयः सोमो अक्षाः ।
यद् अस्य मन्युर् अधिनीयमानः शृणाति वीळु रुजति स्थिराणि ॥ १० ०८९ ०६
जघान वृत्रं स्वधितिर् वनेव रुरोज पुरो अरदन् न सिन्धून् ।
बिभेद गिरिं नवम् इन् न कुम्भम् आ गा इन्द्रो अकृणुत स्वयुग्भिः ॥ १० ०८९ ०७
त्वं ह त्यद् ऋणया इन्द्र धीरो ऽसिर् न पर्व वृजिना शृणासि ।
प्र ये मित्रस्य वरुणस्य धाम युजं न जना मिनन्ति मित्रम् ॥ १० ०८९ ०८
प्र ये मित्रम् प्रार्यमणं दुरेवाः प्र संगिरः प्र वरुणम् मिनन्ति ।
न्य् अ १ मित्रेषु वधम् इन्द्र तुम्रं वृषन् वृषाणम् अरुषं शिशीहि ॥ १० ०८९ ०९
इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपाम् इन्द्र इत् पर्वतानाम् ।
इन्द्रो वृधाम् इन्द्र इन् मेधिराणाम् इन्द्रः क्षेमे योगे हव्य इन्द्रः ॥ १० ०८९ १०
प्राक्तुभ्य इन्द्रः प्र वृधो अहभ्यः प्रान्तरिक्षात् प्र समुद्रस्य धासेः ।
प्र वातस्य प्रथसः प्र ज्मो अन्तात् प्र सिन्धुभ्यो रिरिचे प्र क्षितिभ्यः ॥ १० ०८९ ११
प्र शोशुचत्या उषसो न केतुर् असिन्वा ते वर्तताम् इन्द्र हेतिः ।
अश्मेव विध्य दिव आ सृजानस् तपिष्ठेन हेषसा द्रोघमित्रान् ॥ १० ०८९ १२
अन्व् अह मासा अन्व् इद् वनान्य् अन्व् ओषधीर् अनु पर्वतासः ।
अन्व् इन्द्रं रोदसी वावशाने अन्व् आपो अजिहत जायमानम् ॥ १० ०८९ १३
कर्हि स्वित् सा त इन्द्र चेत्यासद् अघस्य यद् भिनदो रक्ष एषत् ।
मित्रक्रुवो यच् छसने न गावः पृथिव्या आपृग् अमुया शयन्ते ॥ १० ०८९ १४
शत्रूयन्तो अभि ये नस् ततस्रे महि व्राधन्त ओगणास इन्द्र ।
अन्धेनामित्रास् तमसा सचन्तां सुज्योतिषो अक्तवस् ताँ अभि ष्युः ॥ १० ०८९ १५
पुरूणि हि त्वा सवना जनानाम् ब्रह्माणि मन्दन् गृणताम् ऋषीणाम् ।
इमाम् आघोषन्न् अवसा सहूतिं तिरो विश्वाँ अर्चतो याह्य अर्वाङ् ॥ १० ०८९ १६
एवा ते वयम् इन्द्र भुञ्जतीनां विद्याम सुमतीनां नवानाम् ।
विद्याम वस्तोर् अवसा गृणन्तो विश्वामित्रा उत त इन्द्र नूनम् ॥ १० ०८९ १७
शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ १० ०८९ १८

स॒हस्र॑शीर्षा॒ पुरु॑षः सहस्रा॒क्षः स॒हस्र॑पात् ।
स भूमिं॑ वि॒श्वतो॑ वृ॒त्वात्य् अ॑तिष्ठद् दशाङ्गु॒लम् ॥ १० ०९० ०१
पुरु॑ष ए॒वेदं सर्वं॒ यद् भू॒तं यच् च॒ भव्य॑म् ।
उ॒तामृ॑त॒त्वस्येशा॑नो॒ यद् अन्ने॑नाति॒रोह॑ति ॥ १० ०९० ०२
ए॒तावा॑न् अस्य महि॒मातो॒ ज्यायाँ॑श् च॒ पूरु॑षः ।
पादो॑ ऽस्य॒ विश्वा॑ भू॒तानि॑ त्रि॒पाद् अ॑स्या॒मृतं॑ दि॒वि ॥ १० ०९० ०३
त्रि॒पाद् ऊ॒र्ध्व उद् ऐ॒त् पुरु॑षः॒ पादो॑ ऽस्ये॒हाभ॑व॒त् पुनः॑ ।
ततो॒ विष्व॒ङ् व्य् अ॑क्रामत् साशनानश॒ने अ॒भि ॥ १० ०९० ०४
तस्मा॑द् वि॒राळ् अ॑जायत वि॒राजो॒ अधि॒ पूरु॑षः ।
स जा॒तो अत्य् अ॑रिच्यत प॒श्चाद् भूमि॒म् अथो॑ पु॒रः ॥ १० ०९० ०५
यत् पुरु॑षेण ह॒विषा॑ दे॒वा य॒ज्ञम् अत॑न्वत ।
व॒स॒न्तो अ॑स्यासी॒द् आज्यं॑ ग्री॒ष्म इ॒ध्मः श॒रद् ध॒विः ॥ १० ०९० ०६
तं य॒ज्ञम् ब॒र्हिषि॒ प्रौक्ष॒न् पुरु॑षं जा॒तम् अ॑ग्र॒तः ।
तेन॑ दे॒वा अ॑यजन्त सा॒ध्या ऋष॑यश् च॒ ये ॥ १० ०९० ०७
तस्मा॑द् य॒ज्ञात् स॑र्व॒हुतः॒ सम्भृ॑तम् पृषदा॒ज्यम् ।
प॒शून् तांश् च॑क्रे वाय॒व्यान् आ॑र॒ण्यान् ग्रा॒म्याश् च॒ ये ॥ १० ०९० ०८
तस्मा॑द् य॒ज्ञात् स॑र्व॒हुत॒ ऋचः॒ सामा॑नि जज्ञिरे ।
छन्दां॑सि जज्ञिरे॒ तस्मा॒द् यजु॒स् तस्मा॑द् अजायत ॥ १० ०९० ०९
तस्मा॒द् अश्वा॑ अजायन्त॒ ये के चो॑भ॒याद॑तः ।
गावो॑ ह जज्ञिरे॒ तस्मा॒त् तस्मा॑ज् जा॒ता अ॑जा॒वयः॑ ॥ १० ०९० १०
यत् पुरु॑षं॒ व्य् अद॑धुः कति॒धा व्य् अ॑कल्पयन् ।
मुखं॒ किम् अ॑स्य॒ कौ बा॒हू का ऊ॒रू पादा॑ उच्येते ॥ १० ०९० ११
ब्रा॒ह्म॒णो ऽस्य॒ मुख॑म् आसीद् बा॒हू रा॑ज॒न्यः कृ॒तः ।
ऊ॒रू तद् अ॑स्य॒ यद् वैश्यः॑ प॒द्भ्यां शू॒द्रो अ॑जायत ॥ १० ०९० १२
च॒न्द्रमा॒ मन॑सो जा॒तश् चक्षोः॒ सूर्यो॑ अजायत ।
मुखा॒द् इन्द्र॑श् चा॒ग्निश् च॑ प्रा॒णाद् वा॒युर् अ॑जायत ॥ १० ०९० १३
नाभ्या॑ आसीद् अ॒न्तरि॑क्षं शी॒र्ष्णो द्यौः सम् अ॑वर्तत ।
प॒द्भ्याम् भूमि॒र् दिशः॒ श्रोत्रा॒त् तथा॑ लो॒काँ अ॑कल्पयन् ॥ १० ०९० १४

स॒प्तास्या॑सन् परि॒धय॒स् त्रिः स॒प्त स॒मिधः॑ कृ॒ताः ।
दे॒वा यद् य॒ज्ञं त॑न्वा॒ना अब॑ध्न॒न् पुरु॑षम् प॒शुम् ॥ १० ०९० १५
य॒ज्ञेन॑ य॒ज्ञम् अ॑यजन्त दे॒वास् तानि॒ धर्मा॑णि प्रथ॒मान्य् आ॑सन् ।
ते ह॒ नाकं॑ महि॒मानः॑ सचन्त॒ यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः ॥ १० ०९० १६

सं जा॑गृ॒वद्भि॒र् जर॑माण इध्यते॒ दमे॒ दमू॑ना इ॒षय॑न्न् इ॒ळस् प॒दे ।
विश्व॑स्य॒ होता॑ ह॒विषो॒ वरे॑ण्यो वि॒भुर् वि॒भावा॑ सु॒षखा॑ सखीय॒ते ॥ १० ०९१ ०१
स द॑र्श॒तश्री॒र् अति॑थिर् गृ॒हे-गृ॑हे॒ वने॑-वने शिश्रिये तक्व॒वीर् इ॑व ।
जनं॑-जनं॒ जन्यो॒ नाति॑ मन्यते॒ विश॒ आ क्षे॑ति वि॒श्यो॒३॒॑ विशं॑-विशम् ॥ १० ०९१ ०२
सु॒दक्षो॒ दक्षैः॒ क्रतु॑नासि सु॒क्रतु॒र् अग्ने॑ क॒विः काव्ये॑नासि विश्व॒वित् ।
वसु॒र् वसू॑नां क्षयसि॒ त्वम् एक॒ इद् द्यावा॑ च॒ यानि॑ पृथि॒वी च॒ पुष्य॑तः ॥ १० ०९१ ०३
प्र॒जा॒नन्न् अ॑ग्ने॒ तव॒ योनि॑म् ऋ॒त्विय॑म् इळा॑यास् प॒दे घृ॒तव॑न्तम् आस॑दः ।
आ ते॑ चिकित्र उ॒षसा॑म् इ॒वेत॑यो ऽरे॒पसः॒ सूर्य॑स्येव र॒श्मयः॑ ॥ १० ०९१ ०४
तव॒ श्रियो॑ व॒र्ष्यस्येव वि॒द्युत॑श् चि॒त्राश् चि॑कित्र उ॒षसां॒ न के॒तवः॑ ।
यद् ओष॑धीर् अ॒भिसृ॑ष्टो॒ वना॑नि च॒ परि॑ स्व॒यं चि॑नु॒षे अन्न॑म् आ॒स्ये ॥ १० ०९१ ०५
तम् ओष॑धीर् दधिरे॒ गर्भ॑म् ऋ॒त्वियं॒ तम् आपो॑ अ॒ग्निं ज॑नयन्त मा॒तरः॑ ।
तम् इत् स॑मा॒नं व॒निन॑श् च वी॒रुधो॑ ऽन्तर्व॑तीश् च॒ सुव॑ते च वि॒श्वहा॑ ॥ १० ०९१ ०६
वातो॑पधूत इषि॒तो वशाँ॒ अनु॑ तृ॒षु यद् अन्ना॒ वेवि॑षद् वि॒तिष्ठ॑से ।
आ ते॑ यतन्ते र॒थ्यो॒३॒॑ यथा॒ पृथ॒क् छर्धां॑स्य् अग्ने अ॒जरा॑णि॒ धक्ष॑तः ॥ १० ०९१ ०७
मे॒धा॒का॒रं वि॒दथ॑स्य प्र॒साध॑नम् अ॒ग्निं होता॑रम् परि॒भूत॑मम् म॒तिम् ।
तम् इद् अर्भे॑ ह॒विष्य् आ स॑मा॒नम् इत् तम् इन् म॒हे वृ॑णते॒ नान्यं त्वत् ॥ १० ०९१ ०८
त्वाम् इद् अत्र॑ वृणते त्वा॒यवो॒ होता॑रम् अग्ने वि॒दथे॑षु वे॒धसः॑ ।
यद् दे॑व॒यन्तो॒ दध॑ति॒ प्रयां॑सि ते ह॒विष्म॑न्तो॒ मन॑वो वृ॒क्तब॑र्हिषः ॥ १० ०९१ ०९
तवा॑ग्ने हो॒त्रं तव॑ पो॒त्रम् ऋ॒त्वियं॒ तव॑ ने॒ष्ट्रं त्वम् अ॒ग्निद् ऋ॑ताय॒तः ।
तव॑ प्रशा॒स्त्रं त्वम् अ॑ध्वरीयसि ब्र॒ह्मा चासि॑ गृ॒हप॑तिश् च नो॒ दमे॑ ॥ १० ०९१ १०
यस् तुभ्य॑म् अग्ने अ॒मृता॑य॒ मर्त्यः॑ स॒मिधा॒ दाश॑द् उ॒त वा॑ ह॒विष्कृ॑ति ।
तस्य॒ होता॑ भवसि॒ यासि॑ दू॒त्य॒१॒॑म् उप॑ ब्रूषे॒ यज॑स्य् अध्वरी॒यसि॑ ॥ १० ०९१ ११

इमा अस्मै मतयो वाचो अस्मद् आँ ऋचो गिरः सुष्टुतयः सम् अग्मत ।
वसूयवो वसवे जातवेदसे वृद्धासु चिद् वर्धनो यासु चाकनत् ॥ १० ०९१ १२
इमाम् प्रत्नाय सुष्टुतिं नवीयसीं वोचेयम् अस्मा उशते शृणोतु नः ।
भूया अन्तरा हृद्य् अस्य निस्पृशे जायेव पत्य उशती सुवासाः ॥ १० ०९१ १३
यस्मिन्न् अश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुम् अग्नये ॥ १० ०९१ १४
अहाव्य् अग्ने हविर् आस्ये ते स्रुचीव घृतं चम्वीव सोमः ।
वाजसनिं रयिम् अस्मे सुवीरम् प्रशस्तं धेहि यशसम् बृहन्तम् ॥ १० ०९१ १५

यज्ञस्य वो रथ्यं विश्पतिं विशां होतारम् अक्तोर् अतिथिं विभावसुम् ।
शोचञ् छुष्कासु हरिणीषु जर्भुरद् वृषा केतुर् यजतो द्याम् अशायत ॥ १० ०९२ ०१
इमम् अञ्जस्पाम् उभये अकृण्वत धर्माणम् अग्निं विदथस्य साधनम् ।
अक्तुं न यह्वम् उषसः पुरोहितं तनूनपातम् अरुषस्य निंसते ॥ १० ०९२ ०२
बळ् अस्य नीथा वि पणेश् च मन्महे वया अस्य प्रहुता आसुर् अत्तवे ।
यदा घोरासो अमृतत्वम् आशताद् इज् जनस्य दैव्यस्य चर्किरन् ॥ १० ०९२ ०३
ऋतस्य हि प्रसितिर् द्यौर् उरु व्यचो नमो मह्य् अ१ रमतिः पनीयसी ।
इन्द्रो मित्रो वरुणः सं चिकित्रिरे ऽथो भगः सविता पूतदक्षसः ॥ १० ०९२ ०४
प्र रुद्रेण ययिना यन्ति सिन्धवस् तिरो महीम् अरमतिं दधन्विरे ।
येभिः परिज्मा परियन्न् उरु ज्रयो वि रोरुवज् जठरे विश्वम् उक्षते ॥ १० ०९२ ०५
क्राणा रुद्रा मरुतो विश्वकृष्टयो दिवः श्येनासो असुरस्य नीळयः ।
तेभिश् चष्टे वरुणो मित्रो अर्यमेन्द्रो देवेभिर् अर्वशेभिर् अर्वशः ॥ १० ०९२ ०६
इन्द्रे भुजं शशमानास आशत सूरो दृशीके वृषणश् च पौंस्ये ।
प्र ये न्व् अस्यार्हणा ततक्षिरे युजं वज्रं नृषदनेषु कारवः ॥ १० ०९२ ०७
सूरश् चिद् आ हरितो अस्य रीरमद् इन्द्राद् आ कश् चिद् भयते तवीयसः ।
भीमस्य वृष्णो जठराद् अभिश्वसो दिवे-दिवे सहुरि स्तन्न् अबाधितः ॥ १० ०९२ ०८
स्तोमं वो अद्य रुद्राय शिक्वसे क्षयद्वीराय नमसा दिदिष्टन ।
येभिः शिवः स्ववाँ एवयावभिर् दिवः सिषक्ति स्वयशा निकामभिः ॥ १० ०९२ ०९

ते हि प्र॒जाया॒ अभ॑रन्त॒ वि श्रवो॒ बृह॒स्पति॑र् वृष॒भः सोम॑जामयः ।
य॒ज्ञैर् अथ॑र्वा प्रथ॒मो वि धा॑रयद् दे॒वा दक्षै॒र् भृग॑वः॒ सं चि॑कित्रिरे ॥ १० ०९२ १०
ते हि द्यावा॑पृथि॒वी भूरि॑रेतसा॒ नरा॒शंस॒श् चतु॑रङ्गो य॒मो ऽदि॑तिः ।
दे॒वस् त्वष्टा॑ द्रविणो॒दा ऋ॑भु॒क्षणः॒ प्र रो॑द॒सी म॒रुतो॒ विष्णु॑र् अर्हिरे ॥ १० ०९२ ११
उ॒त स्य न॑ उ॒शिजा॑म् उर्वि॒या क॒विर् अहिः॑ शृणोतु बु॒ध्न्यो॒ ३ हवी॑मनि ।
सू॒र्या॒मासा॑ वि॒चर॑न्ता दि॒वि॒क्षिता॑ धि॒या शमी॑नहुषी अ॒स्य बो॑धतम् ॥ १० ०९२ १२
प्र नः॑ पू॒षा च॒रथं॑ वि॒श्वदे॑व्यो॒ ऽपां नपा॑द् अवतु वा॒युर् इ॒ष्टये॑ ।
आ॒त्मानं॒ वस्यो॑ अ॒भि वात॑म् अर्चत॒ तद् अ॑श्विना सुहवा॒ याम॑नि श्रुतम् ॥ १० ०९२ १३
वि॒शाम् आ॒साम् अभ॑यानाम् अधि॒क्षितं॑ गी॒र्भिर् उ॒ स्वय॑शसं गृणीमसि ।
ग्नाभि॒र् विश्वा॑भि॒र् अदि॑तिम् अन॒र्वण॑म् अ॒क्तोर् युवा॑नं नृ॒मणा॒ अधा॒ पति॑म् ॥ १० ०९२
१४
रेभ॒द् अत्र॑ ज॒नुषा॒ पूर्वो॒ अङ्गि॑रा॒ ग्रावा॑ण ऊ॒र्ध्वा अ॒भि चक्षु॑र् अध्व॒रम् ।
ये॒भिर् विहा॑या॒ अभ॑वद् विचक्ष॒णः पाथः॑ सु॒मेकं॒ स्वधि॑ति॒र् वन॑न्वति ॥ १० ०९२ १५

महि॑ द्यावापृथिवी भूतम् उ॒र्वी नारी॑ य॒ह्वी न रोद॑सी॒ सदं॑ नः ।
तेभि॑र् नः पातं॒ सह्य॑स ए॒भिर् नः॑ पातं शू॒षणि॑ ॥ १० ०९३ ०१
य॒ज्ञे-य॑ज्ञे स मर्त्यो॑ दे॒वान् सप॑र्यति ।
यः सु॒म्नैर् दी॑र्घ॒श्रुत्त॑म आ॒विवा॑सत्य् एनान् ॥ १० ०९३ ०२
विश्वे॑षाम् इरज्यवो दे॒वानां॒ वार् म॒हः ।
विश्वे॒ हि वि॒श्वम॑हसो॒ विश्वे॑ य॒ज्ञेषु॑ य॒ज्ञियाः॑ ॥ १० ०९३ ०३
ते घा॒ राजा॑नो अ॒मृत॑स्य म॒न्द्रा अ॑र्य॒मा मि॒त्रो वरु॑णः॒ परि॑ज्मा ।
कद् रु॒द्रो नृ॒णां स्तु॒तो म॒रुतः॑ पू॒षणो॒ भगः॑ ॥ १० ०९३ ०४
उ॒त नो॒ नक्त॑म् अ॒पां वृ॑षण्वसू॒ सूर्या॑मासा॒ सद॑नाय सध॒न्या ।
सचा॒ यत् साद्य् ए॑षा॒म् अहि॑र् बु॒ध्नेषु॑ बु॒ध्न्यः ॥ १० ०९३ ०५
उ॒त नो॑ दे॒वाव् अ॒श्विना॑ शु॒भस् पती॒ धाम॑भिर् मि॒त्रावरु॑णा उरुष्यताम् ।
म॒हः स रा॒य एष॒ते ऽति॒ धन्वे॑व दुरि॒ता ॥ १० ०९३ ०६
उ॒त नो॑ रु॒द्रा चि॒न् मृळता॑म् अ॒श्विना॒ विश्वे॑ दे॒वासो॒ रथ॒स्पति॒र् भगः॑ ।

ऋ॒भुर् वाज॑ ऋभु॒क्षण॒ः परि॑ज्मा वि॒श्ववे॑दसः ॥ १० ०९३ ०७
ऋ॒भुर् ऋ॑भु॒क्षा ऋ॒भुर् वि॑ध॒तो म॒द आ ते॒ ह॒री॑ जू॒जु॒वा॒नस्य॑ वा॒जिना॑ ।
दु॒ष्टर॒ं यस्य॒ साम॑ चि॒द् ऋध॑ग् य॒ज्ञो न मानु॑षः ॥ १० ०९३ ०८
कृ॒धी नो॒ अह्र॑यो देव सवित॒ः स च॑ स्तुषे म॒घोना॑म् ।
स॒हो न॒ इन्द्रो॒ वह्नि॑भि॒र् न्य् एषां चर्षणी॒नां च॒क्रं र॒श्मिं न यो॑युवे ॥ १० ०९३ ०९
ऐषु॑ द्यावापृथिवी धातम् म॒हद् अ॒स्मे वी॒रेषु॑ वि॒श्वच॑र्षणि॒ श्रव॑ः ।
पृ॒क्षं वाज॑स्य सा॒तये॑ पृ॒क्षं रा॒योत तु॒र्वणे॑ ॥ १० ०९३ १०
ए॒तं शंस॑म् इन्द्रास्मयु॒ष् ट्वं कूचि॒त् सन्त॑ं सहसावन्न् अ॒भिष्ट॑ये ।
सदा॑ पाह्य् अ॒भिष्ट॑ये मे॒दता॑ वे॒दता॑ वसो ॥ १० ०९३ ११
ए॒तम् मे॒ स्तोम॑ं त॒ना न सूर्ये॑ द्युतद्या॑मानं वावृधन्त नृ॒णाम् ।
सं॒वन॑नं॒ नाश्व्य॑ं तष्टेवान॑पच्युतम् ॥ १० ०९३ १२
वा॒वर्त॒ येषा॑ं रा॒या यु॒क्तैषा॑ं हि॒रण्ययी॑ ।
ने॒मधि॑ता॒ न पौंस्या॒ वृथे॑व वि॒ष्टान्ता॑ ॥ १० ०९३ १३
प्र तद् दु॒ःशीमे॒ पृथ॑वाने वे॒ने प्र रा॒मे वो॑च॒म् असु॑रे म॒घव॑त्सु ।
ये यु॒क्त्वाय॒ पञ्च॑ श॒तास्म॒यु प॒था वि॒श्राव्य् ए॑षाम् ॥ १० ०९३ १४
अधीन् न्व् अत्र॑ सप्त॒तिं च॑ स॒प्त च॑ ।
स॒द्यो दि॑दि॒ष्ट तान्व॑ः स॒द्यो दि॑दिष्ट पा॒र्थ्यः स॒द्यो दि॑दिष्ट माय॒वः ॥ १० ०९३ १५

प्रैते व॑दन्तु॒ प्र व॒यं व॑दाम॒ ग्राव॑भ्यो॒ वाच॑ं वदता॒ वद॑द्भ्यः ।
यद् अ॑द्रयः पर्वताः सा॒कम् आ॒शव॒ः श्लोक॑ं घोषम् भर॒थेन्द्रा॑य सो॒मिन॑ः ॥ १० ०९४ ०१
ए॒ते व॑दन्ति श॒तव॑त् स॒हस्र॑वद् अ॒भि क्र॑न्दन्ति॒ हरि॑तेभिर् आ॒सभि॑ः ।
वि॒ष्ट्वी ग्रावा॑णः सु॒कृत॑ः सु॒कृ॒त्यया॒ होतु॑श् चि॒त् पूर्वे॑ ह॒वि॒रद्य॑म् आशत ॥ १० ०९४ ०२
ए॒ते व॑द॒न्त्य् अवि॑दन्न् अ॒ना मधु॒ न्य् ऊङ्खयन्ते॒ अधि॑ प॒क्व आमि॑षि ।
वृ॒क्षस्य॒ शाखा॑म् अरु॒णस्य॒ बप्स॑तस् ते सूभ॑र्वा वृष॒भाः प्रेम् अ॑राविषुः ॥ १० ०९४ ०३
बृ॒हद् व॑दन्ति मदि॒रेण॑ म॒न्दिनेन्द्र॑ं क्रोश॑न्तो ऽविदन्न् अ॒ना मधु॑ ।
सं॒रभ्या॒ धीरा॒ः स्वसृ॑भिर् अनर्तिषुर् आघो॒षय॑न्तः पृथि॒वीम् उ॑प॒ब्दिभि॑ः ॥ १० ०९४ ०४
सु॒प॒र्णा वाच॑म् अक्र॒तोप॒ द्यव्य् आ॑ख॒रे कृष्णा॑ इषि॒रा अ॑नर्तिषुः ।

न्य१ङ् नि यन्त्य् उपरस्य निष्कृतम् पुरू रेतो दधिरे सूर्यश्वितः ॥ १० ०९४ ०५
उग्रा इव प्रवहन्तः समायमुः साकं युक्ता वृषणो बिभ्रतो धुरः ।
यच् छ्वसन्तो जग्रसाना अराविषुः शृण्व एषाम् प्रोथथो अर्वताम् इव ॥ १० ०९४ ०६
दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः ।
दशाभीशुभ्यो अर्चताजरेभ्यो दश धुरो दश युक्ता वहद्भ्यः ॥ १० ०९४ ०७
ते अद्रयो दशयन्त्रास आशवस् तेषाम् आधानम् पर्य् एति हर्यतम् ।
त ऊ सुतस्य सोम्यस्यान्धसो ऽंशोः पीयूषम् प्रथमस्य भेजिरे ॥ १० ०९४ ०८
ते सोमादो हरी इन्द्रस्य निंसते ऽंशुं दुहन्तो अध्य् आसते गवि ।
तेभिर् दुग्धम् पपिवान् सोम्यम् मध्व् इन्द्रो वर्धते प्रथते वृषायते ॥ १० ०९४ ०९
वृषा वो अंशुर् न किला रिषाथनेळावन्तः सदम् इत् स्थनाशिताः ।
रैवत्येव महसा चारव स्थन यस्य ग्रावाणो अजुषध्वम् अध्वरम् ॥ १० ०९४ १०
तृदिला अतृदिलासो अद्रयो ऽश्रमणा अशृथिता अमृत्यवः ।
अनातुरा अजरा स्थामविष्णवः सुपीवसो अतृषिता अतृष्णजः ॥ १० ०९४ ११
ध्रुवा एव वः पितरो युगे-युगे क्षेमकामासः सदसो न युञ्जते ।
अजुर्यासो हरिषाचो हरिद्रव आ द्यां रवेण पृथिवीम् अशुश्रवुः ॥ १० ०९४ १२
तद् इद् वदन्त्य् अद्रयो विमोचने यामन्न् अञ्जस्पा इव घेद् उपब्दिभिः ।
वपन्तो बीजम् इव धान्याकृतः पृञ्चन्ति सोमं न मिनन्ति बप्सतः ॥ १० ०९४ १३
सुते अध्वरे अधि वाचम् अक्रता क्रीळयो न मातरं तुदन्तः ।
वि षू मुञ्चा सुषुवुषो मनीषां वि वर्तन्ताम् अद्रयश् चायमानाः ॥ १० ०९४ १४

हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ।
न नौ मन्त्रा अनुदितास एते मयस् करन् परतरे चनाहन् ॥ १० ०९५ ०१
किम् एता वाचा कृणवा तवाहम् प्राक्रमिषम् उषसाम् अग्रियेव ।
पुरूरवः पुनर् अस्तम् परेहि दुरापना वात इवाहम् अस्मि ॥ १० ०९५ ०२
इषुर् न श्रिय इषुधेर् असना गोषाः शतसा न रंहिः ।
अवीरे क्रतौ वि दविद्युतन् नोरा न मायुं चितयन्त धुनयः ॥ १० ०९५ ०३
सा वसु दधती श्वशुराय वय उषो यदि वष्ट्य् अन्तिगृहात् ।

अस्तं ननक्षे यस्मिञ् चाकन् दिवा नक्तं श्नथिता वैतसेन ॥ १० ०९५ ०४
त्रिः स्म माह्नः श्नथयो वैतसेनोत स्म मे ऽव्यत्यै पृणासि ।
पुरूरवो ऽनु ते केतम् आयं राजा मे वीर तन्व१स् तद् आसीः ॥ १० ०९५ ०५
या सुजूर्णिः श्रेणिः सुम्नआपिर् ह्रदेचक्षुर् न ग्रन्थिनी चरण्युः ।
ता अञ्जयो ऽरुणयो न सस्रुः श्रिये गावो न धेनवो ऽनवन्त ॥ १० ०९५ ०६
सम् अस्मिञ् जायमान आसत ग्ना उतेम् अवर्धन् नद्य१ः स्वगूर्ताः ।
महे यत् त्वा पुरूरवो रणायावर्धयन् दस्युहत्याय देवाः ॥ १० ०९५ ०७
सचा यद् आसु जहतीष्व् अत्कम् अमानुषीषु मानुषो निषेवे ।
अप स्म मत् तरसन्ती न भुज्युस् ता अत्रसन् रथस्पृशो नाश्वाः ॥ १० ०९५ ०८
यद् आसु मर्तो अमृतासु निस्पृक् सं क्षोणीभिः क्रतुभिर् न पृङ्क्ते ।
ता आतयो न तन्वः शुम्भत स्वा अश्वासो न क्रीळयो दन्दशानाः ॥ १० ०९५ ०९
विद्युन् न या पतन्ती दविद्योद् भरन्ती मे अप्या काम्यानि ।
जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घम् आयुः ॥ १० ०९५ १०
जज्ञिष इत्था गोपीथ्याय हि दधाथ तत् पुरूरवो म ओजः ।
अशासं त्वा विदुषी सस्मिन्न् अहन् न म आशृणोः किम् अभुग् वदासि ॥ १० ०९५ ११
कदा सूनुः पितरं जात इच्छाच् चक्रन् नाश्रु वर्तयद् विजानन् ।
को दम्पती समनसा वि यूयोद् अध यद् अग्निः श्वशुरेषु दीदयत् ॥ १० ०९५ १२
प्रति ब्रवाणि वर्तयते अश्रु चक्रन् न क्रन्दद् आध्ये शिवायै ।
प्र तत् ते हिनवा यत् ते अस्मे परेह्य अस्तं नहि मूर मापः ॥ १० ०९५ १३
सुदेवो अद्य प्रपतेद् अनावृत् परावतम् परमां गन्तवा उ ।
अधा शयीत निरृतेर् उपस्थे ऽधैनं वृका रभसासो अद्युः ॥ १० ०९५ १४
पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।
न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्य् एता ॥ १० ०९५ १५
यद् विरूपाचरम् मर्त्येष्व् अवसं रात्रीः शरदश् चतस्रः ।
घृतस्य स्तोकं सकृद् अह्न आश्नां ताद् एवेदं तातृपाणा चरामि ॥ १० ०९५ १६
अन्तरिक्षप्रां रजसो विमानीम् उप शिक्षाम्य् उर्वशीं वसिष्ठः ।
उप त्वा रातिः सुकृतस्य तिष्ठान् नि वर्तस्व हृदयं तप्यते मे ॥ १० ०९५ १७
इति त्वा देवा इम आहुर् ऐळ यथेम् एतद् भवसि मृत्युबन्धुः ।

प्रजा ते देवान् हविषा यजाति स्वर्ग उ त्वम् अपि मादयासे ॥ १० ०९५ १८

प्र ते महे विदथे शंसिषं हरी प्र ते वन्वे वनुषो हर्यतम् मदम् ।
घृतं न यो हरिभिश् चारु सेचत आ त्वा विशन्तु हरिवर्पसं गिरः ॥ १० ०९६ ०१
हरिं हि योनिम् अभि ये समस्वरन् हिन्वन्तो हरी दिव्यं यथा सदः ।
आ यम् पृणन्ति हरिभिर् न धेनव इन्द्राय शूषं हरिवन्तम् अर्चत ॥ १० ०९६ ०२
सो अस्य वज्रो हरितो य आयसो हरिर् निकामो हरिर् आ गभस्त्योः ।
द्युम्नी सुशिप्रो हरिमन्युसायक इन्द्रे नि रूपा हरिता मिमिक्षिरे ॥ १० ०९६ ०३
दिवि न केतुर् अधि धायि हर्यतो विव्यचद् वज्रो हरितो न रंह्या ।
तुदद् अहिं हरिशिप्रो य आयसः सहस्रशोका अभवद् धरिम्भरः ॥ १० ०९६ ०४
त्वं-त्वम् अहर्यथा उपस्तुतः पूर्वेभिर् इन्द्र हरिकेश यज्वभिः ।
त्वं हर्यसि तव विश्वम् उक्थ्य १ म् असामि राधो हरिजात हर्यतम् ॥ १० ०९६ ०५
ता वज्रिणम् मन्दिनं स्तोम्यम् मद इन्द्रं रथे वहतो हर्यता हरी ।
पुरूण्य् अस्मै सवनानि हर्यत इन्द्राय सोमा हरयो दधन्विरे ॥ १० ०९६ ०६
अरं कामाय हरयो दधन्विरे स्थिराय हिन्वन् हरयो हरी तुरा ।
अर्वद्भिर् यो हरिभिर् जोषम् ईयते सो अस्य कामं हरिवन्तम् आनशे ॥ १० ०९६ ०७
हरिश्मशारुर् हरिकेश आयसस् तुरस्पेये यो हरिपा अवर्धत ।
अर्वद्भिर् यो हरिभिर् वाजिनीवसुर् अति विश्वा दुरिता पारिषद् धरी ॥ १० ०९६ ०८
स्रुवेव यस्य हरिणी विपेततुः शिप्रे वाजाय हरिणी दविध्वतः ।
प्र यत् कृते चमसे मर्मृजद् धरी पीत्वा मदस्य हर्यतस्यान्धसः ॥ १० ०९६ ०९
उत स्म सद्म हर्यतस्य पस्त्यो ३ र् अत्यो न वाजं हरिवाँ अचिक्रदत् ।
मही चिद् धि धिषणाहर्यद् ओजसा बृहद् वयो दधिषे हर्यतश् चिद् आ ॥ १० ०९६ १०
आ रोदसी हर्यमाणो महित्वा नव्यं-नव्यं हर्यसि मन्म नु प्रियम् ।
प्र पस्त्यम् असुर हर्यतं गोर् आविष् कृधि हरये सूर्याय ॥ १० ०९६ ११
आ त्वा हर्यन्तम् प्रयुजो जनानां रथे वहन्तु हरिशिप्रम् इन्द्र ।
पिबा यथा प्रतिभृतस्य मध्वो हर्यन् यज्ञं सधमादे दशोणिम् ॥ १० ०९६ १२
अपाः पूर्वेषां हरिवः सुतानाम् अथो इदं सवनं केवलं ते ।

ममद्धि सोमम् मधुमन्तम् इन्द्र सत्रा वृषञ् जठर आ वृषस्व ॥ १० ०९६ १३

या ओषधीः पूर्वा जाता देवेभ्यस् त्रियुगम् पुरा ।
मनै नु बभ्रूणाम् अहं शतं धामानि सप्त च ॥ १० ०९७ ०१
शतं वो अम्ब धामानि सहस्रम् उत वो रुहः ।
अधा शतक्रत्वो यूयम् इमम् मे अगदं कृत ॥ १० ०९७ ०२
ओषधीः प्रति मोदध्वम् पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरीर् वीरुधः पारयिष्ण्वः ॥ १० ०९७ ०३
ओषधीर् इति मातरस् तद् वो देवीर् उप ब्रुवे ।
सनेयम् अश्वं गां वास आत्मानं तव पूरुष ॥ १० ०९७ ०४
अश्वत्थे वो निषदनम् पर्णे वो वसतिष् कृता ।
गोभाज इत् किलासथ यत् सनवथ पूरुषम् ॥ १० ०९७ ०५
यत्रौषधीः समग्मत राजानः समिताव् इव ।
विप्रः स उच्यते भिषग् रक्षोहामीवचातनः ॥ १० ०९७ ०६
अश्वावतीं सोमावतीम् ऊर्जयन्तीम् उदोजसम् ।
आवित्सि सर्वा ओषधीर् अस्मा अरिष्टतातये ॥ १० ०९७ ०७
उच् छुष्मा ओषधीनां गावो गोष्ठाद् इवेरते ।
धनं सनिष्यन्तीनाम् आत्मानं तव पूरुष ॥ १० ०९७ ०८
इष्कृतिर् नाम वो माताथो यूयं स्थ निष्कृतीः ।
सीराः पतत्रिणी स्थन यद् आमयति निष् कृथ ॥ १० ०९७ ०९
अति विश्वाः परिष्ठा स्तेन इव व्रजम् अक्रमुः ।
ओषधीः प्राचुच्यवुर् यत् किं च तन्वो रपः ॥ १० ०९७ १०
यद् इमा वाजयन्न् अहम् ओषधीर् हस्त आदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ १० ०९७ ११
यस्यौषधीः प्रसर्पथाङ्गम्-अङ्गम् परुष्-परुः ।
ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीर् इव ॥ १० ०९७ १२
साकं यक्ष्म प्र पत चाषेण किकिदीविना ।

सा॒कं वात॑स्य॒ ध्राज्या॑ सा॒कं न॑श्य नि॒हाक॑या ॥ १० ०९७ १३
अ॒न्या वो॑ अ॒न्याम् अ॑वत्व् अ॒न्यान्यस्या॒ उपा॑वत ।
ताः सर्वाः॑ संविदा॒ना इ॒दम् मे॒ प्राव॑ता॒ वचः॑ ॥ १० ०९७ १४
याः फ॒लिनी॒र् या अ॑फ॒ला अ॑पु॒ष्पा याश् च॑ पु॒ष्पिणीः॑ ।
बृह॒स्पति॑प्रसूता॒स् ता नो॑ मुञ्च॒न्त्व् अंह॑सः ॥ १० ०९७ १५
मु॒ञ्चन्तु॑ मा शप॒थ्या॒३॑द् अथो॑ वरु॒ण्याद् उ॒त ।
अथो॑ य॒मस्य॒ पड्बी॑शात् सर्व॑स्माद् देवकिल्बि॒षात् ॥ १० ०९७ १६
अ॒व॒पत॑न्तीर् अवदन् दि॒व ओष॑धय॒स् परि॑ ।
यं जी॒वम् अ॒श्नवा॑महै॒ न स रि॑ष्याति॒ पूरु॑षः ॥ १० ०९७ १७
या ओष॑धीः॒ सोम॑राज्ञीर् ब॒ह्वीः श॒तवि॑चक्षणाः ।
तासां॒ त्वम् अ॑स्य् उत्त॒मा॒रं॑ कामा॑य॒ शं हृ॒दे ॥ १० ०९७ १८
या ओष॑धीः॒ सोम॑राज्ञीर् विष्ठि॑ताः पृथि॒वीम् अनु॑ ।
बृह॒स्पति॑प्रसूता अ॒स्यै सं द॑त्त वी॒र्य॑म् ॥ १० ०९७ १९
मा वो॑ रिषत् खनि॒ता यस्मै॑ चा॒हं खना॑मि वः ।
द्वि॒पच् चतु॑ष्पद् अ॒स्माकं॒ सर्व॑म् अस्त्व् अनातु॒रम् ॥ १० ०९७ २०
याश् चे॒दम् उ॑पशृ॒ण्वन्ति॒ याश् च॑ दू॒रम् परा॑गताः ।
सर्वाः॑ सं॒गत्य॑ वीरुधो ऽस्यै सं द॑त्त वी॒र्य॑म् ॥ १० ०९७ २१
ओष॑धयः॒ सं व॑दन्ते॒ सोमे॑न स॒ह राज्ञा॑ ।
यस्मै॑ कृ॒णोति॑ ब्राह्म॒णस् तं रा॑जन् पारयामसि ॥ १० ०९७ २२
त्वम् उ॑त्त॒मास्य् ओ॑षधे॒ तव॑ वृ॒क्षा उप॑स्तयः ।
उप॑स्तिर् अस्तु॒ सो ऽस्माकं॒ यो अ॒स्माँ अ॑भि॒दास॑ति ॥ १० ०९७ २३

बृह॑स्पते॒ प्रति॑ मे दे॒वता॑म् इहि मि॒त्रो वा॒ यद् वरु॑णो॒ वासि॑ पू॒षा ।
आ॒दि॒त्यैर् वा॒ यद् वसु॑भिर् म॒रुत्वा॒न् स प॒र्जन्यं॒ शंत॑नवे वृषाय ॥ १० ०९८ ०१
आ दे॒वो दू॒तो अ॑जि॒रश् चि॑कि॒त्वान् त्वद् दे॑वापे अ॒भि माम् अ॑गच्छत् ।
प्र॒ती॒ची॒नः प्रति॒ माम् आ व॑वृत्स्व॒ दधा॑मि ते द्यु॒मतीं॒ वाच॑म् आ॒सन् ॥ १० ०९८ ०२
अ॒स्मे धे॑हि द्यु॒मतीं॒ वाच॑म् आ॒सन् बृह॑स्पते अनमी॒वाम् इ॒षि॒राम् ।

यया वृष्टिं शंतनवे वनाव दिवो द्रप्सो मधुमाँ आ विवेश ॥ १० ०९८ ०३
आ नो द्रप्सा मधुमन्तो विशन्त्व् इन्द्र देह्य् अधिरथं सहस्रम् ।
नि षीद होत्रम् ऋतुथा यजस्व देवान् देवापे हविषा सपर्य ॥ १० ०९८ ०४
आर्ष्टिषेणो होत्रम् ऋषिर् निषीदन् देवापिर् देवसुमतिं चिकित्वान् ।
स उत्तरस्माद् अधरं समुद्रम् अपो दिव्या असृजद् वर्ष्या अभि ॥ १० ०९८ ०५
अस्मिन् समुद्रे अध्य् उत्तरस्मिन्न् आपो देवेभिर् निवृता अतिष्ठन् ।
ता अद्रवन्न् आर्ष्टिषेणेन सृष्टा देवापिना प्रेषिता मृक्षिणीषु ॥ १० ०९८ ०६
यद् देवापिः शंतनवे पुरोहितो होत्राय वृतः कृपयन्न् अदीधेत् ।
देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर् वाचम् अस्मा अयच्छत् ॥ १० ०९८ ०७
यं त्वा देवापिः शुशुचानो अग्न आर्ष्टिषेणो मनुष्यः समीधे ।
विश्वेभिर् देवैर् अनुमद्यमानः प्र पर्जन्यम् ईरया वृष्टिमन्तम् ॥ १० ०९८ ०८
त्वाम् पूर्व ऋषयो गीर्भिर् आयन् त्वाम् अध्वरेषु पुरुहूत विश्वे ।
सहस्राण्य् अधिरथान्य् अस्मे आ नो यज्ञं रोहिदश्वोप याहि ॥ १० ०९८ ०९
एतान्य् अग्ने नवतिर् नव त्वे आहुतान्य् अधिरथा सहस्रा ।
तेभिर् वर्धस्व तन्वः शूर पूर्वीर् दिवो नो वृष्टिम् इषितो रिरीहि ॥ १० ०९८ १०
एतान्य् अग्ने नवतिं सहस्रा सम् प्र यच्छ वृष्ण इन्द्राय भागम् ।
विद्वान् पथ ऋतुशो देवयानान् अप्य् औलानं दिवि देवेषु धेहि ॥ १० ०९८ ११
अग्ने बाधस्व वि मृधो वि दुर्गहापामीवाम् अप रक्षांसि सेध ।
अस्मात् समुद्राद् बृहतो दिवो नो ऽपाम् भूमानम् उप नः सृजेह ॥ १० ०९८ १२

कं नश् चित्रम् इषण्यसि चिकित्वान् पृथुग्मानं वाश्रं वावृधध्यै ।
कत् तस्य दातु शवसो व्युष्टौ तक्षद् वज्रं वृत्रतुरम् अपिन्वत् ॥ १० ०९९ ०१
स हि द्युता विद्युता वेति साम पृथुं योनिम् असुरत्वा ससाद ।
स सनीळेभिः प्रसहानो अस्य भ्रातुर् न ऋते सप्तथस्य मायाः ॥ १० ०९९ ०२
स वाजं यातापदुष्पदा यन् स्वर्षाता परि षदत् सनिष्यन् ।
अनर्वा यच् छतदुरस्य वेदो घ्नञ् छिश्नदेवाँ अभि वर्पसा भूत् ॥ १० ०९९ ०३
स यह्व्यो ऽवनीर् गोष्व् अर्वा जुहोति प्रधन्यासु सस्रिः ।

अपादो यत्र युज्यासो ऽरथा द्रोण्यश्वास ईरते घृतं वाः ॥ १० ०९९ ०४
स रुद्रेभिर् अशस्तवार ऋभ्वा हित्वी गयम् आरेअवद्य आगात् ।
वम्रस्य मन्ये मिथुना विवव्री अन्नम् अभीत्यारोदयन् मुषायन् ॥ १० ०९९ ०५
स इद् दासं तुवीरवम् पतिर् दन् षळक्षं त्रिशीर्षाणं दमन्यत् ।
अस्य त्रितो न्व् ओजसा वृधानो विपा वराहम् अयोअग्रया हन् ॥ १० ०९९ ०६
स द्रुह्वणे मनुष ऊर्ध्वसान आ साविषद् अर्शसानाय शरुम् ।
स नृतमो नहुषो ऽस्मत् सुजातः पुरो ऽभिनद् अर्हन् दस्युहत्ये ॥ १० ०९९ ०७
सो अभ्रियो न यवस उदन्यन् क्षयाय गातुं विदन् नो अस्मे ।
उप यत् सीदद् इन्दुं शरीरैः श्येनो ऽयोपाष्टिर् हन्ति दस्यून् ॥ १० ०९९ ०८
स व्राधतः शवसानेभिर् अस्य कुत्साय शुष्णं कृपणे परादात् ।
अयं कविम् अनयच् छस्यमानम् अत्कं यो अस्य सनितोत नृणाम् ॥ १० ०९९ ०९
अयं दशस्यन् नर्येभिर् अस्य दस्मो देवेभिर् वरुणो न मायी ।
अयं कनीन ऋतुपा अवेद्य् अमिमीताररुं यश् चतुष्पात् ॥ १० ०९९ १०
अस्य स्तोमेभिर् औशिज ऋजिश्वा व्रजं दरयद् वृषभेण पिप्रोः ।
सुत्वा यद् यजतो दीदयद् गीः पुर इयानो अभि वर्पसा भूत् ॥ १० ०९९ ११
एवा महो असुर वक्षथाय वम्रकः पड्भिर् उप सर्पद् इन्द्रम् ।
स इयानः करति स्वस्तिम् अस्मा इषम् ऊर्जं सुक्षितिं विश्वम् आभाः ॥ १० ०९९ १२

इन्द्र दृह्य मघवन् त्वावद् इद् भुज इह स्तुतः सुतपा बोधि नो वृधे ।
देवेभिर् नः सविता प्रावतु श्रुतम् आ सर्वतातिम् अदितिं वृणीमहे ॥ १० १०० ०१
भराय सु भरत भागम् ऋत्वियम् प्र वायवे शुचिपे क्रन्ददिष्टये ।
गौरस्य यः पयसः पीतिम् आनश आ सर्वतातिम् अदितिं वृणीमहे ॥ १० १०० ०२
आ नो देवः सविता साविषद् वय ऋजूयते यजमानाय सुन्वते ।
यथा देवान् प्रतिभूषेम पाकवद् आ सर्वतातिम् अदितिं वृणीमहे ॥ १० १०० ०३
इन्द्रो अस्मे सुमना अस्तु विश्वहा राजा सोमः सुवितस्याध्य् एतु नः ।
यथा-यथा मित्रधितानि संदधुर् आ सर्वतातिम् अदितिं वृणीमहे ॥ १० १०० ०४
इन्द्र उक्थेन शवसा परुर् दधे बृहस्पते प्रतरीतास्य् आयुषः ।

यज्ञो मनुः प्रमतिर् नः पिता हि कम् आ सर्वतातिम् अदितिं वृणीमहे ॥ १० १०० ०५
इन्द्रस्य नु सुकृतं दैव्यं सहो ऽग्निर् गृहे जरिता मेधिरः कविः ।
यज्ञश् च भूद् विदथे चारुर् अन्तम आ सर्वतातिम् अदितिं वृणीमहे ॥ १० १०० ०६
न वो गुहा चकृम भूरि दुष्कृतं नाविष्ट्यं वसवो देवहेळनम् ।
माकिर् नो देवा अनृतस्य वर्पस आ सर्वतातिम् अदितिं वृणीमहे ॥ १० १०० ०७
अपामीवां सविता साविषन् न्य१ग् वरीय इद् अप सेधन्त्व् अद्रयः ।
ग्रावा यत्र मधुषुद् उच्यते बृहद् आ सर्वतातिम् अदितिं वृणीमहे ॥ १० १०० ०८
ऊर्ध्वो ग्रावा वसवो ऽस्तु सोतरि विश्वा द्वेषांसि सनुतर् युयोत ।
स नो देवः सविता पायुर् ईड्य आ सर्वतातिम् अदितिं वृणीमहे ॥ १० १०० ०९
ऊर्जं गावो यवसे पीवो अत्तन ऋतस्य याः सदने कोशे अङ्ग्ध्वे ।
तनूर् एव तन्वो अस्तु भेषजम् आ सर्वतातिम् अदितिं वृणीमहे ॥ १० १०० १०
क्रतुप्रावा जरिता शश्वताम् अव इन्द्र इद् भद्रा प्रमतिः सुतावताम् ।
पूर्णम् ऊधर् दिव्यं यस्य सिक्तय आ सर्वतातिम् अदितिं वृणीमहे ॥ १० १०० ११
चित्रस् ते भानुः क्रतुप्रा अभिष्टिः सन्ति स्पृधो जरणिप्रा अधृष्टाः ।
रजिष्ठया रज्या पश्व आ गोस् तूतूर्षत्य् पर्य् अग्रं दुवस्युः ॥ १० १०० १२

उद् बुध्यध्वं समनसः सखायः सम् अग्निम् इन्ध्वम् बहवः सनीळाः ।
दधिक्राम् अग्निम् उषसं च देवीम् इन्द्रावतो ऽवसे नि ह्वये वः ॥ १० १०१ ०१
मन्द्रा कृणुध्वं धिय आ तनुध्वं नावम् अरित्रपरणीं कृणुध्वम् ।
इष्कृणुध्वम् आयुधारं कृणुध्वम् प्राञ्चं यज्ञम् प्र णयता सखायः ॥ १० १०१ ०२
युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन् नो नेदीय इत् सृण्यः पक्वम् एयात् ॥ १० १०१ ०३
सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् ।
धीरा देवेषु सुम्नया ॥ १० १०१ ०४
निर् आहावान् कृणोतन सं वरत्रा दधातन ।
सिञ्चामहा अवतम् उद्रिणं वयं सुषेकम् अनुपक्षितम् ॥ १० १०१ ०५
इष्कृताहावम् अवतं सुवरत्रं सुषेचनम् ।

उद्रिणं सिञ्चे अक्षितम् ॥ १० १०१ ०६
प्रीणीताश्वान् हितं जयाथ स्वस्तिवाहं रथम् इत् कृणुध्वम् ।
द्रोणाहावम् अवतम् अश्मचक्रम् अंसत्रकोशं सिञ्चता नृपाणम् ॥ १० १०१ ०७
व्रजं कृणुध्वं स हि वो नृपाणो वर्म सीव्यध्वम् बहुला पृथूनि ।
पुरः कृणुध्वम् आयसीर् अधृष्टा मा वः सुस्रोच् चमसो दृंहता तम् ॥ १० १०१ ०८
आ वो धियं यज्ञियां वर्त ऊतये देवा देवीं यजतां यज्ञियाम् इह ।
सा नो दुहीयद् यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥ १० १०१ ०९
आ तू षिञ्च हरिम् ईं द्रोर् उपस्थे वाशीभिस् तक्षताश्मन्मयीभिः ।
परि ष्वजध्वं दश कक्ष्याभिर् उभे धुरौ प्रति वह्निं युनक्त ॥ १० १०१ १०
उभे धुरौ वह्निर् आपिब्दमानो ऽन्तर् योनेव चरति द्विजानिः ।
वनस्पतिं वन आस्थापयध्वं नि षू दधिध्वम् अखनन्त उत्सम् ॥ १० १०१ ११
कपृन् नरः कपृथम् उद् दधातन चोदयत खुदत वाजसातये ।
निष्टिग्र्यः पुत्रम् आ च्यावयोतय इन्द्रं सबाध इह सोमपीतये ॥ १० १०१ १२

प्र ते रथम् मिथूकृतम् इन्द्रो ऽवतु धृष्णुया ।
अस्मिन्न् आजौ पुरुहूत श्रवाय्ये धनभक्षेषु नो ऽव ॥ १० १०२ ०१
उत् स्म वातो वहति वासो ऽस्या अधिरथं यद् अजयत् सहस्रम् ।
रथीर् अभून् मुद्गलानी गविष्टौ भरे कृतं व्य् अचेद् इन्द्रसेना ॥ १० १०२ ०२
अन्तर् यच्छ जिघांसतो वज्रम् इन्द्राभिदासतः ।
दासस्य वा मघवन्न् आर्यस्य वा सनुतर् यवया वधम् ॥ १० १०२ ०३
उद्नो ह्रदम् अपिबज् जर्हृषाणः कूटं स्म तृंहद् अभिमातिम् एति ।
प्र मुष्कभारः श्रव इच्छमानो ऽजिरम् बाहू अभरत् सिषासन् ॥ १० १०२ ०४
न्य् अक्रन्दयन्न् उपयन्त एनम् अमेहयन् वृषभम् मध्य आजेः ।
तेन सूभर्वं शतवत् सहस्रं गवाम् मुद्गलः प्रधने जिगाय ॥ १० १०२ ०५
ककर्दवे वृषभो युक्त आसीद् अवावचीत् सारथिर् अस्य केशी ।
दुधेर् युक्तस्य द्रवतः सहानस ऋच्छन्ति ष्मा निष्पदो मुद्गलानीम् ॥ १० १०२ ०६
उत प्रधिम् उद् अहन्न् अस्य विद्वान् उपायुनग् वंसगम् अत्र शिक्षन् ।

इन्द्र उद् आवत् पतिम् अघ्न्यानाम् अरंहत पद्याभिः ककुद्मान् ॥ १० १०२ ०७
शुनम् अष्ट्राव्य् अचरत् कपर्दी वरत्रायां दार्व् आनह्यमानः ।
नृम्णानि कृण्वन् बहवे जनाय गाः पस्पशानस् तविषीर् अधत्त ॥ १० १०२ ०८
इमं तम् पश्य वृषभस्य युञ्जं काष्ठाया मध्ये द्रुघणं शयानम् ।
येन जिगाय शतवत् सहस्रं गवाम् मुद्गलः पृतनाज्येषु ॥ १० १०२ ०९
आरे अघा को न्व् ऐत्था ददर्श यं युञ्जन्ति तम् व् आ स्थापयन्ति ।
नास्मै तृणं नोदकम् आ भरन्त्य् उत्तरो धुरो वहति प्रदेदिशत् ॥ १० १०२ १०
परिवृक्तेव पतिविद्यम् आनट् पीप्याना कूचक्रेणेव सिञ्चन् ।
एषैष्या चिद् रथ्या जयेम सुमङ्गलं सिनवद् अस्तु सातम् ॥ १० १०२ ११
त्वं विश्वस्य जगतश् चक्षुर् इन्द्रासि चक्षुषः ।
वृषा यद् आजिं वृषणा सिषाससि चोदयन् वध्रिणा युजा ॥ १० १०२ १२

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश् चर्षणीनाम् ।
संक्रन्दनो ऽनिमिष एकवीरः शतं सेना अजयत् साकम् इन्द्रः ॥ १० १०३ ०१
संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तद् इन्द्रेण जयत तत् सहध्वं युधो नर इषुहस्तेन वृष्णा ॥ १० १०३ ०२
स इषुहस्तैः स निषङ्गिभिर् वशी संस्रष्टा स युध इन्द्रो गणेन ।
संसृष्टजित् सोमपा बाहुशर्ध्य् उ१ग्रधन्वा प्रतिहिताभिर् अस्ता ॥ १० १०३ ०३
बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभञ्जन् सेनाः प्रमृणो युधा जयन्न् अस्माकम् एध्य् अविता रथानाम् ॥ १० १०३ ०४
बलविज्ञाय स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रम् इन्द्र रथम् आ तिष्ठ गोवित् ॥ १० १०३ ०५
गोत्रभिदं गोविदं वज्रबाहुं जयन्तम् अज्म प्रमृणन्तम् ओजसा ।
इमं सजाता अनु वीरयध्वम् इन्द्रं सखायो अनु सं रभध्वम् ॥ १० १०३ ०६
अभि गोत्राणि सहसा गाहमानो ऽदयो वीरः शतमन्युर् इन्द्रः ।
दुश्च्यवनः पृतनाषाळ् अयुध्यो ऽस्माकं सेना अवतु प्र युत्सु ॥ १० १०३ ०७
इन्द्र आसां नेता बृहस्पतिर् दक्षिणा यज्ञः पुर एतु सोमः ।

देवसेनानाम् अभिभञ्जतीनां जयन्तीनाम् मरुतो यन्त्व् अग्रम् ॥ १० १०३ ०८
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानाम् मरुतां शर्ध उग्रम् ।
महामनसाम् भुवनच्यवानां घोषो देवानां जयताम् उद् अस्थात् ॥ १० १०३ ०९
उद् धर्षय मघवन्न् आयुधान्य् उत् सत्वनाम् मामकानाम् मनांसि ।
उद् वृत्रहन् वाजिनां वाजिनान्य् उद् रथानां जयतां यन्तु घोषाः ॥ १० १०३ १०
अस्माकम् इन्द्रः समृतेषु ध्वजेष्व् अस्माकं या इषवस् ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्व् अस्माँउ देवा अवता हवेषु ॥ १० १०३ ११
अमीषां चित्तम् प्रतिलोभयन्ती गृहाणाङ्गान्य् अप्वे परेहि ।
अभि प्रेहि निर् दह हृत्सु शोकैर् अन्धेनामित्रास् तमसा सचन्ताम् ॥ १० १०३ १२
प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।
उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥ १० १०३ १३

असावि सोमः पुरुहूत तुभ्यं हरिभ्यां यज्ञम् उप याहि तूयम् ।
तुभ्यं गिरो विप्रवीरा इयाना दधन्विर इन्द्र पिबा सुतस्य ॥ १० १०४ ०१
अप्सु धूतस्य हरिवः पिबेह नृभिः सुतस्य जठरम् पृणस्व ।
मिमिक्षुर् यम् अद्रय इन्द्र तुभ्यं तेभिर् वर्धस्व मदम् उक्थवाहः ॥ १० १०४ ०२
प्रोग्राम् पीतिं वृष्ण इयर्मि सत्याम् प्रयै सुतस्य हर्यश्व तुभ्यम् ।
इन्द्र धेनाभिर् इह मादयस्व धीभिर् विश्वाभिः शच्या गृणानः ॥ १० १०४ ०३
ऊती शचीवस् तव वीर्येण वयो दधाना उशिज ऋतज्ञाः ।
प्रजावद् इन्द्र मनुषो दुरोणे तस्थुर् गृणन्तः सधमाद्यासः ॥ १० १०४ ०४
प्रणीतिभिष् टे हर्यश्व सुष्टोः सुषुम्नस्य पुरुरुचो जनासः ।
मंहिष्ठाम् ऊतिं वितिरे दधाना स्तोतार इन्द्र तव सूनृताभिः ॥ १० १०४ ०५
उप ब्रह्माणि हरिवो हरिभ्यां सोमस्य याहि पीतये सुतस्य ।
इन्द्र त्वा यज्ञः क्षममाणम् आनड् दाश्वाँ अस्य् अध्वरस्य प्रकेतः ॥ १० १०४ ०६
सहस्रवाजम् अभिमातिषाहं सुतेरणम् मघवानं सुवृक्तिम् ।
उप भूषन्ति गिरो अप्रतीतम् इन्द्रं नमस्या जरितुः पनन्त ॥ १० १०४ ०७
सप्तापो देवीः सुरणा अमृक्ता याभिः सिन्धुम् अतर इन्द्र पूर्भित् ।

नवतिं स्रोत्या नव च स्रवन्तीर् देवेभ्यो गातुम् मनुषे च विन्दः ॥ १० १०४ ०८
अपो महीर् अभिशस्तेर् अमुञ्चो ऽजागर् आस्व् अधि देव एकः ।
इन्द्र यास् त्वं वृत्रतूर्ये चकर्थ ताभिर् विश्वायुस् तन्वम् पुपुष्याः ॥ १० १०४ ०९
वीरेण्यः क्रतुर् इन्द्रः सुशस्तिर् उतापि धेना पुरुहूतम् ईट्टे ।
आर्दयद् वृत्रम् अकृणोद् उलोकं ससाहे शक्रः पृतना अभिष्टिः ॥ १० १०४ १०
शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ १० १०४ ११

कदा वसो स्तोत्रं हर्यत आव श्मशा रुधद् वाः ।
दीर्घं सुतं वाताप्याय ॥ १० १०५ ०१
हरी यस्य सुयुजा विव्रता वेर् अर्वन्तानु शेपा ।
उभा रजी न केशिना पतिर् दन् ॥ १० १०५ ०२
अप योर् इन्द्रः पापज आ मर्तो न शश्रमाणो बिभीवान् ।
शुभे यद् युयुजे तविषीवान् ॥ १० १०५ ०३
सचायोर् इन्द्रश् चर्कृष आँ उपानसः सपर्यन् ।
नदयोर् विव्रतयोः शूर इन्द्रः ॥ १० १०५ ०४
अधि यस् तस्थौ केशवन्ता व्यचस्वन्ता न पुष्ट्यै ।
वनोति शिप्राभ्यां शिप्रिणीवान् ॥ १० १०५ ०५
प्रास्तौद् ऋष्वौजा ऋष्वेभिस् ततक्ष शूरः शवसा ।
ऋभुर् न क्रतुभिर् मातरिश्वा ॥ १० १०५ ०६
वज्रं यश् चक्रे सुहनाय दस्यवे हिरीमशो हिरीमान् ।
अरुतहनुर् अद्भुतं न रजः ॥ १० १०५ ०७
अव नो वृजिना शिशीह्य् ऋचा वनेमानृचः ।
नाब्रह्मा यज्ञ ऋधग् जोषति त्वे ॥ १० १०५ ०८
ऊर्ध्वा यत् ते त्रेतिनी भूद् यज्ञस्य धूर्षु सद्मन् ।
सजूर् नावं स्वयशसं सचायोः ॥ १० १०५ ०९
श्रिये ते पृश्निर् उपसेचनी भूच् छ्रिये दर्विर् अरेपाः ।

यया स्वे पात्रे सिञ्चस उत् ॥ १० १०५ १०
शतं वा यद् असुर्य प्रति त्वा सुमित्र इत्थास्तौद् दुर्मित्र इत्थास्तौत् ।
आवो यद् दस्युहत्ये कुत्सपुत्रम् प्रावो यद् दस्युहत्ये कुत्सवत्सम् ॥ १० १०५ ११

उभा उ नूनं तद् इद् अर्थयेथे वि तन्वाथे धियो वस्त्रापसेव ।
सध्रीचीना यातवे प्रेम् अजीगः सुदिनेव पृक्ष आ तंसयेथे ॥ १० १०६ ०१
उष्टारेव फर्वरेषु श्रयेथे प्रायोगेव श्वात्र्या शासुर् एथः ।
दूतेव हि ष्ठो यशसा जनेषु माप स्थातम् महिषेवावपानात् ॥ १० १०६ ०२
साकंयुजा शकुनस्येव पक्षा पश्वेव चित्रा यजुर् आ गमिष्टम् ।
अग्निर् इव देवयोर् दीदिवांसा परिज्मानेव यजथः पुरुत्रा ॥ १० १०६ ०३
आपी वो अस्मे पितरेव पुत्रोग्रेव रुचा नृपतीव तुर्यै ।
इर्येव पुष्ट्यै किरणेव भुज्यै श्रुष्टीवानेव हवम् आ गमिष्टम् ॥ १० १०६ ०४
वंसगेव पूषर्या शिम्बाता मित्रेव ऋता शतरा शातपन्ता ।
वाजेवोच्चा वयसा घर्म्येष्ठा मेषेवेषा सपर्या ३ पुरीषा ॥ १० १०६ ०५
सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका ।
उदन्यजेव जेमना मदेरू ता मे जराय्व् अजरम् मरायु ॥ १० १०६ ०६
पज्रेव चर्चरं जारम् मरायु क्षद्मेवार्थेषु तर्तरीथ उग्रा ।
ऋभू नापत् खरमज्रा खरज्रुर् वायुर् न पर्फरत् क्षयद् रयीणाम् ॥ १० १०६ ०७
घर्मेव मधु जठरे सनेरू भगेविता तुर्फरी फारिवारम् ।
पतरेव चचरा चन्द्रनिर्णिङ् मनऋङ्गा मनन्या ३ न जग्मी ॥ १० १०६ ०८
बृहन्तेव गम्भरेषु प्रतिष्ठाम् पादेव गाधं तरते विदाथः ।
कर्णेव शासुर् अनु हि स्मराथो ऽंशेव नो भजतं चित्रम् अप्नः ॥ १० १०६ ०९
आरङ्गरेव मध्व् एरयेथे सारघेव गवि नीचीनबारे ।
कीनारेव स्वेदम् आसिष्विदाना क्षामेवोर्जा सूयवसात् सचेथे ॥ १० १०६ १०
ऋध्याम स्तोमं सनुयाम वाजम् आ नो मन्त्रं सरथेहोप यातम् ।
यशो न पक्वम् मधु गोष्व् अन्तर् आ भूतांशो अश्विनोः कामम् अप्राः ॥ १० १०६ ११

आविर् अभून् महि माघोनम् एषां विश्वं जीवं तमसो निर् अमोचि ।
महि ज्योतिः पितृभिर् दत्तम् आगाद् उरुः पन्था दक्षिणाया अदर्शि ॥ १० १०७ ०१
उच्चा दिवि दक्षिणावन्तो अस्थुर् ये अश्वदाः सह ते सूर्येण ।
हिरण्यदा अमृतत्वम् भजन्ते वासोदाः सोम प्र तिरन्त आयुः ॥ १० १०७ ०२
दैवी पूर्तिर् दक्षिणा देवयज्या न कवारिभ्यो नहि ते पृणन्ति ।
अथा नरः प्रयतदक्षिणासो ऽवद्यभिया बह्वः पृणन्ति ॥ १० १०७ ०३
शतधारं वायुम् अर्कं स्वर्विदं नृचक्षसस् ते अभि चक्षते हविः ।
ये पृणन्ति प्र च यच्छन्ति संगमे ते दक्षिणां दुहते सप्तमातरम् ॥ १० १०७ ०४
दक्षिणावान् प्रथमो हूत एति दक्षिणावान् ग्रामणीर् अग्रम् एति ।
तम् एव मन्ये नृपतिं जनानां यः प्रथमो दक्षिणाम् आविवाय ॥ १० १०७ ०५
तम् एव ऋषिं तम् उ ब्रह्माणम् आहुर् यज्ञन्यं सामगाम् उक्थशासम् ।
स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणया रराध ॥ १० १०७ ०६
दक्षिणाश्वं दक्षिणा गां ददाति दक्षिणा चन्द्रम् उत यद् धिरण्यम् ।
दक्षिणान्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानन् ॥ १० १०७ ०७
न भोजा मम्रुर् न न्यर्थम् ईयुर् न रिष्यन्ति न व्यथन्ते ह भोजाः ।
इदं यद् विश्वम् भुवनं स्वश् चैतत् सर्वं दक्षिणैभ्यो ददाति ॥ १० १०७ ०८
भोजा जिग्युः सुरभिं योनिम् अग्रे भोजा जिग्युर् वध्व १ं या सुवासाः ।
भोजा जिग्युर् अन्तःपेयं सुराया भोजा जिग्युर् ये अहूताः प्रयन्ति ॥ १० १०७ ०९
भोजायाश्वं सम् मृजन्त्य् आशुम् भोजायास्ते कन्या शुम्भमाना ।
भोजस्येदम् पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रम् ॥ १० १०७ १०
भोजम् अश्वाः सुष्ठुवाहो वहन्ति सुवृद् रथो वर्तते दक्षिणायाः ।
भोजं देवासो ऽवता भरेषु भोजः शत्रून् समनीकेषु जेता ॥ १० १०७ ११

किम् इच्छन्ती सरमा प्रेदम् आनड् दूरे ह्य् अध्वा जगुरिः पराचैः ।
कास्मेहितिः का परितक्म्यासीत् कथं रसाया अतरः पयांसि ॥ १० १०८ ०१
इन्द्रस्य दूतीर् इषिता चरामि मह इच्छन्ती पणयो निधीन् वः ।

अतिष्कदो भियसा तन् न आवत् तथा रसाया अतरम् पयांसि ॥ १० १०८ ०२
कीदृङ्ङ् इन्द्रः सरमे का दृशीका यस्येदं दूतीर् असरः पराकात् ।
आ च गच्छान् मित्रम् एना दधामाथा गवां गोपतिर् नो भवाति ॥ १० १०८ ०३
नाहं तं वेद दभ्यं दभत् स यस्येदं दूतीर् असरम् पराकात् ।
न तं गूहन्ति स्रवतो गभीरा हता इन्द्रेण पणयः शयध्वे ॥ १० १०८ ०४
इमा गावः सरमे या ऐच्छः परि दिवो अन्तान् सुभगे पतन्ती ।
कस् त एना अव सृजाद् अयुध्व्य् उतास्माकम् आयुधा सन्ति तिग्मा ॥ १० १०८ ०५
असेन्या वः पणयो वचांस्य् अनिषव्यास् तन्वः सन्तु पापीः ।
अधृष्टो व एतवा अस्तु पन्था बृहस्पतिर् व उभया न मृळात् ॥ १० १०८ ०६
अयं निधिः सरमे अद्रिबुध्नो गोभिर् अश्वेभिर् वसुभिर् न्यृष्टः ।
रक्षन्ति तम् पणयो ये सुगोपा रेकु पदम् अलकम् आ जगन्थ ॥ १० १०८ ०७
एह गमन्न् ऋषयः सोमशिता अयास्यो अङ्गिरसो नवग्वाः ।
त एतम् ऊर्वं वि भजन्त गोनाम् अथैतद् वचः पणयो वमन्न् इत् ॥ १० १०८ ०८
एवा च त्वं सरम आजगन्थ प्रबाधिता सहसा दैव्येन ।
स्वसारं त्वा कृणवै मा पुनर् गा अप ते गवां सुभगे भजाम ॥ १० १०८ ०९
नाहं वेद भ्रातृत्वं नो स्वसृत्वम् इन्द्रो विदुर् अङ्गिरसश् च घोराः ।
गोकामा मे अच्छदयन् यद् आयम् अपात इत पणयो वरीयः ॥ १० १०८ १०
दूरम् इत पणयो वरीय उद् गावो यन्तु मिनतीर् ऋतेन ।
बृहस्पतिर् या अविन्दन् निगूळ्हाः सोमो ग्रावाण ऋषयश् च विप्राः ॥ १० १०८ ११

ते ऽवदन् प्रथमा ब्रह्मकिल्बिषे ऽकूपारः सलिलो मातरिश्वा ।
वीळुहरास् तप उग्रो मयोभूर् आपो देवीः प्रथमजा ऋतेन ॥ १० १०९ ०१
सोमो राजा प्रथमो ब्रह्मजायाम् पुनः प्रायच्छद् अहृणीयमानः ।
अन्वर्तिता वरुणो मित्र आसीद् अग्निर् होता हस्तगृह्या निनाय ॥ १० १०९ ०२
हस्तेनैव ग्राह्य आधिर् अस्या ब्रह्मजायेयम् इति चेद् अवोचन् ।
न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ॥ १० १०९ ०३
देवा एतस्याम् अवदन्त पूर्वे सप्तऋषयस् तपसे ये निषेदुः ।

भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन् ॥ १० १०९ ०४
ब्रह्मचारी चरति वेविषद् विषः स देवानाम् भवत्य् एकम् अङ्गम् ।
तेन जायाम् अन्व् अविन्दद् बृहस्पतिः सोमेन नीतां जुह्वं न देवाः ॥ १० १०९ ०५
पुनर् वै देवा अददुः पुनर् मनुष्या उत ।
राजानः सत्यं कृण्वाना ब्रह्मजायाम् पुनर् ददुः ॥ १० १०९ ०६
पुनर्दाय ब्रह्मजायां कृत्वी देवैर् निकिल्बिषम् ।
ऊर्जम् पृथिव्या भक्त्वायोरुगायम् उपासते ॥ १० १०९ ०७

समिद्धो अद्य मनुषो दुरोणे देवो देवान् यजसि जातवेदः ।
आ च वह मित्रमहश् चिकित्वान् त्वं दूतः कविर् असि प्रचेताः ॥ १० ११० ०१
तनूनपात् पथ ऋतस्य यानान् मध्वा समञ्जन् स्वदया सुजिह्व ।
मन्मानि धीभिर् उत यज्ञम् ऋन्धन् देवत्रा च कृणुह्य् अध्वरं नः ॥ १० ११० ०२
आजुह्वान ईड्यो वन्द्यश् चा याह्य् अग्ने वसुभिः सजोषाः ।
त्वं देवानाम् असि यह्व होता स एनान् यक्षीषितो यजीयान् ॥ १० ११० ०३
प्राचीनम् बर्हिः प्रदिशा पृथिव्या वस्तोर् अस्या वृज्यते अग्रे अह्नाम् ।
व्य् उ प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥ १० ११० ०४
व्यचस्वतीर् उर्विया वि श्रयन्ताम् पतिभ्यो न जनयः शुम्भमानाः ।
देवीर् द्वारो बृहतीर् विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ १० ११० ०५
आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने ॥ १० ११० ०६
दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञम् मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥ १० ११० ०७
आ नो यज्ञम् भारती तूयम् एत्व् इळा मनुष्वद् इह चेतयन्ती ।
तिस्रो देवीर् बर्हिर् एदं स्योनं सरस्वती स्वपसः सदन्तु ॥ १० ११० ०८
य इमे द्यावापृथिवी जनित्री रूपैर् अपिंशद् भुवनानि विश्वा ।
तम् अद्य होतर् इषितो यजीयान् देवं त्वष्टारम् इह यक्षि विद्वान् ॥ १० ११० ०९
उपावसृज त्मन्या समञ्जन् देवानाम् पाथ ऋतुथा हवींषि ।

वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यम् मधुना घृतेन ॥ १० ११० १०
सद्यो जातो व्य् अमिमीत यज्ञम् अग्निर् देवानाम् अभवत् पुरोगाः ।
अस्य होतुः प्रदिश्य् ऋतस्य वाचि स्वाहाकृतं हविर् अदन्तु देवाः ॥ १० ११० ११

मनीषिणः प्र भरध्वम् मनीषां यथा-यथा मतयः सन्ति नृणाम् ।
इन्द्रं सत्यैर् एरयामा कृतेभिः स हि वीरो गिर्वणस्युर् विदानः ॥ १० १११ ०१
ऋतस्य हि सदसो धीतिर् अद्यौत् सं गार्ष्टेयो वृषभो गोभिर् आनट् ।
उद् अतिष्ठत् तविषेणा रवेण महान्ति चित् सं विव्याचा रजांसि ॥ १० १११ ०२
इन्द्रः किल श्रुत्या अस्य वेद स हि जिष्णुः पथिकृत् सूर्याय ।
आन् मेनां कृण्वन्न् अच्युतो भुवद् गोः पतिर् दिवः सनजा अप्रतीतः ॥ १० १११ ०३
इन्द्रो मह्ना महतो अर्णवस्य व्रतामिनाद् अङ्गिरोभिर् गृणानः ।
पुरूणि चिन् नि तताना रजांसि दाधार यो धरुणं सत्यताता ॥ १० १११ ०४
इन्द्रो दिवः प्रतिमानम् पृथिव्या विश्वा वेद सवना हन्ति शुष्णम् ।
महीं चिद् द्याम् आतनोत् सूर्येण चास्कम्भ चित् कम्भनेन स्कभीयान् ॥ १० १११ ०५
वज्रेण हि वृत्रहा वृत्रम् अस्तर् अदेवस्य शूशुवानस्य मायाः ।
वि धृष्णो अत्र धृषता जघन्थाथाभवो मघवन् बाह्वोजाः ॥ १० १११ ०६
सचन्त यद् उषसः सूर्येण चित्राम् अस्य केतवो राम् अविन्दन् ।
आ यन् नक्षत्रं ददृशे दिवो न पुनर् यतो नकिर् अद्धा नु वेद ॥ १० १११ ०७
दूरं किल प्रथमा जग्मुर् आसाम् इन्द्रस्य याः प्रसवे सस्रुर् आपः ।
क्व स्विद् अग्रं क्व बुध्न आसाम् आपो मध्यं क्व वो नूनम् अन्तः ॥ १० १११ ०८
सृजः सिन्धूंर् अहिना जग्रसानाँ आद् इद् एताः प्र विविज्रे जवेन ।
मुमुक्षमाणा उत या मुमुच्रे ऽधेद् एता न रमन्ते नितिक्ताः ॥ १० १११ ०९
सध्रीचीः सिन्धुम् उशतीर् इवायन् सनाज् जार आरितः पूर्भिद् आसाम् ।
अस्तम् आ ते पार्थिवा वसून्य् अस्मे जग्मुः सूनृता इन्द्र पूर्वीः ॥ १० १११ १०

इन्द्र पिब प्रतिकामं सुतस्य प्रातःसावस् तव हि पूर्वपीतिः ।

हर्षस्व हन्तवे शूर शत्रून् उक्थेभिष् टे वीर्या३ प्र ब्रवाम ॥ १० ११२ ०१
यस् ते रथो मनसो जवीयान् एन्द्र तेन सोमपेयाय याहि ।
तूयम् आ ते हरयः प्र द्रवन्तु येभिर् यासि वृषभिर् मन्दमानः ॥ १० ११२ ०२
हरित्वता वर्चसा सूर्यस्य श्रेष्ठै रूपैस् तन्वं स्पर्शयस्व ।
अस्माभिर् इन्द्र सखिभिर् हुवानः सध्रीचीनो मादयस्वा निषद्य ॥ १० ११२ ०३
यस्य त्यत् ते महिमानम् मदेष्व् इमे मही रोदसी नाविविक्ताम् ।
तद् ओक आ हरिभिर् इन्द्र युक्तैः प्रियेभिर् याहि प्रियम् अन्नम् अच्छ ॥ १० ११२ ०४
यस्य शश्वत् पपिवाँ इन्द्र शत्रून् अनानुकृत्या रण्या चकर्थ ।
स ते पुरंधिं तविषीम् इयर्ति स ते मदाय सुत इन्द्र सोमः ॥ १० ११२ ०५
इदं ते पात्रं सनवित्तम् इन्द्र पिबा सोमम् एना शतक्रतो ।
पूर्ण आहावो मदिरस्य मध्वो यं विश्व इद् अभिहर्यन्ति देवाः ॥ १० ११२ ०६
वि हि त्वाम् इन्द्र पुरुधा जनासो हितप्रयसो वृषभ ह्वयन्ते ।
अस्माकं ते मधुमत्तमानीमा भुवन् सवना तेषु हर्य ॥ १० ११२ ०७
प्र त इन्द्र पूर्व्याणि प्र नूनं वीर्या वोचम् प्रथमा कृतानि ।
सतीनमन्युर् अश्रथायो अद्रिं सुवेदनाम् अकृणोर् ब्रह्मणे गाम् ॥ १० ११२ ०८
नि षु सीद गणपते गणेषु त्वाम् आहुर् विप्रतमं कवीनाम् ।
न ऋते त्वत् क्रियते किं चनारे महाम् अर्कम् मघवञ् चित्रम् अर्च ॥ १० ११२ ०९
अभिख्या नो मघवन् नाधमानान् सखे बोधि वसुपते सखीनाम् ।
रणं कृधि रणकृत् सत्यशुष्माभक्ते चिद् आ भजा राये अस्मान् ॥ १० ११२ १०

तम् अस्य द्यावापृथिवी सचेतसा विश्वेभिर् देवैर् अनु शुष्मम् आवताम् ।
यद् ऐत् कृण्वानो महिमानम् इन्द्रियम् पीत्वी सोमस्य क्रतुमाँ अवर्धत ॥ १० ११३ ०१
तम् अस्य विष्णुर् महिमानम् ओजसांशुं दधन्वान् मधुनो वि रप्शते ।
देवेभिर् इन्द्रो मघवा सयावभिर् वृत्रं जघन्वाँ अभवद् वरेण्यः ॥ १० ११३ ०२
वृत्रेण यद् अहिना बिभ्रद् आयुधा समस्थिथा युधये शंसम् आविदे ।
विश्वे ते अत्र मरुतः सह त्मनावर्धन्न् उग्र महिमानम् इन्द्रियम् ॥ १० ११३ ०३
जज्ञान एव व्य् अबाधत स्पृधः प्रापश्यद् वीरो अभि पौंस्यं रणम् ।

अवृश्चद् अद्रिम् अव सस्यदः सृजद् अस्तभ्नान् नाकं स्वपस्यया पृथुम् ॥ १० ११३ ०४
आद् इन्द्रः सत्रा तविषीर् अपत्यत वरीयो द्यावापृथिवी अबाधत ।
अवाभरद् धृषितो वज्रम् आयसं शेवम् मित्राय वरुणाय दाशुषे ॥ १० ११३ ०५
इन्द्रस्यात्र तविषीभ्यो विरप्शिन ऋघायतो अरंहयन्त मन्यवे ।
वृत्रं यद् उग्रो व्य् अवृश्चद् ओजसापो बिभ्रतं तमसा परीवृतम् ॥ १० ११३ ०६
या वीर्याणि प्रथमानि कर्त्वा महित्वेभिर् यतमानौ समीयतुः ।
ध्वान्तं तमो ऽव दध्वसे हत इन्द्रो मह्ना पूर्वहूताव् अपत्यत ॥ १० ११३ ०७
विश्वे देवासो अध वृष्ण्यानि ते ऽवर्धयन् सोमवत्या वचस्यया ।
रद्धं वृत्रम् अहिम् इन्द्रस्य हन्मनाग्निर् न जम्भैस् तृष्व् अन्नम् आवयत् ॥ १० ११३ ०८
भूरि दक्षेभिर् वचनेभिर् ऋक्वभिः सख्येभिः सख्यानि प्र वोचत ।
इन्द्रो धुनिं च चुमुरिं च दम्भयञ् छ्रद्धामनस्या शृणुते दभीतये ॥ १० ११३ ०९
त्वम् पुरूण्य् आ भरा स्वश्व्या येभिर् मंसै निवचनानि शंसन् ।
सुगेभिर् विश्वा दुरिता तरेम विदो षु ण उर्विया गाधम् अद्य ॥ १० ११३ १०

घर्मा समन्ता त्रिवृतं व्य् आपतुस् तयोर् जुष्टिम् मातरिश्वा जगाम ।
दिवस् पयो दिधिषाणा अवेषन् विदुर् देवाः सहसामानम् अर्कम् ॥ १० ११४ ०१
तिस्रो देष्ट्राय निरृतीर् उपासते दीर्घश्रुतो वि हि जानन्ति वह्नयः ।
तासां नि चिक्युः कवयो निदानम् परेषु या गुह्येषु व्रतेषु ॥ १० ११४ ०२
चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते ।
तस्यां सुपर्णा वृषणा नि षेदतुर् यत्र देवा दधिरे भागधेयम् ॥ १० ११४ ०३
एकः सुपर्णः स समुद्रम् आ विवेश स इदं विश्वम् भुवनं वि चष्टे ।
तम् पाकेन मनसापश्यम् अन्तितस् तम् माता रेळ्हि स उ रेळ्हि मातरम् ॥ १० ११४ ०४
सुपर्णं विप्राः कवयो वचोभिर् एकं सन्तम् बहुधा कल्पयन्ति ।
छन्दांसि च दधतो अध्वरेषु ग्रहान् सोमस्य मिमते द्वादश ॥ १० ११४ ०५
षट्त्रिंशांश् च चतुरः कल्पयन्तश् छन्दांसि च दधत आद्वादशम् ।
यज्ञं विमाय कवयो मनीष ऋक्सामाभ्याम् प्र रथं वर्तयन्ति ॥ १० ११४ ०६

चतुर्दशान्ये महिमानो अस्य तं धीरा वाचा प्र णयन्ति सप्त ।
आप्नानं तीर्थं क इह प्र वोचद् येन पथा प्रपिबन्ते सुतस्य ॥ १० ११४ ०७
सहस्रधा पञ्चदशान्य् उक्था यावद् द्यावापृथिवी तावद् इत् तत् ।
सहस्रधा महिमानः सहस्रं यावद् ब्रह्म विष्ठितं तावती वाक् ॥ १० ११४ ०८
कश् छन्दसां योगम् आ वेद धीरः को धिष्ण्याम् प्रति वाचम् पपाद ।
कम् ऋत्विजाम् अष्टमं शूरम् आहुर् हरी इन्द्रस्य नि चिकाय कः स्विद् ॥ १० ११४ ०९
भूम्या अन्तम् पर्य् एके चरन्ति रथस्य धूर्षु युक्तासो अस्थुः ।
श्रमस्य दायं वि भजन्त्य् एभ्यो यदा यमो भवति हर्म्ये हितः ॥ १० ११४ १०

चित्र इच् छिशोस् तरुणस्य वक्षथो न यो मातराव् अप्येति धातवे ।
अनूधा यदि जीजनद् अधा च नु ववक्ष सद्यो महि दूत्य १ं चरन् ॥ १० ११५ ०१
अग्निर् ह नाम धायि दन्न् अपस्तमः सं यो वना युवते भस्मना दता ।
अभिप्रमुरा जुह्वा स्वध्वर इनो न प्रोथमानो यवसे वृषा ॥ १० ११५ ०२
तं वो विं न द्रुषदं देवम् अन्धस इन्दुम् प्रोथन्तम् प्रवपन्तम् अर्णवम् ।
आसा वह्निं न शोचिषा विरप्शिनम् महिव्रतं न सरजन्तम् अध्वनः ॥ १० ११५ ०३
वि यस्य ते ज्रयसानस्याजर धक्षोर् न वाताः परि सन्त्य् अच्युताः ।
आ रण्वासो युयुधयो न सत्वनं त्रितं नशन्त प्र शिषन्त इष्टये ॥ १० ११५ ०४
स इद् अग्निः कण्वतमः कण्वसखार्यः परस्यान्तरस्य तरुषः ।
अग्निः पातु गृणतो अग्निः सूरीन् अग्निर् ददातु तेषाम् अवो नः ॥ १० ११५ ०५
वाजिन्तमाय सह्यसे सुपित्र्य तृषु च्यवानो अनु जातवेदसे ।
अनुद्रे चिद् यो धृषता वरं सते महिन्तमाय धन्वनेद् अविष्यते ॥ १० ११५ ०६
एवाग्निर् मर्तैः सह सूरिभिर् वसु ष्टवे सहसः सूनरो नृभिः ।
मित्रासो न ये सुधिता ऋतायवो द्यावो न द्युम्नैर् अभि सन्ति मानुषान् ॥ १० ११५ ०७
ऊर्जो नपात् सहसावन्न् इति त्वोपस्तुतस्य वन्दते वृषा वाक् ।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥ १० ११५ ०८
इति त्वाग्ने वृष्टिहव्यस्य पुत्रा उपस्तुतास ऋषयो ऽवोचन् ।

तांश् च पाहि गृणतश् च सूरीन् वषड् वषळ् इत्य् ऊर्ध्वासो अनक्षन् नमो नम इत्य् ऊर्ध्वासो अनक्षन् ॥ १० ११५ ०९

पिबा सोमम् महत इन्द्रियाय पिबा वृत्राय हन्तवे शविष्ठ ।
पिब राये शवसे हूयमानः पिब मध्वस् तृपद् इन्द्रा वृषस्व ॥ १० ११६ ०१
अस्य पिब क्षुमतः प्रस्थितस्येन्द्र सोमस्य वरम् आ सुतस्य ।
स्वस्तिदा मनसा मादयस्वार्वाचीनो रेवते सौभगाय ॥ १० ११६ ०२
ममत्तु त्वा दिव्यः सोम इन्द्र ममत्तु यः सूयते पार्थिवेषु ।
ममत्तु येन वरिवश् चकर्थ ममत्तु येन निरिणासि शत्रून् ॥ १० ११६ ०३
आ द्विबर्हा अमिनो यात्व् इन्द्रो वृषा हरिभ्याम् परिषिक्तम् अन्धः ।
गव्य् आ सुतस्य प्रभृतस्य मध्वः सत्रा खेदाम् अरुशहा वृषस्व ॥ १० ११६ ०४
नि तिग्मानि भ्राशयन् भ्राश्यान्य् अव स्थिरा तनुहि यातुजूनाम् ।
उग्राय ते सहो बलं ददामि प्रतीत्या शत्रून् विगदेषु वृश्च ॥ १० ११६ ०५
व्य् अ १ र्य इन्द्र तनुहि श्रवांस्य् ओज स्थिरेव धन्वनो ऽभिमातीः ।
अस्मद्र्यग् वावृधानः सहोभिर् अनिभृष्टस् तन्वं वावृधस्व ॥ १० ११६ ०६
इदं हविर् मघवन् तुभ्यं रातम् प्रति सम्राळ् अहृणानो गृभाय ।
तुभ्यं सुतो मघवन् तुभ्यम् पक्वो ऽद्धीन्द्र पिब च प्रस्थितस्य ॥ १० ११६ ०७
अद्धीद् इन्द्र प्रस्थितेमा हवींषि चनो दधिष्व पचतोत सोमम् ।
प्रयस्वन्तः प्रति हर्यामसि त्वा सत्याः सन्तु यजमानस्य कामाः ॥ १० ११६ ०८
प्रेन्द्राग्निभ्यां सुवचस्याम् इयर्मि सिन्धाव् इव प्रेरयं नावम् अर्कैः ।
अया इव परि चरन्ति देवा ये अस्मभ्यं धनदा उद्भिदश् च ॥ १० ११६ ०९

न वा उ देवाः क्षुधम् इद् वधं ददुर् उताशितम् उप गच्छन्ति मृत्यवः ।
उतो रयिः पृणतो नोप दस्यत्य् उतापृणन् मर्डितारं न विन्दते ॥ १० ११७ ०१
य आध्राय चकमानाय पित्वो ऽन्नवान् सन् रफितायोपजग्मुषे ।
स्थिरम् मनः कृणुते सेवते पुरोतो चित् स मर्डितारं न विन्दते ॥ १० ११७ ०२

स इद् भोजो यो गृहवे ददात्य् अन्नकामाय चरते कृशाय ।
अरम् अस्मै भवति यामहूता उतापरीषु कृणुते सखायम् ॥ १० ११७ ०३
न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः ।
अपास्मात् प्रेयान् न तद् ओको अस्ति पृणन्तम् अन्यम् अरणं चिद् इच्छेत् ॥ १०
११७ ०४
पृणीयाद् इन् नाधमानाय तव्यान् द्राघीयांसम् अनु पश्येत पन्थाम् ।
ओ हि वर्तन्ते रथ्येव चक्रान्यम्-अन्यम् उप तिष्ठन्त रायः ॥ १० ११७ ०५
मोघम् अन्नं विन्दते अप्रचेताः सत्यम् ब्रवीमि वध इत् स तस्य ।
नार्यमणम् पुष्यति नो सखायं केवलाघो भवति केवलादी ॥ १० ११७ ०६
कृषन्न् इत् फाल आशितं कृणोति यन्न् अध्वानम् अप वृङ्क्ते चरित्रैः ।
वदन् ब्रह्मावदतो वनीयान् पृणन्न् आपिर् अपृणन्तम् अभि ष्यात् ॥ १० ११७ ०७
एकपाद् भूयो द्विपदो वि चक्रमे द्विपात् त्रिपादम् अभ्य् एति पश्चात् ।
चतुष्पाद् एति द्विपदाम् अभिस्वरे सम्पश्यन् पङ्क्तीर् उपतिष्ठमानः ॥ १० ११७ ०८
समौ चिद् धस्तौ न समं विविष्टः सम्मातरा चिन् न समं दुहाते ।
यमयोश् चिन् न समा वीर्याणि ज्ञाती चित् सन्तौ न समम् पृणीतः ॥ १० ११७ ०९

अग्ने हंसि न्य् अ१त्रिणं दीद्यन् मर्त्येष्व् आ ।
स्वे क्षये शुचिव्रत ॥ १० ११८ ०१
उत् तिष्ठसि स्वाहुतो घृतानि प्रति मोदसे ।
यत् त्वा स्रुचः समस्थिरन् ॥ १० ११८ ०२
स आहुतो वि रोचते ऽग्निर् ईळेन्यो गिरा ।
स्रुचा प्रतीकम् अज्यते ॥ १० ११८ ०३
घृतेनाग्निः सम् अज्यते मधुप्रतीक आहुतः ।
रोचमानो विभावसुः ॥ १० ११८ ०४
जरमाणः सम् इध्यसे देवेभ्यो हव्यवाहन ।
तं त्वा हवन्त मर्त्याः ॥ १० ११८ ०५
तम् मर्ता अमर्त्यं घृतेनाग्निं सपर्यत ।

अदाभ्यं गृहपतिम् ॥ १० ११८ ०६
अदाभ्येन शोचिषाग्ने रक्षस् त्वं दह ।
गोपा ऋतस्य दीदिहि ॥ १० ११८ ०७
स त्वम् अग्ने प्रतीकेन प्रत्य् ओष यातुधान्यः ।
उरुक्षयेषु दीद्यत् ॥ १० ११८ ०८
तं त्वा गीर्भिर् उरुक्षया हव्यवाहं सम् ईधिरे ।
यजिष्ठम् मानुषे जने ॥ १० ११८ ०९

इति वा इति मे मनो गाम् अश्वं सनुयाम् इति ।
कुवित् सोमस्यापाम् इति ॥ १० ११९ ०१
प्र वाता इव दोधत उन् मा पीता अयंसत ।
कुवित् सोमस्यापाम् इति ॥ १० ११९ ०२
उन् मा पीता अयंसत रथम् अश्वा इवाशवः ।
कुवित् सोमस्यापाम् इति ॥ १० ११९ ०३
उप मा मतिर् अस्थित वाश्रा पुत्रम् इव प्रियम् ।
कुवित् सोमस्यापाम् इति ॥ १० ११९ ०४
अहं तष्टेव वन्धुरम् पर्य् अचामि हृदा मतिम् ।
कुवित् सोमस्यापाम् इति ॥ १० ११९ ०५
नहि मे अक्षिपच् चनाच्छान्त्सुः पञ्च कृष्टयः ।
कुवित् सोमस्यापाम् इति ॥ १० ११९ ०६
नहि मे रोदसी उभे अन्यम् पक्षं चन प्रति ।
कुवित् सोमस्यापाम् इति ॥ १० ११९ ०७
अभि द्याम् महिना भुवम् अभी३म् माम् पृथिवीम् महीम् ।
कुवित् सोमस्यापाम् इति ॥ १० ११९ ०८
हन्ताहम् पृथिवीम् इमां नि दधानीह वेह वा ।
कुवित् सोमस्यापाम् इति ॥ १० ११९ ०९
ओषम् इत् पृथिवीम् अहं जङ्घनानीह वेह वा ।
कुवित् सोमस्यापाम् इति ॥ १० ११९ १०

दिवि मे अन्यः पक्षो ऽधो अन्यम् अचीकृषम् ।
कुवित् सोमस्यापाम् इति ॥ १० ११९ ११
अहम् अस्मि महामहो ऽभिनभ्यम् उदीषितः ।
कुवित् सोमस्यापाम् इति ॥ १० ११९ १२
गृहो याम्य् अरंकृतो देवेभ्यो हव्यवाहनः ।
कुवित् सोमस्यापाम् इति ॥ १० ११९ १३

तद् इद् आस भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस् त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रून् अनु यं विश्वे मदन्त्य् ऊमाः ॥ १० १२० ०१
वावृधानः शवसा भूर्योजाः शत्रुर् दासाय भियसं दधाति ।
अव्यनच् च व्यनच् च सस्नि सं ते नवन्त प्रभृता मदेषु ॥ १० १२० ०२
त्वे क्रतुम् अपि वृञ्जन्ति विश्वे द्विर् यद् एते त्रिर् भवन्त्य् ऊमाः ।
स्वादोः स्वादीयः स्वादुना सृजा सम् अदः सु मधु मधुनाभि योधीः ॥ १० १२० ०३
इति चिद् धि त्वा धना जयन्तम् मदे-मदे अनुमदन्ति विप्राः ।
ओजीयो धृष्णो स्थिरम् आ तनुष्व मा त्वा दभन् यातुधाना दुरेवाः ॥ १० १२० ०४
त्वया वयं शाशद्महे रणेषु प्रपश्यन्तो युधेन्यानि भूरि ।
चोदयामि त आयुधा वचोभिः सं ते शिशामि ब्रह्मणा वयांसि ॥ १० १२० ०५
स्तुषेय्यम् पुरुवर्पसम् ऋभ्वम् इनतमम् आप्त्यम् आप्त्यानाम् ।
आ दर्षते शवसा सप्त दानून् प्र साक्षते प्रतिमानानि भूरि ॥ १० १२० ०६
नि तद् दधिषे ऽवरम् परं च यस्मिन्न् आविथावसा दुरोणे ।
आ मातरा स्थापयसे जिगत्नू अत इनोषि कर्वरा पुरूणि ॥ १० १२० ०७
इमा ब्रह्म बृहद्दिवो विवक्तीन्द्राय शूषम् अग्रियः स्वर्षाः ।
महो गोत्रस्य क्षयति स्वराजो दुरश् च विश्वा अवृणोद् अप स्वाः ॥ १० १२० ०८
एवा महान् बृहद्दिवो अथर्वावोचत् स्वां तन्व१ म् इन्द्रम् एव ।
स्वसारो मातरिभ्वरीर् अरिप्रा हिन्वन्ति च शवसा वर्धयन्ति च ॥ १० १२० ०९

हिरण्यगर्भः सम् अवर्तताग्रे भूतस्य जातः पतिर् एक आसीत् ।
स दाधार पृथिवीं द्याम् उतेमां कस्मै देवाय हविषा विधेम ॥ १० १२१ ०१
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ १० १२१ ०२
यः प्राणतो निमिषतो महित्वैक इद् राजा जगतो बभूव ।
य ईशे अस्य द्विपदश् चतुष्पदः कस्मै देवाय हविषा विधेम ॥ १० १२१ ०३
यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥ १० १२१ ०४
येन द्यौर् उग्रा पृथिवी च दृळ्हा येन स्व स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥ १० १२१ ०५
यं क्रन्दसी अवसा तस्तभाने अभ्य् ऐक्षेताम् मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥ १० १२१ ०६
आपो ह यद् बृहतीर् विश्वम् आयन् गर्भं दधाना जनयन्तीर् अग्निम् ।
ततो देवानां सम् अवर्ततासुर् एकः कस्मै देवाय हविषा विधेम ॥ १० १२१ ०७
यश् चिद् आपो महिना पर्यपश्यद् दक्षं दधाना जनयन्तीर् यज्ञम् ।
यो देवेष्व् अधि देव एक आसीत् कस्मै देवाय हविषा विधेम ॥ १० १२१ ०८
मा नो हिंसीज् जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान ।
यश् चापश् चन्द्रा बृहतीर् जजान कस्मै देवाय हविषा विधेम ॥ १० १२१ ०९
प्रजापते न त्वद् एतान्य् अन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास् ते जुहुमस् तन् नो अस्तु वयं स्याम पतयो रयीणाम् ॥ १० १२१ १०

वसुं न चित्रमहसं गृणीषे वामं शेवम् अतिथिम् अद्विषेण्यम् ।
स रासते शुरुधो विश्वधायसो ऽग्निर् होता गृहपतिः सुवीर्यम् ॥ १० १२२ ०१
जुषाणो अग्ने प्रति हर्य मे वचो विश्वानि विद्वान् वयुनानि सुक्रतो ।
घृतनिर्णिग् ब्रह्मणे गातुम् एरय तव देवा अजनयन्न् अनु व्रतम् ॥ १० १२२ ०२
सप्त धामानि परियन्न् अमर्त्यो दाशद् दाशुषे सुकृते मामहस्व ।
सुवीरेण रयिणाग्ने स्वाभुवा यस् त आनट् समिधा तं जुषस्व ॥ १० १२२ ०३

यज्ञस्य केतुम् प्रथमम् पुरोहितं हविष्मन्त ईळते सप्त वाजिनम् ।
शृण्वन्तम् अग्निं घृतपृष्ठम् उक्षणम् पृणन्तं देवम् पृणते सुवीर्यम् ॥ १० १२२ ०४
त्वं दूतः प्रथमो वरेण्यः स हूयमानो अमृताय मत्स्व ।
त्वाम् मर्जयन् मरुतो दाशुषो गृहे त्वां स्तोमेभिर् भृगवो वि रुरुचुः ॥ १० १२२ ०५
इषं दुहन् सुदुघां विश्वधायसं यज्ञप्रिये यजमानाय सुक्रतो ।
अग्ने घृतस्नुस् त्रिर् ऋतानि दीद्यद् वर्तिर् यज्ञम् परियन् सुक्रतूयसे ॥ १० १२२ ०६
त्वाम् इद् अस्या उषसो व्युष्टिषु दूतं कृण्वाना अयजन्त मानुषाः ।
त्वां देवा महयाय्याय वावृधुर् आज्यम् अग्ने निमृजन्तो अध्वरे ॥ १० १२२ ०७
नि त्वा वसिष्ठा अह्वन्त वाजिनं गृणन्तो अग्ने विदथेषु वेधसः ।
रायस् पोषं यजमानेषु धारय यूयम् पात स्वस्तिभिः सदा नः ॥ १० १२२ ०८

अयं वेनश् चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।
इमम् अपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥ १० १२३ ०१
समुद्राद् ऊर्मिम् उद् इयर्ति वेनो नभोजाः पृष्ठं हर्यतस्य दर्शि ।
ऋतस्य सानाव् अधि विष्टपि भ्राट् समानं योनिम् अभ्य् अनूषत व्राः ॥ १० १२३ ०२
समानम् पूर्वीर् अभि वावशानास् तिष्ठन् वत्सस्य मातरः सनीळाः ।
ऋतस्य सानाव् अधि चक्रमाणा रिहन्ति मध्वो अमृतस्य वाणीः ॥ १० १२३ ०३
जानन्तो रूपम् अकृपन्त विप्रा मृगस्य घोषम् महिषस्य हि ग्मन् ।
ऋतेन यन्तो अधि सिन्धुम् अस्थुर् विदद् गन्धर्वो अमृतानि नाम ॥ १० १२३ ०४
अप्सरा जारम् उपसिष्मियाणा योषा बिभर्ति परमे व्योमन् ।
चरत् प्रियस्य योनिषु प्रियः सन् सीदत् पक्षे हिरण्यये स वेनः ॥ १० १२३ ०५
नाके सुपर्णम् उप यत् पतन्तं हृदा वेनन्तो अभ्य् अचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनम् भुरण्युम् ॥ १० १२३ ०६
ऊर्ध्वो गन्धर्वो अधि नाके अस्थात् प्रत्यङ् चित्रा बिभ्रद् अस्यायुधानि ।
वसानो अत्कं सुरभिं दृशे कं स्व १ र् ण नाम जनत प्रियाणि ॥ १० १२३ ०७
द्रप्सः समुद्रम् अभि यज् जिगाति पश्यन् गृध्रस्य चक्षसा विधर्मन् ।
भानुः शुक्रेण शोचिषा चकानस् तृतीये चक्रे रजसि प्रियाणि ॥ १० १२३ ०८

इमं नो अग्न उप यज्ञम् एहि पञ्चयामं त्रिवृतं सप्ततन्तुम् ।
असो हव्यवाळ् उत नः पुरोगा ज्योग् एव दीर्घं तम आशयिष्ठाः ॥ १० १२४ ०१
अदेवाद् देवः प्रचता गुहा यन् प्रपश्यमानो अमृतत्वम् एमि ।
शिवं यत् सन्तम् अशिवो जहामि स्वात् सख्याद् अरणीं नाभिम् एमि ॥ १० १२४ ०२
पश्यन्न् अन्यस्या अतिथिं वयाया ऋतस्य धाम वि मिमे पुरूणि ।
शंसामि पित्रे असुराय शेवम् अयज्ञियाद् यज्ञियम् भागम् एमि ॥ १० १२४ ०३
बह्वीः समा अकरम् अन्तर् अस्मिन्न् इन्द्रं वृणानः पितरं जहामि ।
अग्निः सोमो वरुणस् ते च्यवन्ते पर्यावर्द् राष्ट्रं तद् अवाम्य् आयन् ॥ १० १२४ ०४
निर्माया उ त्ये असुरा अभूवन् त्वं च मा वरुण कामयासे ।
ऋतेन राजन्न् अनृतं विविञ्चन् मम राष्ट्रस्याधिपत्यम् एहि ॥ १० १२४ ०५
इदं स्वर् इदम् इद् आस वामम् अयम् प्रकाश उर्व् अ १ न्तरिक्षम् ।
हनाव वृत्रं निरेहि सोम हविष् ट्वा सन्तं हविषा यजाम ॥ १० १२४ ०६
कविः कवित्वा दिवि रूपम् आसजद् अप्रभूती वरुणो निर् अपः सृजत् ।
क्षेमं कृण्वाना जनयो न सिन्धवस् ता अस्य वर्णं शुचयो भरिभ्रति ॥ १० १२४ ०७
ता अस्य ज्येष्ठम् इन्द्रियं सचन्ते ता ईम् आ क्षेति स्वधया मदन्तीः ।
ता ई विशो न राजानं वृणाना बीभत्सुवो अप वृत्राद् अतिष्ठन् ॥ १० १२४ ०८
बीभत्सूनां सयुजं हंसम् आहुर् अपां दिव्यानां सख्ये चरन्तम् ।
अनुष्टुभम् अनु चर्चूर्यमाणम् इन्द्रं नि चिक्युः कवयो मनीषा ॥ १० १२४ ०९

अहं रुद्रेभिर् वसुभिश् चराम्य् अहम् आदित्यैर् उत विश्वदेवैः ।
अहम् मित्रावरुणोभा बिभर्म्य् अहम् इन्द्राग्नी अहम् अश्विनोभा ॥ १० १२५ ०१
अहं सोमम् आहनसम् बिभर्म्य् अहं त्वष्टारम् उत पूषणम् भगम् ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये ३ यजमानाय सुन्वते ॥ १० १२५ ०२
अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
ताम् मा देवा व्य् अदधुः पुरुत्रा भूरिष्ठात्राम् भूर्य् आविशयन्तीम् ॥ १० १२५ ०३

मया सो अन्नम् अत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्य् उक्तम् ।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥ १० १२५ ०४
अहम् एव स्वयम् इदं वदामि जुष्टं देवेभिर् उत मानुषेभिः ।
यं कामये तं-तम् उग्रं कृणोमि तम् ब्रह्माणं तम् ऋषिं तं सुमेधाम् ॥ १० १२५ ०५
अहं रुद्राय धनुर् आ तनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।
अहं जनाय समदं कृणोम्य् अहं द्यावापृथिवी आ विवेश ॥ १० १२५ ०६
अहं सुवे पितरम् अस्य मूर्धन् मम योनिर् अप्स्व् अ १ न्तः समुद्रे ।
ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥ १० १२५ ०७
अहम् एव वात इव प्र वाम्य् आरभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिना सम् बभूव ॥ १० १२५ ०८

न तम् अंहो न दुरितं देवासो अष्ट मर्त्यम् ।
सजोषसो यम् अर्यमा मित्रो नयन्ति वरुणो अति द्विषः ॥ १० १२६ ०१
तद् धि वयं वृणीमहे वरुण मित्रार्यमन् ।
येना निर् अंहसो यूयम् पाथ नेथा च मर्त्यम् अति द्विषः ॥ १० १२६ ०२
ते नूनं नो ऽयम् ऊतये वरुणो मित्रो अर्यमा ।
नयिष्ठा उ नो नेषणि पर्षिष्ठा उ नः पर्षण्य् अति द्विषः ॥ १० १२६ ०३
यूयं विश्वम् परि पाथ वरुणो मित्रो अर्यमा ।
युष्माकं शर्मणि प्रिये स्याम सुप्रणीतयो ऽति द्विषः ॥ १० १२६ ०४
आदित्यासो अति स्रिधो वरुणो मित्रो अर्यमा ।
उग्रम् मरुद्भी रुद्रं हुवेमेन्द्रम् अग्निं स्वस्तये ऽति द्विषः ॥ १० १२६ ०५
नेतार ऊ षु णस् तिरो वरुणो मित्रो अर्यमा ।
अति विश्वानि दुरिता राजानश् चर्षणीनाम् अति द्विषः ॥ १० १२६ ०६
शुनम् अस्मभ्यम् ऊतये वरुणो मित्रो अर्यमा ।
शर्म यच्छन्तु सप्रथ आदित्यासो यद् ईमहे अति द्विषः ॥ १० १२६ ०७
यथा ह त्यद् वसवो गौर्यं चित् पदि षिताम् अमुञ्चता यजत्राः ।
एवो ष्व् अ १ स्मन् मुञ्चता व्य् अंहः प्र तार्य् अग्ने प्रतरं न आयुः ॥ १० १२६ ०८

रात्री॒ व्य् अख्यद् आय॒ती पु॑रु॒त्रा दे॒व्य् अ॒१॒ क्षभिः॑ ।
विश्वा॒ अधि॒ श्रियो॑ ऽधित ॥ १० १२७ ०१
ओर्व् अप्रा॒ अम॑र्त्या नि॒वतो॑ दे॒व्य् उ॒१॒ द्वतः॑ ।
ज्योति॑षा बाधते॒ तमः॑ ॥ १० १२७ ०२
निर् उ॒ स्वसा॑रम् अस्कृतो॒षसं॑ दे॒व्य् आय॒ती ।
अपेद् उ॑ हासते॒ तमः॑ ॥ १० १२७ ०३
सा नो॑ अ॒द्य यस्या॑ व॒यं नि ते॒ याम॒न्न् अवि॑क्ष्महि ।
वृ॒क्षे न व॑स॒तिं वयः॑ ॥ १० १२७ ०४
नि ग्रामा॑सो अविक्षत॒ नि प॒द्वन्तो॒ नि प॒क्षिणः॑ ।
नि श्ये॒नास॑श् चिद् अ॒र्थिनः॑ ॥ १० १२७ ०५
या॒वया॑ वृ॒क्य॒१॒ं वृकं॑ य॒वय॑ स्ते॒नम् ऊ॑र्म्ये ।
अथा॑ नः सु॒तरा॑ भव ॥ १० १२७ ०६
उप॑ मा॒ पेपि॑श॒त् तमः॑ कृ॒ष्णं व्यक्तम् अस्थित ।
उष॑ ऋ॒णेव॑ यातय ॥ १० १२७ ०७
उप॑ ते॒ गा इ॒वाक॑रं वृणी॒ष्व दु॑हितर् दिवः ।
रात्रि॒ स्तोमं॒ न जि॒ग्युषे॑ ॥ १० १२७ ०८

ममा॑ग्ने॒ वर्चो॑ विह॒वेष्व् अ॑स्तु व॒यं त्वेन्धा॑नास् त॒न्वम् पुषेम ।
मह्यं॑ नमन्ताम् प्र॒दिश॒श् चत॑स्र॒स् त्वयाध्य॑क्षेण॒ पृत॑ना जयेम ॥ १० १२८ ०१
मम॑ दे॒वा वि॑ह॒वे स॑न्तु॒ सर्व॒ इन्द्र॑वन्तो म॒रुतो॒ विष्णु॑र् अ॒ग्निः ।
ममा॒न्तरि॑क्षम् उ॒रुलो॑कम् अस्तु॒ मह्यं॒ वातः॑ पवतां॒ कामे॑ अ॒स्मिन् ॥ १० १२८ ०२
मयि॑ दे॒वा द्रवि॑ण॒म् आ य॑जन्ता॒म् मय्य् आ॒शीर् अ॑स्तु॒ मयि॑ दे॒वहू॑तिः ।
दैव्या॒ होता॑रो वनुषन्त॒ पूर्वे ऽरि॑ष्टाः स्याम त॒न्वा सु॒वीराः॑ ॥ १० १२८ ०३
मह्यं॑ यजन्तु॒ मम॒ यानि॑ ह॒व्याकू॑तिः स॒त्या मन॑सो मे अस्तु ।
एनो॒ मा नि गां॑ कत॒मच् च॒नाहं विश्वे॑ देवासो॒ अधि॑ वोचता नः ॥ १० १२८ ०४

देवीः षळ् उर्वीर् उरु नः कृणोत विश्वे देवास इह वीरयध्वम् ।
मा हास्महि प्रजया मा तनूभिर् मा रधाम द्विषते सोम राजन् ॥ १० १२८ ०५
अग्ने मन्युम् प्रतिनुदन् परेषाम् अदब्धो गोपाः परि पाहि नस् त्वम् ।
प्रत्यञ्चो यन्तु निगुतः पुनस् ते ऽमैषां चित्तम् प्रबुधां वि नेशत् ॥ १० १२८ ०६
धाता धातॄणाम् भुवनस्य यस् पतिर् देवं त्रातारम् अभिमातिषाहम् ।
इमं यज्ञम् अश्विनोभा बृहस्पतिर् देवाः पान्तु यजमानं न्यर्थात् ॥ १० १२८ ०७
उरुव्यचा नो महिषः शर्म यंसद् अस्मिन् हवे पुरुहूतः पुरुक्षुः ।
स नः प्रजायै हर्यश्व मृळयेन्द्र मा नो रीरिषो मा परा दाः ॥ १० १२८ ०८
ये नः सपत्ना अप ते भवन्त्व् इन्द्राग्निभ्याम् अव बाधामहे तान् ।
वसवो रुद्रा आदित्या उपरिस्पृशम् मोग्रं चेत्तारम् अधिराजम् अक्रन् ॥ १० १२८ ०९

नासद् आसीन् नो सद् आसीत् तदानीं नासीद् रजो नो व्योमा परो यत् ।
किम् आवरीवः कुह कस्य शर्मन्न् अम्भः किम् आसीद् गहनं गभीरम् ॥ १० १२९ ०१
न मृत्युर् आसीद् अमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः ।
आनीद् अवातं स्वधया तद् एकं तस्माद् धान्यन् न परः किं चनास ॥ १० १२९ ०२
तम आसीत् तमसा गूळ्हम् अग्रे ऽप्रकेतं सलिलं सर्वम् आ इदम् ।
तुच्छ्येनाभ्व् अपिहितं यद् आसीत् तपसस् तन् महिनाजायतैकम् ॥ १० १२९ ०३
कामस् तद् अग्रे सम् अवर्तताधि मनसो रेतः प्रथमं यद् आसीत् ।
सतो बन्धुम् असति निर् अविन्दन् हृदि प्रतीष्या कवयो मनीषा ॥ १० १२९ ०४
तिरश्चीनो विततो रश्मिर् एषाम् अधः स्विद् आसी३द् उपरि स्विद् आसी३त् ।
रेतोधा आसन् महिमान आसन् स्वधा अवस्तात् प्रयतिः परस्तात् ॥ १० १२९ ०५
को अद्धा वेद क इह प्र वोचत् कुत आजाता कुत इयं विसृष्टिः ।
अर्वाग् देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥ १० १२९ ०६
इयं विसृष्टिर् यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन् सो अङ्ग वेद यदि वा न वेद ॥ १० १२९ ०७

यो यज्ञो विश्वतस् तन्तुभिस् तत एकशतं देवकर्मेभिर् आयतः ।
इमे वयन्ति पितरो य आययुः प्र वयाप वयेत्य् आसते तते ॥ १० १३० ०१
पुमाँ एनं तनुत उत् कृणत्ति पुमान् वि तत्ने अधि नाके अस्मिन् ।
इमे मयूखा उप सेदुर् ऊ सदः सामानि चक्रुस् तसराण्य् ओतवे ॥ १० १३० ०२
कासीत् प्रमा प्रतिमा किं निदानम् आज्यं किम् आसीत् परिधिः क आसीत् ।
छन्दः किम् आसीत् प्रऽउगं किम् उक्थं यद् देवा देवम् अयजन्त विश्वे ॥ १० १३० ०३
अग्नेर् गायत्र्य् अभवत् सयुग्वोष्णिहया सविता सम् बभूव ।
अनुष्टुभा सोम उक्थैर् महस्वान् बृहस्पतेर् बृहती वाचम् आवत् ॥ १० १३० ०४
विराण् मित्रावरुणयोर् अभिश्रीर् इन्द्रस्य त्रिष्टुब् इह भागो अह्नः ।
विश्वान् देवाञ् जगत्य् आ विवेश तेन चाक्लृप्र ऋषयो मनुष्याः ॥ १० १३० ०५
चाक्लृप्रे तेन ऋषयो मनुष्या यज्ञे जाते पितरो नः पुराणे ।
पश्यन् मन्ये मनसा चक्षसा तान् य इमं यज्ञम् अयजन्त पूर्वे ॥ १० १३० ०६
सहस्तोमाः सहच्छन्दस आवृतः सहप्रमा ऋषयः सप्त दैव्याः ।
पूर्वेषाम् पन्थाम् अनुदृश्य धीरा अन्वालेभिरे रथ्यो३ न रश्मीन् ॥ १० १३० ०७

अप प्राच इन्द्र विश्वाँ अमित्रान् अपापाचो अभिभूते नुदस्व ।
अपोदीचो अप शूराधराच उरौ यथा तव शर्मन् मदेम ॥ १० १३१ ०१
कुविद् अङ्ग यवमन्तो यवं चिद् यथा दान्त्य् अनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥ १० १३१ ०२
नहि स्थूर्य् ऋतुथा यातम् अस्ति नोत श्रवो विविदे संगमेषु ।
गव्यन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः ॥ १० १३१ ०३
युवं सुरामम् अश्विना नमुचाव् आसुरे सचा ।
विपिपाना शुभस् पती इन्द्रं कर्मस्व् आवतम् ॥ १० १३१ ०४
पुत्रम् इव पितराव् अश्विनोभेन्द्रावथुः काव्यैर् दंसनाभिः ।
यत् सुरामं व्य् अपिबः शचीभिः सरस्वती त्वा मघवन्न् अभिष्णक् ॥ १० १३१ ०५
इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥ १० १३१ ०६

तस्य॑ व॒यं सु॒म॒तौ य॒ज्ञिय॒स्यापि॑ भ॒द्रे सौ॑मन॒से स्या॑म ।
स सु॒त्रामा॒ स्ववाँ॒ इन्द्रो॑ अ॒स्मे आ॒राच् चि॒द् द्वेषः॑ सनु॒तर् यु॑योतु ॥ १० १३१ ०७

ई॒जा॒नम् इद् द्यौर् गू॒र्ताव॑सुर् ईजा॒नम् भूमि॑र् अ॒भि प्र॑भू॒षणि॑ ।
ई॒जा॒नं दे॒वाव् अ॒श्विना॑व् अ॒भि सु॒म्नैर् अ॑वर्धताम् ॥ १० १३२ ०१
ता वा॑म् मित्रावरुणा धा॒रयत्क्षि॑ती सुषु॒म्नेषि॑त॒त्वता॑ यजामसि ।
यु॒वोः क्रा॒णाय॑ स॒ख्यैर् अ॒भि ष्या॑म र॒क्षसः॑ ॥ १० १३२ ०२
अधा॑ चि॒न् नु यद् दिधि॑षामहे वाम् अ॒भि प्रि॒यं रेक्ण॒ः पत्य॑मानाः ।
द॒द्वाँ॒ वा॒ यत् पुष्य॑ति॒ रेक्ण॒ः सम् व् आ॑र॒न् नकि॑र् अस्य म॒घानि॑ ॥ १० १३२ ०३
अ॒साव् अ॒न्यो अ॑सुर सूयत॒ द्यौस् त्वं विश्वे॑षां वरुणासि॒ राजा॑ ।
मू॒र्धा रथ॑स्य चाकन् नैता॒वतैन॑सान्तक॒ध्रुक् ॥ १० १३२ ०४
अ॒स्मिन् स्व् ए॒ ३ तच् छक॑पूत॒ एनो॑ हि॒ते मि॒त्रे निग॑तान् हन्ति वी॒रान् ।
अ॒वोर् वा॒ यद् धात् त॒नूष्व् अवः॑ प्रि॒यासु॑ य॒ज्ञिया॒स्व् अर्वा॑ ॥ १० १३२ ०५
यु॒वोर् हि मा॒तादि॑तिर् विचेतसा॒ द्यौर् न भूमि॒ः पय॑सा पुपू॒तनि॑ ।
अव॑ प्रि॒या दि॑दिष्टन॒ सूरो॑ निनिक्त र॒श्मिभिः॑ ॥ १० १३२ ०६
यु॒वं ह्य॒ अप्न॒राजा॒व् असी॑दतं॒ तिष्ठ॒द् रथं॒ न धू॒र्षदं॑ वन॒र्षद॑म् ।
ता नः॑ कणू॒कयन्ती॑र् नृ॒मेध॑स् त॒त्रे अंह॑सः सु॒मेध॑स् त॒त्रे अंह॑सः ॥ १० १३२ ०७

प्रो ष्व् अस्मै पुरो॒रथम् इन्द्रा॑य शू॒षम् अ॑र्चत ।
अ॒भीके॑ चिद् उलोक॒कृत् स॒ङ्गे स॒मत्सु॑ वृ॒त्रहास्माक॑म् बोधि चोदि॒ता नभ॑न्ताम् अन्य॒केषां॑
ज्या॒का अधि॒ धन्व॑सु ॥ १० १३३ ०१
त्वं सिन्धू॒ँर् अवा॑सृजो ऽध॒राचो॒ अह॒न्न् अहि॑म् ।
अ॒श॒त्रुर् इ॑न्द्र जज्ञिषे विश्व॑म् पुष्यसि॒ वार्य॒ं तं त्वा॒ परि॑ ष्वजामहे॒ नभ॑न्ताम् अन्य॒केषां॑
ज्या॒का अधि॒ धन्व॑सु ॥ १० १३३ ०२
वि षु विश्वा॒ अरा॑तयो ऽ॒र्यो न॑शन्त नो॒ धियः॑ ।
अस्ता॑सि॒ शत्र॑वे व॒धं यो न॑ इन्द्र॒ जिघां॑सति॒ या ते॑ रा॒तिर् द॒दिर् वसु॒ नभ॑न्ताम् अन्य

_केषां ज्याका अधि धन्वसु ॥ १० १३३ ०३
यो न इन्द्राभितो जनो वृकायुर् आदिदेशति ।
अधस्पदं तम् ईं कृधि विबाधो असि सासहिर् नभन्ताम् अन्यकेषां ज्याका अधि धन्वसु
॥ १० १३३ ०४
यो न इन्द्राभिदासति सनाभिर् यश् च निष्ट्यः ।
अव तस्य बलं तिर महीव द्यौर् अध त्मना नभन्ताम् अन्यकेषां ज्याका अधि धन्वसु
॥ १० १३३ ०५
वयम् इन्द्र त्वायवः सखित्वम् आ रभामहे ।
ऋतस्य नः पथा नयाति विश्वानि दुरिता नभन्ताम् अन्यकेषां ज्याका अधि धन्वसु ॥
१० १३३ ०६
अस्मभ्यं सु त्वम् इन्द्र तां शिक्ष या दोहते प्रति वरं जरित्रे ।
अच्छिद्रोध्नी पीपयद् यथा नः सहस्रधारा पयसा मही गौः ॥ १० १३३ ०७

उभे यद् इन्द्र रोदसी आपप्राथोषा इव ।
महान्तं त्वा महीनां सम्राजं चर्षणीनां देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य्
अजीजनत् ॥ ।
अव स्म दुर्हणायतो मर्तस्य तनुहि स्थिरम् ।
अधस्पदं तम् ईं कृधि यो अस्माँ आदिदेशति देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य्
अजीजनत् ॥ १० १३४ ०२
अव त्या बृहतीर् इषो विश्वश्चन्द्रा अमित्रहन् ।
शचीभिः शक्र धूनुहीन्द्र विश्वाभिर् ऊतिभिर् देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य्
अजीजनत् ॥ १० १३४ ०३
अव यत् त्वं शतक्रतव् इन्द्र विश्वानि धूनुषे ।
रयिं न सुन्वते सचा सहस्रिणीभिर् ऊतिभिर् देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य्
अजीजनत् ॥ १० १३४ ०४
अव स्वेदा इवाभितो विष्वक् पतन्तु दिद्यवः ।
दूर्वाया इव तन्तवो व्य् अ १ स्मद् एतु दुर्मतिर् देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य्

अजीजनत् ॥ १० १३४ ०५
दीर्घं ह्य् अङ्कुशं यथा शक्तिम् बिभर्षि मन्तुमः ।
पूर्वेण मघवन् पदाजो वयां यथा यमो देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य्
अजीजनत् ॥ १० १३४ ०६
नकिर् देवा मिनीमसि नकिर् आ योपयामसि मन्त्रश्रुत्यं चरामसि ।
पक्षेभिर् अपिकक्षेभिर् अत्राभि सं रभामहे ॥ १० १३४ ०७

यस्मिन् वृक्षे सुपलाशे देवैः सम्पिबते यमः ।
अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति ॥ १० १३५ ०१
पुराणाँ अनुवेनन्तं चरन्तम् पापयामुया ।
असूयन्न् अभ्य् अचाकशं तस्मा अस्पृहयम् पुनः ॥ १० १३५ ०२
यं कुमार नवं रथम् अचक्रम् मनसाकृणोः ।
एकेषं विश्वतः प्राञ्चम् अपश्यन्न् अधि तिष्ठसि ॥ १० १३५ ०३
यं कुमार प्रावर्तयो रथं विप्रेभ्यस् परि ।
तं सामानु प्रावर्तत सम् इतो नाव्य् आहितम् ॥ १० १३५ ०४
कः कुमारम् अजनयद् रथं को निर् अवर्तयत् ।
कः स्वित् तद् अद्य नो ब्रूयाद् अनुदेयी यथाभवत् ॥ १० १३५ ०५
यथाभवद् अनुदेयी ततो अग्रम् अजायत ।
पुरस्ताद् बुध्न आततः पश्चान् निरयणं कृतम् ॥ १० १३५ ०६
इदं यमस्य सादनं देवमानं यद् उच्यते ।
इयम् अस्य धम्यते नाळीर् अयं गीर्भिः परिष्कृतः ॥ १० १३५ ०७

केश्य् अ १ ग्निं केशी विषं केशी बिभर्ति रोदसी ।
केशी विश्वं स्वर् दृशे केशीदं ज्योतिर् उच्यते ॥ १० १३६ ०१
मुनयो वातरशनाः पिशङ्गा वसते मला ।
वातस्यानु ध्राजिं यन्ति यद् देवासो अविक्षत ॥ १० १३६ ०२

उन्म॑दिता॒ मौने॑येन॒ वाता॒ँ आ त॑स्थिमा व॒यम् ।
शरी॒रेद् अ॒स्माकं॑ यू॒यम् मर्ता॑सो अ॒भि प॑श्यथ ॥ १० १३६ ०३
अ॒न्तरि॑क्षेण पतति॒ विश्वा॑ रू॒पाव॒चाक॑शत् ।
मुनि॑र् दे॒वस्य॑-देवस्य॒ सौकृ॑त्याय॒ सखा॑ हि॒तः ॥ १० १३६ ०४
वात॒स्याश्वो॑ वा॒योः सखाथो॑ दे॒वेषि॑तो॒ मुनिः॑ ।
उ॒भौ स॑मु॒द्राव् आ क्षे॑ति॒ यश् च॒ पूर्व॑ उ॒ताप॑रः ॥ १० १३६ ०५
अ॒प्स॒रसां॑ गन्धर्वाणा॑म् मृ॒गाणां॒ चर॑णे॒ चर॑न् ।
के॒शी केत॑स्य वि॒द्वान् सखा॑ स्वा॒दुर् म॒दिन्त॑मः ॥ १० १३६ ०६
वा॒युर् अ॑स्मा॒ उपा॑मन्थत् पि॒नष्टि॑ स्मा कुन॒न्नमा ।
के॒शी वि॒षस्य॒ पात्रे॑ण॒ यद् रु॒द्रेणापि॑बत् स॒ह ॥ १० १३६ ०७

उ॒त दे॑वा॒ अव॑हितं॒ देवा॒ उन् न॑यथा॒ पुनः॑ ।
उ॒ताग॑श् च॒क्रुषं॑ देवा॒ देवा॑ जी॒वय॑था॒ पुनः॑ ॥ १० १३७ ०१
द्वाव् इ॒मौ वातौ॑ वात॒ आ सिन्धो॒र् आ प॑रा॒वतः॑ ।
दक्षं॑ ते अ॒न्य आ वा॑तु॒ परा॒न्यो वा॑तु॒ यद् रपः॑ ॥ १० १३७ ०२
आ वा॑त वाहि भेष॒जं वि वा॑त वाहि॒ यद् रपः॑ ।
त्वं हि वि॒श्वभे॑षजो दे॒वानां॑ दू॒त ईय॑से ॥ १० १३७ ०३
आ त्वा॑गमं॒ शंता॑तिभि॒र् अथो॑ अरि॒ष्टता॑तिभिः ।
दक्षं॑ ते भ॒द्रम् आभा॑र्षम् परा॒ यक्ष्मं॑ सुवामि ते ॥ १० १३७ ०४
त्राय॑न्ताम् इ॒ह दे॒वास् त्राय॑ताम् म॒रुतां॑ ग॒णः ।
त्राय॑न्तां॒ विश्वा॑ भू॒तानि॒ यथा॒यम् अ॑र॒पा अस॑त् ॥ १० १३७ ०५
आप॒ इद् वा उ॑ भेष॒जीर् आपो॑ अमीव॒चात॑नीः ।
आपः॒ सर्व॑स्य भेष॒जीस् तास् ते॑ कृण्वन्तु भेष॒जम् ॥ १० १३७ ०६
हस्ता॑भ्यां॒ दश॑शाखाभ्यां जि॒ह्वा वा॒चः पु॑रोग॒वी ।
अ॒ना॒म॒यि॒त्नुभ्यां॑ त्वा॒ ताभ्यां॒ त्वोप॑ स्पृशामसि ॥ १० १३७ ०७

तव॒ त्य इ॑न्द्र स॒ख्येषु॒ वह्न॑य ऋ॒तम् म॑न्वा॒ना व्य् अदर्दिरुर् व॒लम् ।

यत्रा॑ दश॒स्यन्न् उ॒षसो॑ रि॒णन्न् अ॒पः कुत्सा॑य॒ मन्म॑न्न् अ॒ह्यश् च दं॒सयः॑ ॥ १० १३८ ०१
अवा॑सृजः प्र॒स्वः श्व॒ञ्चयो॑ गि॒रीन् उद् आ॑ज उ॒स्रा अपि॑बो॒ मधु॑ प्रि॒यम् ।
अव॑र्धयो व॒निनो॑ अस्य॒ दंस॑सा शुशोच॒ सूर्य॑ ऋ॒तजा॑तया गि॒रा ॥ १० १३८ ०२
वि सूर्यो॒ मध्ये॑ अमुच॒द् रथं॑ दि॒वो वि॒दद् दा॒साय॑ प्रति॒मान॒म् आर्यः॑ ।
दृ॒ळ्हानि॒ पिप्रो॒र् असु॑रस्य मा॒यिन॒ इन्द्रो॒ व्य् आस्यच् चकृ॒वाँ ऋ॒जिश्व॑ना ॥ १० १३८ ०३
अना॑धृष्टानि धृषि॒तो व्य् आस्यन् नि॒धीँर् अदे॑वाँ अमृणद् अ॒यास्यः॑ ।
मा॒सेव॒ सूर्यो॒ वसु॒ पुर्य॒म् आ द॑दे गृणा॒नः शत्रूँ॑र् अशृणाद् वि॒रुक्म॑ता ॥ १० १३८ ०४
अयु॑द्धसेनो वि॒भ्वा विभि॒न्दता दाश॑द् वृत्र॒हा तुज्या॑नि तेजते ।
इन्द्र॑स्य॒ वज्रा॑द् अबिभेद् अभि॒श्नथः॒ प्राक्रा॑मच् छु॒न्ध्यूर् अज॑हाद् उ॒षा अनः॑ ॥ १० १३८ ०५
ए॒ता त्या ते॒ श्रुत्या॑नि॒ केव॑ला॒ यद् एक॒ एक॒म् अकृ॑णोर् अय॒ज्ञम् ।
मा॒सां वि॒धान॑म् अदधा॒ अधि॒ द्यवि॒ त्वया॒ विभि॑न्नम् भरति प्र॒धिम् पि॒ता ॥ १० १३८ ०६

सूर्य॑रश्मि॒र् हरि॑केशः पु॒रस्ता॑त् सवि॒ता ज्योति॒र् उद् अ॑याँ॒ अज॑स्रम् ।
तस्य॑ पू॒षा प्र॑स॒वे या॑ति वि॒द्वान् स॒म्पश्य॒न् विश्वा॒ भुव॑नानि गो॒पाः ॥ १० १३९ ०१
नृ॒चक्षा॑ ए॒ष दि॒वो मध्य॑ आस्त आप॒प्रिवा॒न् रोद॑सी अ॒न्तरि॑क्षम् ।
स वि॒श्वाची॑र् अ॒भि च॑ष्टे घृ॒ताची॑र् अन्त॒रा पूर्व॒म् अप॑रं च के॒तुम् ॥ १० १३९ ०२
रा॒यो बु॒ध्नः सं॒गम॑नो॒ वसू॑नां॒ विश्वा॑ रू॒पाभि च॑ष्टे॒ शची॑भिः ।
दे॒व इ॑व सवि॒ता स॒त्यध॑र्मेन्द्रो॒ न त॑स्थौ सम॒रे धना॑नाम् ॥ १० १३९ ०३
वि॒श्वाव॑सुं सोम गन्ध॒र्वम् आपो॑ ददृ॒शुषी॒स् तद् ऋ॒तेना॒ व्य् आयन् ।
तद् अ॒न्ववै॒द् इन्द्रो॑ रार॒हा॒ण आ॑सा॒म् परि॒ सूर्य॑स्य परि॒धीँर् अ॑पश्यत् ॥ १० १३९ ०४
वि॒श्वाव॑सुर् अ॒भि तन् नो॑ गृणातु दि॒व्यो ग॑न्ध॒र्वो रज॑सो वि॒मानः॑ ।
यद् वा॑ घा स॒त्यम् उ॒त यन् न वि॒द्म धियो॑ हिन्वा॒नो धिय॒ इन् नो॑ अव्याः ॥ १० १३९ ०५
सस्नि॑म् अविन्द॒च् चर॑णे न॒दीना॒म् अपा॑वृणो॒द् दुरो॒ अश्म॑व्रजानाम् ।
प्रासां॑ गन्ध॒र्वो अ॒मृता॑नि वोच॒द् इन्द्रो॒ दक्ष॒म् परि॑ जानाद् अ॒हीना॑म् ॥ १० १३९ ०६

अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो ।
बृहद्भानो शवसा वाजम् उक्थ्य १ं दधासि दाशुषे कवे ॥ १० १४० ०१
पावकवर्चाः शुक्रवर्चा अनूनवर्चा उद् इयर्षि भानुना ।
पुत्रो मातरा विचरन्न् उपावसि पृणक्षि रोदसी उभे ॥ १० १४० ०२
ऊर्जो नपाज् जातवेदः सुशस्तिभिर् मन्दस्व धीतिभिर् हितः ।
त्वे इषः सं दधुर् भूरिवर्पसश् चित्रोतयो वामजाताः ॥ १० १४० ०३
इरज्यन्न् अग्ने प्रथयस्व जन्तुभिर् अस्मे रायो अमर्त्य ।
स दर्शतस्य वपुषो वि राजसि पृणक्षि सानसिं क्रतुम् ॥ १० १४० ०४
इष्कर्तारम् अध्वरस्य प्रचेतसं क्षयन्तं राधसो महः ।
रातिं वामस्य सुभगाम् महीम् इषं दधासि सानसिं रयिम् ॥ १० १४० ०५
ऋतावानम् महिषं विश्वदर्शतम् अग्निं सुम्नाय दधिरे पुरो जनाः ।
श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यम् मानुषा युगा ॥ १० १४० ०६

अग्ने अच्छा वदेह नः प्रत्यङ् नः सुमना भव ।
प्र नो यच्छ विशस् पते धनदा असि नस् त्वम् ॥ १० १४१ ०१
प्र नो यच्छत्व् अर्यमा प्र भगः प्र बृहस्पतिः ।
प्र देवाः प्रोत सूनृता रायो देवी ददातु नः ॥ १० १४१ ०२
सोमं राजानम् अवसे ऽग्निं गीर्भिर् हवामहे ।
आदित्यान् विष्णुं सूर्यम् ब्रह्माणं च बृहस्पतिम् ॥ १० १४१ ०३
इन्द्रवायू बृहस्पतिं सुहवेह हवामहे ।
यथा नः सर्व इज् जनः संगत्यां सुमना असत् ॥ १० १४१ ०४
अर्यमणम् बृहस्पतिम् इन्द्रं दानाय चोदय ।
वातं विष्णुं सरस्वतीं सवितारं च वाजिनम् ॥ १० १४१ ०५
त्वं नो अग्ने अग्निभिर् ब्रह्म यज्ञं च वर्धय ।
त्वं नो देवतातये रायो दानाय चोदय ॥ १० १४१ ०६

अयम् अग्ने जरिता त्वे अभूद् अपि सहसः सूनो नह्य अ १ न्यद् अस्त्य् आप्यम् ।
भद्रं हि शर्म त्रिवरूथम् अस्ति त आरे हिंसानाम् अप दिद्युम् आ कृधि ॥ १० १४२ ०१
प्रवत् ते अग्ने जनिमा पितूयतः साचीव विश्वा भुवना न्य् ऋञ्जसे ।
प्र सप्तयः प्र सनिषन्त नो धियः पुरश् चरन्ति पशुपा इव त्मना ॥ १० १४२ ०२
उत वा उ परि वृणक्षि बप्सद् बहोर् अग्न उलपस्य स्वधावः ।
उत खिल्या उर्वराणाम् भवन्ति मा ते हेतिं तविषीं चुक्रुधाम ॥ १० १४२ ०३
यद् उद्वतो निवतो यासि बप्सत् पृथग् एषि प्रगर्धिनीव सेना ।
यदा ते वातो अनुवाति शोचिर् वप्तेव श्मश्रु वपसि प्र भूम ॥ १० १४२ ०४
प्रत्य् अस्य श्रेणयो ददृश्र एकं नियानम् बहवो रथासः ।
बाहू यद् अग्ने अनुमर्मृजानो न्यङ्ङ् उत्तानाम् अन्वेषि भूमिम् ॥ १० १४२ ०५
उत् ते शुष्मा जिहताम् उत् ते अर्चिर् उत् ते अग्ने शशमानस्य वाजाः ।
उच् छ्वञ्चस्व नि नम वर्धमान आ त्वाद्य विश्वे वसवः सदन्तु ॥ १० १४२ ०६
अपाम् इदं न्ययनं समुद्रस्य निवेशनम् ।
अन्यं कृणुष्वेतः पन्थां तेन याहि वशाँ अनु ॥ १० १४२ ०७
आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः ।
ह्रदाश् च पुण्डरीकाणि समुद्रस्य गृहा इमे ॥ १० १४२ ०८

त्यं चिद् अत्रिम् ऋतजुरम् अर्थम् अश्वं न यातवे ।
कक्षीवन्तं यदी पुना रथं न कृणुथो नवम् ॥ १० १४३ ०१
त्यं चिद् अश्वं न वाजिनम् अरेणवो यम् अत्नत ।
दृळ्हं ग्रन्थिं न वि ष्यतम् अत्रिं यविष्ठम् आ रजः ॥ १० १४३ ०२
नरा दंसिष्ठव् अत्रये शुभ्रा सिषासतं धियः ।
अथा हि वां दिवो नरा पुन स्तोमो न विशसे ॥ १० १४३ ०३
चिते तद् वां सुराधसा रातिः सुमतिर् अश्विना ।
आ यन् नः सदने पृथौ समने पर्षथो नरा ॥ १० १४३ ०४
युवम् भुज्युं समुद्र आ रजसः पार ईङ्खितम् ।

या॒तम् अच्छा॑ पत॒त्रिभि॒र् नास॑त्या सा॒तये॑ कृतम् ॥ १० १४३ ०५
आ वां॑ सु॒म्नैः शं॒यू इ॑व मंहि॑ष्ठा विश्व॑वेदसा ।
सम् अ॒स्मे भू॑षतं न॒रोत्सं॒ न पि॒प्युषी॒र् इषः॑ ॥ १० १४३ ०६

अ॒यं हि ते॒ अम॑र्त्य॒ इन्दु॒र् अत्यो॒ न पत्य॑ते ।
दक्षो॑ वि॒श्वायु॑र् वे॒धसे॑ ॥ १० १४४ ०१
अ॒यम् अ॒स्मासु॒ काव्य॑ ऋ॒भुर् वज्रो॒ दास्व॑ते ।
अ॒यम् बि॑भर्त्य् ऊ॒र्ध्वकृ॑शन॒म् मद॑म् ऋ॒भुर् न कृत्व्य॒म् मद॑म् ॥ १० १४४ ०२
घृषुः॑ श्ये॒नाय॒ कृत्व॑न आ॒सु स्वासु॒ वंस॑गः ।
अव॑ दीधेद् अही॒शुवः॑ ॥ १० १४४ ०३
यं सु॑प॒र्णः प॑रा॒वतः॑ श्ये॒नस्य॑ पु॒त्र आभ॑रत् ।
श॒तच॑क्रं॒ यो॒ ऽह्यो॑ वर्त॒निः ॥ १० १४४ ०४
यं ते॑ श्ये॒नश् चारु॑म् अवृ॒कम् प॒दाभ॑रद् अरु॒णम् मा॒नम् अन्ध॑सः ।
ए॒ना वयो॒ वि ता॒र्य् आयु॑र् जी॒वस॑ ए॒ना जा॑गार ब॒न्धुता॑ ॥ १० १४४ ०५
ए॒वा तद् इन्द्र॒ इन्दु॑ना दे॒वेषु॑ चिद् धारयाते॒ महि॒ त्यजः॑ ।
क्रत्वा॒ वयो॒ वि ता॒र्य् आयुः॑ सुक्रतो॒ क्रत्वा॒यम् अ॒स्मद् आ सु॒तः ॥ १० १४४ ०६

इ॒मां ख॑ना॒म्य् ओष॑धिं वी॒रुध॒म् बल॑वत्तमाम् ।
यया॑ स॒पत्नी॒म् बाध॑ते॒ यया॑ संवि॒न्दते॒ पति॑म् ॥ १० १४५ ०१
उत्ता॑नपर्णे॒ सुभ॑गे॒ देव॑जूते॒ सह॑स्वति ।
स॒पत्नी॑म् मे॒ परा॑ धम॒ पति॑म् मे॒ केव॑लं कुरु ॥ १० १४५ ०२
उत्त॑रा॒हम् उ॑त्तर॒ उत्त॒रेद् उत्त॑राभ्यः ।
अथा॑ स॒पत्नी॒ या ममाध॑रा॒ साध॑राभ्यः ॥ १० १४५ ०३
न॒ह्य् अ॑स्या॒ नाम॑ गृ॒भ्णामि॒ नो अ॒स्मिन् र॑मते॒ जने॑ ।
परा॑म् ए॒व प॑रा॒वतं॑ स॒पत्नीं॑ गमयामसि ॥ १० १४५ ०४
अ॒हम् अ॑स्मि॒ सह॑माना॒थ त्वम् अ॑सि सास॒हिः ।

उभे सहस्वती भूत्वी सपत्नीम् मे सहावहै ॥ १० १४५ ०५
उप ते ऽधां सहमानाम् अभि त्वाधां सहीयसा ।
माम् अनु प्र ते मनो वत्सं गौर् इव धावतु पथा वार् इव धावतु ॥ १० १४५ ०६

अरण्यान्य् अरण्यान्य् असौ या प्रेव नश्यसि ।
कथा ग्रामं न पृच्छसि न त्वा भीर् इव विन्दती३ँ ॥ १० १४६ ०१
वृषारवाय वदते यद् उपावति चिच्चिकः ।
आघाटिभिर् इव धावयन्न् अरण्यानिर् महीयते ॥ १० १४६ ०२
उत गाव इवादन्त्य् उत वेश्मेव दृश्यते ।
उतो अरण्यानिः सायं शकटीर् इव सर्जति ॥ १० १४६ ०३
गाम् अङ्गैष आ ह्वयति दार्व् अङ्गैषो अपावधीत् ।
वसन्न् अरण्यान्यां सायम् अक्रुक्षद् इति मन्यते ॥ १० १४६ ०४
न वा अरण्यानिर् हन्त्य् अन्यश् चेन् नाभिगच्छति ।
स्वादोः फलस्य जग्ध्वाय यथाकामं नि पद्यते ॥ १० १४६ ०५
आञ्जनगन्धिं सुरभिम् बह्वन्नाम् अकृषीवलाम् ।
प्राहम् मृगाणाम् मातरम् अरण्यानिम् अशंसिषम् ॥ १० १४६ ०६

श्रत् ते दधामि प्रथमाय मन्यवे ऽहन् यद् वृत्रं नर्यं विवेर् अपः ।
उभे यत् त्वा भवतो रोदसी अनु रेजते शुष्मात् पृथिवी चिद् अद्रिवः ॥ १० १४७ ०१
त्वम् मायाभिर् अनवद्य मायिनं श्रवस्यता मनसा वृत्रम् अर्दयः ।
त्वाम् इन् नरो वृणते गविष्टिषु त्वां विश्वासु हव्यास्व् इष्टिषु ॥ १० १४७ ०२
ऐषु चाकन्धि पुरुहूत सूरिषु वृधासो ये मघवन्न् आनशुर् मघम् ।
अर्चन्ति तोके तनये परिष्टिषु मेधसाता वाजिनम् अह्रये धने ॥ १० १४७ ०३
स इन् नु रायः सुभृतस्य चाकनन् मदं यो अस्य रंह्यं चिकेतति ।
त्वावृधो मघवन् दाश्वध्वरो मक्षू स वाजम् भरते धना नृभिः ॥ १० १४७ ०४
त्वं शर्धाय महिना गृणान उरु कृधि मघवञ् छग्धि रायः ।
त्वं नो मित्रो वरुणो न मायी पित्वो न दस्म दयसे विभक्ता ॥ १० १४७ ०५

सुष्वाणास इन्द्र स्तुमसि त्वा ससवांसश् च तुविनृम्ण वाजम् ।
आ नो भर सुवितं यस्य चाकन् त्मना तना सनुयाम त्वोताः ॥ १० १४८ ०१
ऋष्वस् त्वम् इन्द्र शूर जातो दासीर् विशः सूर्येण सह्याः ।
गुहा हितं गुह्यं गूळ्हम् अप्सु बिभृमसि प्रस्रवणे न सोमम् ॥ १० १४८ ०२
अर्यो वा गिरो अभ्य् अर्च विद्वान् ऋषीणां विप्रः सुमतिं चकानः ।
ते स्याम ये रणयन्त सोमैर् एनोत तुभ्यं रथोळ्ह भक्षैः ॥ १० १४८ ०३
इमा ब्रह्मेन्द्र तुभ्यं शंसि दा नृभ्यो नृणां शूर शवः ।
तेभिर् भव सक्रतुर् येषु चाकन्न् उत त्रायस्व गृणत उत स्तीन् ॥ १० १४८ ०४
श्रुधी हवम् इन्द्र शूर पृथ्या उत स्तवसे वेन्यस्यार्कैः ।
आ यस् ते योनिं घृतवन्तम् अस्वार् ऊर्मिर् न निम्नैर् द्रवयन्त वक्वाः ॥ १० १४८ ०५

सविता यन्त्रैः पृथिवीम् अरम्णाद् अस्कम्भने सविता द्याम् अदृंहत् ।
अश्वम् इवाधुक्षद् धुनिम् अन्तरिक्षम् अतूर्ते बद्धं सविता समुद्रम् ॥ १० १४९ ०१
यत्रा समुद्र स्कभितो व्य् औनद् अपां नपात् सविता तस्य वेद ।
अतो भूर् अत आ उत्थितं रजो ऽतो द्यावापृथिवी अप्रथेताम् ॥ १० १४९ ०२
पश्चेदम् अन्यद् अभवद् यजत्रम् अमर्त्यस्य भुवनस्य भूना ।
सुपर्णो अङ्ग सवितुर् गरुत्मान् पूर्वो जातः स उ अस्यानु धर्म ॥ १० १४९ ०३
गाव इव ग्रामं यूयुधिर् इवाश्वान् वाश्रेव वत्सं सुमना दुहाना ।
पतिर् इव जायाम् अभि नो न्य् एतु धर्ता दिवः सविता विश्ववारः ॥ १० १४९ ०४
हिरण्यस्तूपः सवितर् यथा त्वाङ्गिरसो जुह्वे वाजे अस्मिन् ।
एवा त्वार्चन्न् अवसे वन्दमानः सोमस्येवांशुम् प्रति जागराहम् ॥ १० १४९ ०५

समिद्धश् चित् सम् इध्यसे देवेभ्यो हव्यवाहन ।
आदित्यै रुद्रैर् वसुभिर् न आ गहि मृळीकाय न आ गहि ॥ १० १५० ०१

इमं यज्ञम् इदं वचो जुजुषाण उपागहि ।
मर्तासस् त्वा समिधान हवामहे मृळीकाय हवामहे ॥ १० १५० ०२
त्वाम् उ जातवेदसं विश्ववारं गृणे धिया ।
अग्ने देवाँ आ वह नः प्रियव्रतान् मृळीकाय प्रियव्रतान् ॥ १० १५० ०३
अग्निर् देवो देवानाम् अभवत् पुरोहितो ऽग्निम् मनुष्या३ ऋषयः सम् ईधिरे ।
अग्निम् महो धनसाताव् अहं हुवे मृळीकं धनसातये ॥ १० १५० ०४
अग्निर् अत्रिम् भरद्वाजं गविष्ठिरम् प्रावन् नः कण्वं त्रसदस्युम् आहवे ।
अग्निं वसिष्ठो हवते पुरोहितो मृळीकाय पुरोहितः ॥ १० १५० ०५

श्रद्धयाग्निः सम् इध्यते श्रद्धया हूयते हविः ।
श्रद्धाम् भगस्य मूर्धनि वचसा वेदयामसि ॥ १० १५१ ०१
प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः ।
प्रियम् भोजेषु यज्वस्व् इदम् म उदितं कृधि ॥ १० १५१ ०२
यथा देवा असुरेषु श्रद्धाम् उग्रेषु चक्रिरे ।
एवम् भोजेषु यज्वस्व् अस्माकम् उदितं कृधि ॥ १० १५१ ०३
श्रद्धां देवा यजमाना वायुगोपा उपासते ।
श्रद्धां हृदय्य१याकूत्या श्रद्धया विन्दते वसु ॥ १० १५१ ०४
श्रद्धाम् प्रातर् हवामहे श्रद्धाम् मध्यंदिनम् परि ।
श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद् धापयेह नः ॥ १० १५१ ०५

शास इत्था महाँ अस्य् अमित्रखादो अद्भुतः ।
न यस्य हन्यते सखा न जीयते कदा चन ॥ १० १५२ ०१
स्वस्तिदा विशस् पतिर् वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतु नः सोमपा अभयंकरः ॥ १० १५२ ०२
वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज ।
वि मन्युम् इन्द्र वृत्रहन्न् अमित्रस्याभिदासतः ॥ १० १५२ ०३

वि न॑ इन्द्र॒ मृधो॑ जहि नी॒चा य॑च्छ पृतन्य॒तः ।
यो अ॒स्माँ अ॑भि॒दास॒त्य् अध॑रं गमया॒ तमः॑ ॥ १० १५२ ०४
अपे॑न्द्र द्वि॒षतो मनो ऽप॒ जिज्या॑सतो व॒धम् ।
वि म॒न्योः शर्म॑ यच्छ॒ वरी॑यो यवया व॒धम् ॥ १० १५२ ०५

ई॒ङ्खय॑न्तीर् अप॒स्युव॒ इन्द्रं॑ जा॒तम् उपा॑सते ।
भे॒जा॒नासः॑ सु॒वीर्य॑म् ॥ १० १५३ ०१
त्वम् इ॑न्द्र॒ बला॒द् अधि॒ सह॑सो जा॒त ओज॑सः ।
त्वं वृ॑ष॒न् वृषेद् अ॑सि ॥ १० १५३ ०२
त्वम् इ॑न्द्रासि वृत्र॒हा व्य् अ॒ १॑ न्तरि॑क्षम् अतिरः ।
उद् द्याम् अ॑स्तभ्ना॒ ओज॑सा ॥ १० १५३ ०३
त्वम् इ॑न्द्र स॒जोष॑सम् अ॒र्कम् बि॑भर्षि बा॒ह्वोः ।
वज्रं॒ शिशा॑न॒ ओज॑सा ॥ १० १५३ ०४
त्वम् इ॑न्द्राभि॒भूर् अ॑सि॒ विश्वा॑ जा॒तान्य् ओज॑सा ।
स विश्वा॒ भुव॒ आभ॑वः ॥ १० १५३ ०५

सोम॒ एके॑भ्यः पवते घृ॒तम् एक॒ उपा॑सते ।
येभ्यो॒ मधु॑ प्र॒धाव॑ति॒ तांश् चि॑द् ए॒वापि॑ गच्छतात् ॥ १० १५४ ०१
तप॑सा॒ ये अ॑नाधृ॒ष्यास् तप॑सा॒ ये स्व॑र् य॒युः ।
तपो॒ ये च॑क्रि॒रे मह॒स् तांश् चि॑द् ए॒वापि॑ गच्छतात् ॥ १० १५४ ०२
ये युध्य॑न्ते प्र॒धने॑षु॒ शूरा॑सो॒ ये त॑नू॒त्यजः॑ ।
ये वा॑ स॒हस्र॑दक्षिणा॒स् तांश् चि॑द् ए॒वापि॑ गच्छतात् ॥ १० १५४ ०३
ये चि॑त् पूर्व॑ ऋत॒साप॑ ऋ॒तावा॑न ऋता॒वृधः॑ ।
पि॒तॄन् तप॑स्वतो यम॒ तांश् चि॑द् ए॒वापि॑ गच्छतात् ॥ १० १५४ ०४
स॒ह॒स्र॑णीथाः क॒वयो॒ ये गो॑पा॒यन्ति॒ सूर्य॑म् ।
ऋषी॒न् तप॑स्वतो यम तपो॒जाँ अपि॑ गच्छतात् ॥ १० १५४ ०५

अरायि काणे विकटे गिरिं गच्छ सदान्वे ।
शिरिम्बिठस्य सत्वभिस् तेभिष् ट्वा चातयामसि ॥ १० १५५ ०१
चत्तो इतश् चत्तामुतः सर्वा भ्रूणान्य् आरुषी ।
अराय्यम् ब्रह्मणस् पते तीक्ष्णशृण्गोदृषन्न् इहि ॥ १० १५५ ०२
अदो यद् दारु प्लवते सिन्धोः पारे अपूरुषम् ।
तद् आ रभस्व दुर्हणो तेन गच्छ परस्तरम् ॥ १० १५५ ०३
यद् ध प्राचीर् अजगन्तोरो मण्डूरधाणिकीः ।
हता इन्द्रस्य शत्रवः सर्वे बुद्बुदयाशवः ॥ १० १५५ ०४
परीमे गाम् अनेषत पर्य् अग्निम् अहृषत ।
देवेष्व् अक्रत श्रवः क इमाँ आ दधर्षति ॥ १० १५५ ०५

अग्निं हिन्वन्तु नो धियः सप्तिम् आशुम् इवाजिषु ।
तेन जेष्म धनं-धनम् ॥ १० १५६ ०१
यया गा आकरामहे सेनयाग्ने तवोत्या ।
तां नो हिन्व मघत्तये ॥ १० १५६ ०२
आग्ने स्थूरं रयिम् भर पृथुं गोमन्तम् अश्विनम् ।
अङ्धि खं वर्तया पणिम् ॥ १० १५६ ०३
अग्ने नक्षत्रम् अजरम् आ सूर्यं रोहयो दिवि ।
दधज् ज्योतिर् जनेभ्यः ॥ १० १५६ ०४
अग्ने केतुर् विशाम् असि प्रेष्ठः श्रेष्ठ उपस्थसत् ।
बोधा स्तोत्रे वयो दधत् ॥ १० १५६ ०५

इमा नु कम् भुवना सीषधामेन्द्रश् च विश्वे च देवाः ॥ १० १५७ ०१
यज्ञं च नस् तन्वं च प्रजां चादित्यैर् इन्द्रः सह चीक्लृपाति ॥ १० १५७ ०२

आदित्यैर् इन्द्रः सगणो मरुद्भिर् अस्माकम् भूत्व् अविता तनूनाम् ॥ १० १५७ ०३
हत्वाय देवा असुरान् यद् आयन् देवा देवत्वम् अभिरक्षमाणाः ॥ १० १५७ ०४
प्रत्यञ्चम् अर्कम् अनयञ् छचीभिर् आद् इत् स्वधाम् इषिराम् पर्य् अपश्यन् ॥ १० १५७ ०५

सूर्यो नो दिवस् पातु वातो अन्तरिक्षात् ।
अग्निर् नः पार्थिवेभ्यः ॥ १० १५८ ०१
जोषा सवितर् यस्य ते हरः शतं सवाꣳ अर्हति ।
पाहि नो दिद्युतः पतन्त्याः ॥ १० १५८ ०२
चक्षुर् नो देवः सविता चक्षुर् न उत पर्वतः ।
चक्षुर् धाता दधातु नः ॥ १० १५८ ०३
चक्षुर् नो धेहि चक्षुषे चक्षुर् विख्यै तनूभ्यः ।
सं चेदं वि च पश्येम ॥ १० १५८ ०४
सुसंदृशं त्वा वयम् प्रति पश्येम सूर्य ।
वि पश्येम नृचक्षसः ॥ १० १५८ ०५

उद् असौ सूर्यो अगाद् उद् अयम् मामको भगः ।
अहं तद् विद्वला पतिम् अभ्य् असाक्षि विषासहिः ॥ १० १५९ ०१
अहं केतुर् अहम् मूर्धाहम् उग्रा विवाचनी ।
ममेद् अनु क्रतुम् पतिः सेहानाया उपाचरेत् ॥ १० १५९ ०२
मम पुत्राः शत्रुहणो ऽथो मे दुहिता विराट् ।
उताहम् अस्मि संजया पत्यौ मे श्लोक उत्तमः ॥ १० १५९ ०३
येनेन्द्रो हविषा कृत्व्य् अभवद् द्युम्न्य् उत्तमः ।
इदं तद् अक्रि देवा असपत्ना किलाभुवम् ॥ १० १५९ ०४
असपत्ना सपत्नघ्नी जयन्त्य् अभिभूवरी ।
आवृक्षम् अन्यासां वर्चो राधो अस्थेयसाम् इव ॥ १० १५९ ०५

सम् अ॑जैषम् इ॒मा अ॒हं स॒पत्नी॑र् अभि॒भूव॑री ।
यथा॒हम् अ॒स्य वी॒रस्य॑ वि॒राजा॑नि॒ जन॑स्य च ॥ १० १५९ ०६

ती॒व्रस्या॒भिव॑यसो अ॒स्य पा॑हि सर्वर॒था वि हरी॑ इ॒ह मु॑ञ्च ।
इन्द्र॒ मा त्वा॒ यज॑मानासो अ॒न्ये नि री॑रम॒न् तुभ्य॑म् इ॒मे सु॒तासः॑ ॥ १० १६० ०१
तुभ्यं॑ सु॒तास् तुभ्य॑म् उ॒ सोत्वा॑स॒स् त्वां गिरः॒ श्वात्र्या॒ आ ह्व॑यन्ति ।
इन्द्रे॒दम् अ॒द्य सव॑नं जुषा॒णो विश्व॑स्य वि॒द्वाँ इ॒ह पा॑हि॒ सोम॑म् ॥ १० १६० ०२
य उ॑श॒ता मन॑सा॒ सोम॑म् अस्मै सर्व॑हृ॒दा दे॒वका॑मः सु॒नोति॑ ।
न गा इन्द्र॒स् तस्य॒ परा॑ ददाति प्रश॒स्तम् इच् चारु॑म् अस्मै कृणोति ॥ १० १६० ०३
अनु॑स्पष्टो भवत्य् ए॒षो अ॑स्य॒ यो अ॑स्मै रे॒वान् न सु॒नोति॒ सोम॑म् ।
निर् अ॑र॒त्नौ म॒घवा॒ तं द॑धाति ब्रह्मद्विषो॑ ह॒न्त्य् अना॑नुदिष्टः ॥ १० १६० ०४
अ॒श्वा॒यन्तो॑ ग॒व्यन्तो॑ वा॒जय॑न्तो॒ हवा॑महे॒ त्वोप॑गन्त॒वा उ॑ ।
आ॒भूष॑न्तस् ते सु॒मतौ नवा॑यां व॒यम् इ॑न्द्र त्वा शु॒नं हु॑वेम ॥ १० १६० ०५

मु॒ञ्चामि॑ त्वा ह॒विषा॒ जीव॑नाय॒ कम् अ॑ज्ञातय॒क्ष्माद् उ॒त रा॑जय॒क्ष्मात् ।
ग्राहि॑र् ज॒ग्राह॒ यदि॑ वै॒तद् ए॑नं॒ तस्या॑ इन्द्राग्नी॒ प्र मु॑मुक्तम् एनम् ॥ १० १६१ ०१
यदि॑ क्षि॒तायु॒र् यदि॑ वा॒ परे॑तो॒ यदि॑ मृ॒त्योर् अ॑न्ति॒कं नीत ए॒व ।
तम् आ ह॑रामि॒ निरृ॑तेर् उ॒पस्था॒द् अस्पा॑र्षम् एनं श॒तशा॑रदाय ॥ १० १६१ ०२
स॒ह॒स्रा॒क्षेण॑ श॒तशा॑रदेन श॒तायु॑षा ह॒विषाहा॑र्षम् एनम् ।
श॒तं यथे॒मं श॒रदो॒ नया॒तीन्द्रो॒ विश्व॑स्य दुरि॒तस्य॑ पा॒रम् ॥ १० १६१ ०३
श॒तं जीव॑ श॒रदो॒ वर्ध॑मानः श॒तं हे॑म॒न्ताञ् छ॒तम् उ॑ वस॒न्तान् ।
श॒तम् इ॑न्द्रा॒ग्नी स॑वि॒ता बृह॒स्पतिः॑ श॒तायु॑षा ह॒विषे॒मम् पुन॑र् दुः ॥ १० १६१ ०४
आहा॑र्षं त्वावि॑दं त्वा॒ पुन॒र् आगाः॑ पुनर्नव ।
सर्वा॑ङ्ग॒ सर्वं॑ ते॒ चक्षुः॒ सर्व॒म् आयु॑श् च ते ऽविदम् ॥ १० १६१ ०५

ब्रह्म॑णा॒ग्निः सं॑विदा॒नो र॑क्षो॒हा बा॑धताम् इ॒तः ।
अमी॑वा॒ यस् ते॒ गर्भं॑ दु॒र्णामा॒ योनि॑म् आ॒शये॑ ॥ १० १६२ ०१
यस् ते॒ गर्भ॒म् अमी॑वा दु॒र्णामा॒ योनि॑म् आ॒शये॑ ।
अ॒ग्निष् टम् ब्रह्म॑णा स॒ह निष् क्र॒व्याद॑म् अनीनशत् ॥ १० १६२ ०२
यस् ते॒ हन्ति॑ प॒तय॑न्तं निष॒त्स्नुं यः स॑रीसृ॒पम् ।
जा॒तं यस् ते॒ जिघां॑सति॒ तम् इ॒तो ना॑शयामसि ॥ १० १६२ ०३
यस् त॑ ऊ॒रू वि॒हर॑त्य् अन्त॒रा दम्प॑ती॒ शये॑ ।
योनिं॒ यो अ॒न्तर् आ॒रेळ्हि॒ तम् इ॒तो ना॑शयामसि ॥ १० १६२ ०४
यस् त्वा॒ भ्राता॒ पति॑र् भू॒त्वा जा॒रो भू॒त्वा नि॒पद्य॑ते ।
प्र॒जां यस् ते॒ जिघां॑सति॒ तम् इ॒तो ना॑शयामसि ॥ १० १६२ ०५
यस् त्वा॒ स्वप्ने॑न॒ तम॑सा मोहयि॒त्वा नि॒पद्य॑ते ।
प्र॒जां यस् ते॒ जिघां॑सति॒ तम् इ॒तो ना॑शयामसि ॥ १० १६२ ०६

अ॒क्षीभ्यां॑ ते॒ नासि॑काभ्यां॒ कर्णा॑भ्यां॒ छुबु॑का॒द् अधि॑ ।
यक्ष्मं॑ शीर्ष॒ण्यम् म॒स्तिष्का॑ज् जि॒ह्वाया॒ वि वृ॑हामि ते ॥ १० १६३ ०१
ग्री॒वाभ्य॑स् त उ॒ष्णिहा॑भ्यः कीक॑साभ्यो अनू॒क्यात् ।
यक्ष्मं॑ दोष॒ण्य १॒॑ म् अंसा॑भ्याम् बा॒हुभ्यां॒ वि वृ॑हामि ते ॥ १० १६३ ०२
आ॒न्त्रेभ्य॑स् ते॒ गुदा॑भ्यो वनि॒ष्ठोर् हृद॑या॒द् अधि॑ ।
यक्ष्मम् मत॑स्नाभ्यां य॒क्नः प्ला॒शिभ्यो॒ वि वृ॑हामि ते ॥ १० १६३ ०३
ऊ॒रुभ्यां॑ ते अष्ठीव॒द्भ्याम् पार्ष्णि॑भ्या॒म् प्रप॑दाभ्याम् ।
यक्ष्मं॒ श्रोणि॑भ्या॒म् भास॑दा॒द् भंस॑सो॒ वि वृ॑हामि ते ॥ १० १६३ ०४
मेह॑नाद् वनं॒कर॑णाल् लोम॑भ्यस् ते न॒खेभ्यः॑ ।
यक्ष्मं॒ सर्व॑स्माद् आ॒त्मन॒स् तम् इ॒दं वि वृ॑हामि ते ॥ १० १६३ ०५
अङ्गा॑द्-अङ्गा॒ल् लोम्नो॑-लोम्नो जा॒तम् पर्व॑णि-पर्वणि ।
यक्ष्मं॒ सर्व॑स्माद् आ॒त्मन॒स् तम् इ॒दं वि वृ॑हामि ते ॥ १० १६३ ०६

अपेहि मनसस् पते ऽप क्राम परश् चर ।
परो निरृत्या आ चक्ष्व बहुधा जीवतो मनः ॥ १० १६४ ०१
भद्रं वै वरं वृणते भद्रं युञ्जन्ति दक्षिणम् ।
भद्रं वैवस्वते चक्षुर् बहुत्रा जीवतो मनः ॥ १० १६४ ०२
यद् आशसा निःशसाभिशसोपारिम जाग्रतो यत् स्वपन्तः ।
अग्निर् विश्वान्य् अप दुष्कृतान्य् अजुष्टान्य् आरे अस्मद् दधातु ॥ १० १६४ ०३
यद् इन्द्र ब्रह्मणस् पते ऽभिद्रोहं चरामसि ।
प्रचेता न आङ्गिरसो द्विषताम् पात्व् अंहसः ॥ १० १६४ ०४
अजैष्माद्यासनाम चाभूमानागसो वयम् ।
जाग्रत्स्वप्नः संकल्पः पापो यं द्विष्मस् तं स ऋच्छतु यो नो द्वेष्टि तम् ऋच्छतु ॥ १० १६४ ०५

देवाः कपोत इषितो यद् इच्छन् दूतो निरृत्या इदम् आजगाम ।
तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ॥ १० १६५ ०१
शिवः कपोत इषितो नो अस्त्व् अनागा देवाः शकुनो गृहेषु ।
अग्निर् हि विप्रो जुषतां हविर् नः परि हेतिः पक्षिणी नो वृणक्तु ॥ १० १६५ ०२
हेतिः पक्षिणी न दभात्य् अस्मान् आष्ट्र्याम् पदं कृणुते अग्निधाने ।
शं नो गोभ्यश् च पुरुषेभ्यश् चास्तु मा नो हिंसीद् इह देवाः कपोतः ॥ १० १६५ ०३
यद् उलूको वदति मोघम् एतद् यत् कपोतः पदम् अग्नौ कृणोति ।
यस्य दूतः प्रहित एष एतत् तस्मै यमाय नमो अस्तु मृत्यवे ॥ १० १६५ ०४
ऋचा कपोतं नुदत प्रणोदम् इषम् मदन्तः परि गां नयध्वम् ।
संयोपयन्तो दुरितानि विश्वा हित्वा न ऊर्जम् प्र पतात् पतिष्ठः ॥ १० १६५ ०५

ऋषभम् मा समानानां सपत्नानां विषासहिम् ।
हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् ॥ १० १६६ ०१
अहम् अस्मि सपत्नहेन्द्र इवारिष्टो अक्षतः ।

अधः सपत्ना मे पदोर् इमे सर्वे अभिष्ठिताः ॥ १० १६६ ०२
अत्रैव वो ऽपि नह्याम्य् उभे आर्त्नी इव ज्यया ।
वाचस् पते नि षेधेमान् यथा मद् अधरं वदान् ॥ १० १६६ ०३
अभिभूर् अहम् आगमं विश्वकर्मेण धाम्ना ।
आ वश् चित्तम् आ वो व्रतम् आ वो ऽहं समितिं ददे ॥ १० १६६ ०४
योगक्षेमं व आदायाहम् भूयासम् उत्तम आ वो मूर्धानम् अक्रमीम् ।
अधस्पदान् म उद् वदत मण्डूका इवोदकान् मण्डूका उदकाद् इव ॥ १० १६६ ०५

तुभ्येदम् इन्द्र परि षिच्यते मधु त्वं सुतस्य कलशस्य राजसि ।
त्वं रयिम् पुरुवीराम् उ नस् कृधि त्वं तपः परितप्याजयः स्वः ॥ १० १६७ ०१
स्वर्जितम् महि मन्दानम् अन्धसो हवामहे परि शक्रं सुताँ उप ।
इमं नो यज्ञम् इह बोध्य् आ गहि स्पृधो जयन्तम् मघवानम् ईमहे ॥ १० १६७ ०२
सोमस्य राज्ञो वरुणस्य धर्मणि बृहस्पतेर् अनुमत्या उ शर्मणि ।
तवाहम् अद्य मघवन्न् उपस्तुतौ धातर् विधातः कलशाँ अभक्षयम् ॥ १० १६७ ०३
प्रसूतो भक्षम् अकरं चराव् अपि स्तोमं चेमम् प्रथमः सूरिर् उन् मृजे ।
सुते सातेन यद्य् आगमं वाम् प्रति विश्वामित्रजमदग्नी दमे ॥ १० १६७ ०४

वातस्य नु महिमानं रथस्य रुजन्न् एति स्तनयन्न् अस्य घोषः ।
दिविस्पृग् यात्य् अरुणानि कृण्वन्न् उतो एति पृथिव्या रेणुम् अस्यन् ॥ १० १६८ ०१
सम् प्रेरते अनु वातस्य विष्ठा ऐनं गच्छन्ति समनं न योषाः ।
ताभिः सयुक् सरथं देव ईयते ऽस्य विश्वस्य भुवनस्य राजा ॥ १० १६८ ०२
अन्तरिक्षे पथिभिर् ईयमानो न नि विशते कतमच् चनाहः ।
अपां सखा प्रथमजा ऋतावा क्व स्विज् जातः कुत आ बभूव ॥ १० १६८ ०३
आत्मा देवानाम् भुवनस्य गर्भो यथावशं चरति देव एषः ।
घोषा इद् अस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम ॥ १० १६८ ०४

मयोभूर् वातो अभि वातूस्रा ऊर्जस्वतीर् ओषधीर् आ रिशन्ताम् ।
पीवस्वतीर् जीवधन्याः पिबन्त्व् अवसाय पद्वते रुद्र मृळ ॥ १० १६९ ०१
याः सरूपा विरूपा एकरूपा यासाम् अग्निर् इष्ट्या नामानि वेद ।
या अङ्गिरसस् तपसेह चक्रुस् ताभ्यः पर्जन्य महि शर्म यच्छ ॥ १० १६९ ०२
या देवेषु तन्व१म् ऐरयन्त यासां सोमो विश्वा रूपाणि वेद ।
ता अस्मभ्यम् पयसा पिन्वमानाः प्रजावतीर् इन्द्र गोष्ठे रिरीहि ॥ १० १६९ ०३
प्रजापतिर् मह्यम् एता रराणो विश्वैर् देवैः पितृभिः संविदानः ।
शिवाः सतीर् उप नो गोष्ठम् आकस् तासां वयम् प्रजया सं सदेम ॥ १० १६९ ०४

विभ्राड् बृहत् पिबतु सोम्यम् मध्व् आयुर् दधद् यज्ञपताव् अविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ॥ १० १७० ०१
विभ्राड् बृहत् सुभृतं वाजसातमं धर्मन् दिवो धरुणे सत्यम् अर्पितम् ।
अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर् जज्ञे असुरहा सपत्नहा ॥ १० १७० ०२
इदं श्रेष्ठं ज्योतिषां ज्योतिर् उत्तमं विश्वजिद् धनजिद् उच्यते बृहत् ।
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ॥ १० १७० ०३
विभ्राजञ् ज्योतिषा स्व१र् अगच्छो रोचनं दिवः ।
येनेमा विश्वा भुवनान्य् आभृता विश्वकर्मणा विश्वदेव्यावता ॥ १० १७० ०४

त्वं त्यम् इटतो रथम् इन्द्र प्रावः सुतावतः ।
अशृणोः सोमिनो हवम् ॥ १० १७१ ०१
त्वम् मखस्य दोधतः शिरो ऽव त्वचो भरः ।
अगच्छः सोमिनो गृहम् ॥ १० १७१ ०२
त्वं त्यम् इन्द्र मर्त्यम् आस्त्रबुध्नाय वेन्यम् ।
मुहुः श्रथ्ना मनस्यवे ॥ १० १७१ ०३
त्वं त्यम् इन्द्र सूर्यम् पश्चा सन्तम् पुरस् कृधि ।

दे॒वानां॑ चित् ति॒रो वश॑म् ॥ १० १७१ ०४

आ या॑हि॒ वन॑सा स॒ह गावः॑ सचन्त वर्त॒निं यद् ऊध॑भिः ॥ १० १७२ ०१
आ या॑हि॒ वस्व्या॑ धि॒या मंहि॑ष्ठो जा॒रय॑न्मखः सु॒दानु॑भिः ॥ १० १७२ ०२
पि॒तु॒भृतो॒ न तन्तु॒म् इत् सु॒दान॑वः॒ प्रति॑ दध्मो॒ यजा॑मसि ॥ १० १७२ ०३
उ॒षा अप॒ स्वसु॒स् तमः॒ सं व॑र्तयति वर्त॒निं सु॑जा॒तता॑ ॥ १० १७२ ०४

आ त्वा॑हार्षम् अ॒न्तर् ए॑धि ध्रु॒वस् ति॒ष्ठावि॑चाचलिः ।
विश॑स् त्वा॒ सर्वा॑ वाञ्छन्तु॒ मा त्वद् रा॒ष्ट्रम् अधि॑ भ्रशत् ॥ १० १७३ ०१
इ॒हैवैधि॒ माप॑ च्योष्ठाः॒ पर्व॑त इ॒वावि॑चाचलिः ।
इन्द्र॑ इवे॒ह ध्रु॒वस् ति॑ष्ठे॒ह रा॒ष्ट्रम् उ॑ धारय ॥ १० १७३ ०२
इ॒मम् इन्द्रो॑ अदीधरद् ध्रु॒वं ध्रु॒वेण॑ ह॒विषा॑ ।
तस्मै॒ सोमो॒ अधि॑ ब्रव॒त् तस्मा॑ उ॒ ब्रह्म॑ण॒स् पतिः॑ ॥ १० १७३ ०३
ध्रु॒वा द्यौर् ध्रु॒वा पृ॑थि॒वी ध्रु॒वासः॒ पर्व॑ता इ॒मे ।
ध्रु॒वं विश्व॑म् इ॒दं जग॑द् ध्रु॒वो राजा॑ वि॒शाम् अ॒यम् ॥ १० १७३ ०४
ध्रु॒वं ते॒ राजा॒ वरु॑णो ध्रु॒वं दे॒वो बृह॒स्पतिः॑ ।
ध्रु॒वं त॒ इन्द्र॑श् चा॒ग्निश् च॑ रा॒ष्ट्रं धा॑रयतां ध्रु॒वम् ॥ १० १७३ ०५
ध्रु॒वं ध्रु॒वेण॑ ह॒विषा॒भि सोम॑म् मृशामसि ।
अथो॑ त॒ इन्द्रः॒ केव॑ली॒र् विशो॑ बलि॒हृत॑स् करत् ॥ १० १७३ ०६

अ॒भी॒व॒र्तेन॑ ह॒विषा॒ येनेन्द्रो॑ अभिवावृ॒ते ।
तेना॒स्मान् ब्र॑ह्मणस् पते॒ ऽभि रा॒ष्ट्राय॑ वर्तय ॥ १० १७४ ०१
अ॒भि॒वृत्य॑ स॒पत्ना॑न् अ॒भि या नो॒ अरा॑तयः ।
अ॒भि पृ॑त॒न्यन्तं॑ तिष्ठा॒भि यो न॑ इर॒स्यति॑ ॥ १० १७४ ०२
अ॒भि त्वा॑ दे॒वः स॑वि॒ताभि सोमो॑ अवीवृतत् ।

अभि त्वा विश्वा भूतान्य् अभीवर्तो यथाससि ॥ १० १७४ ०३
येनेन्द्रो हविषा कृत्व्य् अभवद् द्युम्न्य् उत्तमः ।
इदं तद् अक्रि देवा असपत्नः किलाभुवम् ॥ १० १७४ ०४
असपत्नः सपत्नहाभिराष्ट्रो विषासहिः ।
यथाहम् एषाम् भूतानां विराजानि जनस्य च ॥ १० १७४ ०५

प्र वो ग्रावाणः सविता देवः सुवतु धर्मणा ।
धूर्षु युज्यध्वं सुनुत ॥ १० १७५ ०१
ग्रावाणो अप दुच्छुनाम् अप सेधत दुर्मतिम् ।
उस्राः कर्तन भेषजम् ॥ १० १७५ ०२
ग्रावाण उपरेष्व् आ महीयन्ते सजोषसः ।
वृष्णे दधतो वृष्ण्यम् ॥ १० १७५ ०३
ग्रावाणः सविता नु वो देवः सुवतु धर्मणा ।
यजमानाय सुन्वते ॥ १० १७५ ०४

प्र सूनव ऋभूणाम् बृहन् नवन्त वृजना ।
क्षामा ये विश्वधायसो ऽश्नन् धेनुं न मातरम् ॥ १० १७६ ०१
प्र देवं देव्या धिया भरता जातवेदसम् ।
हव्या नो वक्षद् आनुषक् ॥ १० १७६ ०२
अयम् उ ष्य प्र देवयुर् होता यज्ञाय नीयते ।
रथो न योर् अभीवृतो घृणीवाञ् चेतति त्मना ॥ १० १७६ ०३
अयम् अग्निर् उरुष्यत्य् अमृताद् इव जन्मनः ।
सहसश् चिद् सहीयान् देवो जीवातवे कृतः ॥ १० १७६ ०४

पतंगम् अक्तम् असुरस्य मायया हृदा पश्यन्ति मनसा विपश्चितः ।

समुद्रे अन्तः कवयो वि चक्षते मरीचीनाम् पदम् इच्छन्ति वेधसः ॥ १० १७७ ०१
पतंगो वाचम् मनसा बिभर्ति तां गन्धर्वो ऽवदद् गर्भे अन्तः ।
तां द्योतमानां स्वर्यम् मनीषाम् ऋतस्य पदे कवयो नि पान्ति ॥ १० १७७ ०२
अपश्यं गोपाम् अनिपद्यमानम् आ च परा च पथिभिश् चरन्तम् ।
स सध्रीचीः स विषूचीर् वसान आ वरीवर्ति भुवनेष्व् अन्तः ॥ १० १७७ ०३

त्यम् ऊ षु वाजिनं देवजूतं सहावानं तरुतारं रथानाम् ।
अरिष्टनेमिम् पृतनाजम् आशुं स्वस्तये तार्क्ष्यम् इहा हुवेम ॥ १० १७८ ०१
इन्द्रस्येव रातिम् आजोहुवानाः स्वस्तये नावम् इवा रुहेम ।
उर्वी न पृथ्वी बहुले गभीरे मा वाम् एतौ मा परेतौ रिषाम ॥ १० १७८ ०२
सद्यश् चिद् यः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस् ततान ।
सहस्रसाः शतसा अस्य रंहिर् न स्मा वरन्ते युवतिं न शर्याम् ॥ १० १७८ ०३

उत् तिष्ठताव पश्यतेन्द्रस्य भागम् ऋत्वियम् ।
यदि श्रातो जुहोतन यद्य् अश्रातो ममत्तन ॥ १० १७९ ०१
श्रातं हविर् ओ ष्व् इन्द्र प्र याहि जगाम सूरो अध्वनो विमध्यम् ।
परि त्वासते निधिभिः सखायः कुलपा न व्राजपतिं चरन्तम् ॥ १० १७९ ०२
श्रातम् मन्य ऊधनि श्रातम् अग्नौ सुश्रातम् मन्ये तद् ऋतं नवीयः ।
माध्यंदिनस्य सवनस्य दध्नः पिबेन्द्र वज्रिन् पुरुकृज् जुषाणः ॥ १० १७९ ०३

प्र ससाहिषे पुरुहूत शत्रून् ज्येष्ठस् ते शुष्म इह रातिर् अस्तु ।
इन्द्रा भर दक्षिणेना वसूनि पतिः सिन्धूनाम् असि रेवतीनाम् ॥ १० १८० ०१
मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः ।
सृकं संशाय पविम् इन्द्र तिग्मं वि शत्रून् ताळ्हि वि मृधो नुदस्व ॥ १० १८० ०२
इन्द्र क्षत्रम् अभि वामम् ओजो ऽजायथा वृषभ चर्षणीनाम् ।

अपा॑नुदो॒ जन॑म् अमि॒त्रय॒न्त॑म् उ॒रुं दे॒वेभ्यो॑ अकृणोर् उ॒लो॒कम् ॥ १० १८० ०३

प्रथ॑श् च॒ यस्य॑ स॒प्रथ॑श् च॒ नामानु॑ष्टुभस्य ह॒विषो॑ ह॒विर् यत् ।
धा॒तु॒र् द्युता॑नात् सवि॒तुश् च॒ विष्णो॑ रथं॑तरम् आ ज॑भारा॒ वसि॑ष्ठः ॥ १० १८१ ०१
अवि॑न्द॒न् ते अति॑हि॒तं यद् आसी॑द् य॒ज्ञस्य॒ धाम॑ प॒रमं गुहा॒ यत् ।
धा॒तु॒र् द्युता॑नात् सवि॒तुश् च॒ विष्णो॑र् भ॒रद्वा॑जो बृ॒हद् आ च॑क्रे अ॒ग्नेः ॥ १० १८१ ०२
ते ऽविन्द॒न् मन॑सा॒ दीध्या॑ना॒ यजु॑ ष्क॒न्नम् प्रथ॑मं दे॑वयान॑म् ।
धा॒तु॒र् द्युता॑नात् सवि॒तुश् च॒ विष्णो॒र् आ सूर्या॑द् अभरन् घ॒र्मम् ए॒ते ॥ १० १८१ ०३

बृ॒ह॒स्पति॑र् नयतु दु॒र्गहा॑ ति॒रः पुन॑र् नेषद् अ॒घशं॑सा॒य मन्म॑ ।
क्षि॒पद् अश॑स्ति॒म् अप॑ दु॒र्मतिं॑ ह॒न्न् अथा॑ क॒रद् यज॑माना॒य शं योः ॥ १० १८२ ०१
न॒रा॒शंसो॑ नो ऽवतु प्र॒या॒जे शं नो॑ अस्त्व् अनु॒या॒जो ह॒वे॑षु ।
क्षि॒पद् अश॑स्ति॒म् अप॑ दु॒र्मतिं॑ ह॒न्न् अथा॑ क॒रद् यज॑माना॒य शं योः ॥ १० १८२ ०२
तपु॑र्मूर्धा तपतु र॒क्षसो॒ ये ब्र॑ह्म॒द्विषः॒ शर॑वे॒ हन्त॒वा उ॑ ।
क्षि॒पद् अश॑स्ति॒म् अप॑ दु॒र्मतिं॑ ह॒न्न् अथा॑ क॒रद् यज॑माना॒य शं योः ॥ १० १८२ ०३

अप॑श्यं त्वा॒ मन॑सा॒ चेकि॑ताने॒ तप॑सो जा॒तं तप॑सो॒ विभू॑तम् ।
इ॒ह प्र॒जाम् इ॒ह र॒यिं ररा॑णः प्र जा॑यस्व प्र॒जया॑ पुत्रकाम ॥ १० १८३ ०१
अप॑श्यं त्वा॒ मन॑सा॒ दीध्या॑ना॒ं स्वायां॑ त॒नू ऋ॒त्व्ये॒ नाध॑मानाम् ।
उप॒ माम् उ॒च्चा यु॑व॒तिर् ब॑भूयाः प्र जा॑यस्व प्र॒जया॑ पुत्रकामे ॥ १० १८३ ०२
अ॒हं गर्भ॑म् अदधा॒म् ओष॑धीष्व् अ॒हं विश्वे॑षु॒ भुव॑नेष्व् अ॒न्तः ।
अ॒हम् प्र॒जा अ॑जनयम् पृथि॒व्याम् अ॒हं जनि॑भ्यो अ॒परी॑षु पु॒त्रान् ॥ १० १८३ ०३

विष्णु॒र् योनिं॑ कल्पयतु॒ त्वष्टा॑ रू॒पाणि॑ पिंशतु ।

आ सिञ्चतु प्रजापतिर् धाता गर्भं दधातु ते ॥ १० १८४ ०१
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनौ देवाव् आ धत्ताम् पुष्करस्रजा ॥ १० १८४ ०२
हिरण्ययी अरणी यं निर्मन्थतो अश्विना ।
तं ते गर्भं हवामहे दशमे मासि सूतवे ॥ १० १८४ ०३

महि त्रीणाम् अवो ऽस्तु द्युक्षम् मित्रस्यार्यम्णः ।
दुराधर्षं वरुणस्य ॥ १० १८५ ०१
नहि तेषाम् अमा चन नाध्वसु वारणेषु ।
ईशे रिपुर् अघशंसः ॥ १० १८५ ०२
यस्मै पुत्रासो अदितेः प्र जीवसे मर्त्याय ।
ज्योतिर् यच्छन्त्य् अजस्रम् ॥ १० १८५ ०३

वात आ वातु भेषजं शम्भु मयोभु नो हृदे ।
प्र ण आयूंषि तारिषत् ॥ १० १८६ ०१
उत वात पितासि न उत भ्रातोत नः सखा ।
स नो जीवातवे कृधि ॥ १० १८६ ०२
यद् अदो वात ते गृहे ऽमृतस्य निधिर् हितः ।
ततो नो देहि जीवसे ॥ १० १८६ ०३

प्राग्नये वाचम् ईरय वृषभाय क्षितीनाम् ।
स नः पर्षद् अति द्विषः ॥ १० १८७ ०१
यः परस्याः परावतस् तिरो धन्वातिरोचते ।
स नः पर्षद् अति द्विषः ॥ १० १८७ ०२
यो रक्षांसि निजूर्वत्य् वृषा शुक्रेण शोचिषा ।

स नः पर्षद् अति द्विषः ॥ १० १८७ ०३
यो विश्वाभि विपश्यति भुवना सं च पश्यति ।
स नः पर्षद् अति द्विषः ॥ १० १८७ ०४
यो अस्य पारे रजसः शुक्रो अग्निर् अजायत ।
स नः पर्षद् अति द्विषः ॥ १० १८७ ०५

प्र नूनं जातवेदसम् अश्वं हिनोत वाजिनम् ।
इदं नो बर्हिर् आसदे ॥ १० १८८ ०१
अस्य प्र जातवेदसो विप्रवीरस्य मीळ्हुषः ।
महीम् इयर्मि सुष्टुतिम् ॥ १० १८८ ०२
या रुचो जातवेदसो देवत्रा हव्यवाहनीः ।
ताभिर् नो यज्ञम् इन्वतु ॥ १० १८८ ०३

आयं गौः पृश्निर् अक्रमीद् असदन् मातरम् पुरः ।
पितरं च प्रयन् स्वः ॥ १० १८९ ०१
अन्तश् चरति रोचनास्य प्राणाद् अपानती ।
व्य् अख्यन् महिषो दिवम् ॥ १० १८९ ०२
त्रिंशद् धाम वि राजति वाक् पतंगाय धीयते ।
प्रति वस्तोर् अह द्युभिः ॥ १० १८९ ०३

ऋतं च सत्यं चाभीद्धात् तपसो ऽध्य् अजायत ।
ततो रात्र्य् अजायत ततः समुद्रो अर्णवः ॥ १० १९० ०१
समुद्राद् अर्णवाद् अधि संवत्सरो अजायत ।
अहोरात्राणि विदधद् विश्वस्य मिषतो वशी ॥ १० १९० ०२
सूर्याचन्द्रमसौ धाता यथापूर्वम् अकल्पयत् ।

दिवं॑ च पृथि॒वीं चा॒न्तरि॑क्ष॒म् अथो॒ स्वः॑ ॥ १० १९० ०३

सं-स॒म् इद् यु॑वसे वृष॒न्न् अग्ने॒ विश्वा॑न्य् अ॒र्य आ ।
इ॒ळस् प॒दे सम् इ॑ध्यसे॒ स नो॒ वसू॒न्य् आ भ॑र ॥ १० १९१ ०१
सं ग॑च्छध्वं॒ सं व॑दध्वं॒ सं वो॒ मनां॑सि जानताम् ।
दे॒वा भा॒गं यथा॒ पूर्वे॑ संजाना॒ना उ॒पास॑ते ॥ १० १९१ ०२
स॒मा॒नो मन्त्रः॒ समि॑तिः समा॒नी स॑मा॒नम् मनः॑ स॒ह चि॒त्तम् ए॑षाम् ।
स॒मा॒नम् मन्त्र॑म् अ॒भि म॑न्त्रये वः समा॒नेन॑ वो ह॒विषा॑ जुहोमि ॥ १० १९१ ०३
स॒मा॒नी व॒ आकू॑तिः समा॒ना हृद॑यानि वः ।
स॒मा॒नम् अ॑स्तु वो॒ मनो॒ यथा॑ वः॒ सुस॒हास॑ति ॥ १० १९१ ०४